अथाष्टादश कांडनामानि।

१ ये त्रिसप्ता·
२ वेनः तद् । पश्यं·।
३ अग्निर्नः शत्रू·
४ ब्रह्म जज्ञानं·
५ ऋध ङ्मं ओमो·
६ दोषो इति । गाय।
७ धीती । वा । ये।
८ अंतकाय मृत्यवे·
९ दिवस्पृथि·पा·
१० यांकू·प्यंति·
११ अग्ने जायस्व·
१२ सत्यं बृहद्·
१३ उत एहि । वाजि·
१४ सत्येनोत्तभिता·
१५ व्रात्य । आसीद्·
१६ अति सृष्टः । अपां
१७ विषासहिम्
१८ आ चित्स सखायं·
१९ सम् । सम् ।
२० इन्द्र त्वा वृषभं

श्री॥अथर्ववेद संहिता पद कांड २० नां संपूर्ण॥ अथर्व कांडना द्वितीय कांड

प·— प·
१५-४१—३५
प्र—द्वि

६६ पत्रां। प·प·३५
३१९ ग्रंथ संख्या १००००

५१०

॥ॐ॥ श्रीगणेशाय नमः॥ नमोऽथर्वणवेदाय॥ ॐ ये। त्रिऽसप्ताः। परिऽयन्ति॥ वि
श्वा। रूपाणि॥ बिभ्रतः॥ वाचः। पतिः। बला॥ तेषां॥ तन्वः। अद्य। दधातु। मे॥१॥ पुनः।
आ। इहि। वाचः। पते॥ देवेन। मनसा। सह॥ वसोः। पते। नि। रमय॥ मयि। एव। अ
स्तु। मयि। श्रुतम्॥२॥ इह। एव। अभि। वि। तनु। उभे इति॥ आर्त्नीइवेत्यार्त्नीऽइव॥
ज्यया॥ वाचः। पतिः। नि। यच्छतु॥ मयि। एव। अस्तु। मयि। श्रुतं॥३॥ उपऽहूतः। वाचः। प
तिः॥ उप। अस्मान्। वाचः। पतिः। ह्वयताम्॥ सं। श्रुतेन॥ गमेमहि॥ मा। श्रुतेन। वि १।न।
राधिषि॥४॥१॥ विद्म। शरस्य। पितरं॥ पर्जन्यं। भूरिऽधायसं॥ विद्मो इति।
सु। अस्य। मातरं॥ पृथिवीं॥ भूरिऽवर्पसं॥१॥ ज्याके। परि। नः। नम। अश्मानं।

तन्वं। कृधि। वीडुः। वरीयः। अरातीः॥ अप। द्वेषांसि। आ। कृधि॥२॥ वृक्षं। यत्। गावः।
परिऽसस्वजानाः॥ अनुऽस्फुरं। शरं। अर्चन्ति। ऋभुं। शरुं। अस्मत्। यवय
॥ दिद्युम्। इंद्र॥३॥ यथा॥ द्यां। च। पृथिवीं। च। अन्तः। तिष्ठति॥ तेजनं॥ एव। रो
गं। च। आऽस्रावं। च॥ अन्तः। तिष्ठतु। मुंजः। इत्। तत्॥४॥२॥ विद्म। शरस्य। पितरं॥ पर्ज
न्यं। शतऽवृष्ण्यं॥ तेन। ते। तन्वे। शं। करं॥ पृथिव्यां। ते। निऽसेचनं। बहिः।
ते। अस्तु। बाल्। इति॥१॥ पितरं। मित्रं। शतऽवृष्ण्यं॥२॥ पितरं। वरुणं। श
तऽवृष्ण्यं॥३॥ पितरं। चंद्रं। शतऽवृष्ण्यं॥४॥ विद्म। शरस्य। पितरं। सूर्यं। श
तऽवृष्ण्यं। तेन। ते। तन्वे। शं। करं। पृथिव्यां। ते। निऽसेचनं। बहिः। ते।

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

अस्तु। बाल्। इति॥ ५॥ यत्। आंत्रेषु। गवीन्योः। यत्। वस्तौ। अधि। सम्ऽश्रितम्। एव। ते
। मूत्रम्। मुच्यताम्॥ बहिः। बाल्। इति। सर्वकम्॥ ६॥ प्र। ते। भिनद्मि। मेहनम्
॥ वर्त्रम्। वेशन्त्याःऽइव॥ विऽसितम्। ते। वस्तिऽबिलम्॥ समुद्रस्यऽइव। उदधेःऽइव॥ ए
यथा। इषुका। परा। अपतत्। अवऽसृष्टा। अधि। धन्वनः। एव। ते। मूत्रम्। मुच्यताम्॥
बहिः। बाल्। इति। सर्वकम्॥ ९॥ ३॥ अम्बयः। यन्ति। अध्वऽभिः। जामयः। अध्वरिऽय
ताम्। पृञ्चतीः। मधुना। पयः॥ १॥ अमूः। याः। उप। सूर्ये। याभिः। वा। सूर्यः। सह॥ ताः।
नः। हिन्वन्तु। अध्वरम्॥ २॥ अपः। देवीः। उप। ह्वये। यत्र। गावः। पिबन्ति। नः। सिन्धुऽभ्यः। २
कर्त्वम्। हविः॥ ३॥ अप्ऽसु। अन्तः। अमृतम्। अप्ऽसु। भेषजम्। अपाम्। उत। प्रऽशस्तिऽभिः

अश्वाः। भवथ। वाजिनः। गावः। भवथ। वाजिनीः॥ ४॥ ४॥ आपः। हि। स्थ। मयःऽभुवः
ताः। नः। ऊर्जे। दधातन। महे। रणाय। चक्षसे॥ १॥ यः। वः। शिवऽतमः। रसः॥ तस्य।
भाजयत। इह। नः॥ उशतीःऽइव। मातरः॥ २॥ तस्मै। अरम्। गमाम। वः। यस्य।
क्षयाय। जिन्वथ॥ आपः। जनयथ। च। नः॥ ३॥ ईशानाः। वार्याणाम्॥ क्षयन्तीः। चर्ष
णीनाम्। अपः। याचामि। भेषजम्॥ ४॥ ५॥ शम्। नः। देवीः। अभिष्टये॥ आपः। भवन्तु। पी वं
तये। शम्। योः। अभि। स्रवन्तु। नः॥ १॥ अप्ऽसु। मे। सोमः। अब्रवीत्॥ अन्तः। वि
श्वानि। भेषजा॥ अग्निम्। च। विश्वऽशम्भुवम्॥ २॥ आपः। पृणीत। भेषजम्। व
रूथम्। तन्वे। मम॥ ज्योक्। च। सूर्यम्। दृशे॥ ३॥ शम्। नः। आपः। धन्वन्याः। श

मृ ऊं इति। सं। तु। अनूप्याः॥३॥ शं। नः। खनित्रिमाः। आपः। शम्। ऊं इति। याः। कुंभे। आ
॰भृताः॥ शिवाः। नः। संतु। वार्षिकीः॥४॥६॥ स्तुवानम्। अग्ने। आ। वह॥१॥ यातु
॰धानम्। किमीदिनम्॥ त्वम्। हि। देव। वंदितः। हंता। दस्योः। बभूविथ॥१॥ आ
ज्यस्य। परमे॰स्थिन्। जात॰वेदः। तनू॰वशिन्॥ अग्ने। तौलस्य। प्र। आशान॥
यातु॰धानान्। वि। लापय॥२॥ वि। लपंतु। यातु॰धानाः। अत्रिणः। ये। किमी
दिनः॥ अथ। इदम्। अग्ने। नः। हविः। इंद्रः। च। प्रति। हर्यतम्॥३॥ अग्निः। पू
नु र्वः। आ। रभताम्॥ प्र। इंद्रः। नुदतु। बाहु॰मान्॥ ब्रवीतु। सर्वः। यातु॰मान्। अ
यम्। अस्मि। इति। आ॰इत्य॥४॥ पश्याम। ते। वीर्यम्। जात॰वेदः॥ प्र। नः। ब्रूहि। या ३

तु॰धानान्।नृ॰चक्षाः।त्वया।सर्वान्।परिस्थितान्॥पुरस्तात्।ते।आ।यंतु।३।प्र॰ब्रुवाणाः।
उप।इदम्॥आ।रभस्व।जात॰वेदः।अस्माक॰अर्थाय।जज्ञिषे।दूतः।नः।अग्ने।भू
२ ३ त्वा।यातु॰धानान्।वि।लापय॥६॥त्वम्।अग्ने।यातु॰धानान्।उप॰बद्धान्।इह
आ।वह॥अथ।एषाम्।इंद्रः।वज्रेण।अपि।शीर्षाणि।वृश्चतु॥७॥७॥१॥इदम्।
हविः॥यातु॰धानान्।नदी।फेनम्॰इव।आ।वहतु॥यः।इदम्।स्त्री।पुमा
न्।अकः॥इह।सः।स्तुवताम्।जनः॥१॥अयम्।स्तुवानः॥आ।अगमत्।३
यो।इमम्।स्म।प्रति।हर्यत॥बृहस्पते।वशे।लब्ध्वा।अग्नीषोमा।वि।विध्यतम्॥२॥
यातु॰धानस्य।सोम॰प॥जहि।प्र॰जाम्।नयस्व।च।निः।स्तुवा॥पीतराइये चोरी ४

नस्य।पातय।परं।अक्षि।उत।अवरम्॥३॥यत्र।एषाम्।अग्ने।जनिमानि।वे
त्थ।गुहा।सताम्।अत्त्रिणाम्।जात॰वेदः॥तान्।त्वम्।ब्रह्मणा।वावृधानः॥४
जहि।एषाम्।शत॰तर्हम्।अग्ने॥४॥८॥२॥अस्मिन्।वसु।वसवः।धा
रयंतु।इंद्रः।पूषा।वरुणः।मित्रः।अग्निः।इमम्।आदित्याः।उत।वि
श्वे।च।देवाः।उत्॰तरस्मिन्।ज्योतिषि।धारयंतु॥१॥अस्य।देवाः।प्र
दिशि।ज्योतिः।अस्तु।सूर्यः।अग्निः।उत।वा।हिरण्यम्॥स॰प
त्नाः।अस्मत्।अधरे।भवंतु।उत्॰तमम्।नाकम्।अधि।रोहय।इ
मम्॥२॥येन।इंद्राय।सम्॰अभरः।पयांसि।उत्॰तमेन।ब्रह्म
णा।जात॰वेदः॥तेन।त्वम्।अग्ने।इह।वर्धय।इमम्॥स॰जातानाम्।

अघ्न्ये। अग्ना। धेहि। एनम्॥३॥ अनेषाम्। यज्ञम्। उत। बर्हिः दद्वो। अग्ने। सुम्न
रायः। पोषम्। उतं चित्तानि। अग्ने॥ सं०प न्नाः। अस्मत्। अधरे। न्वं। उ
तं०तमम्। नाकम्। अधि। रोहय। इमम्॥४॥छा॥१॥ अयम्। देवानाम्।
असुरः। वि। राजति। वशाः। हि। सत्याः। वरुणस्य। राज्ञः। ततः। परि। ब्रह्म
णा। २॥ शादनः। उग्रस्य। मन्योः। उत्। इमम्। नयामि॥२॥ नमः। ते। राजन्।
वरुण। अस्तु। मन्यवे। विश्वम्। हि। उग्र।। नि। चिकेषि। द्रुग्धम्॥ सहस्रम्।
अन्याम्। प्र। सुवामि। साकम्। शतम्। जीवाति। दः। तव। अयम्। ३॥ यत्।
उवक्थ। अनृतम्॥ जिह्वया। वृजिनम्। बहु। राज्ञः। त्वा। सत्य०धर्मणः॥
मुञ्चामि। वरुणात्। अहम्॥ ३॥ मुञ्चामि। त्वा। वैश्वानरात्। अर्णवात्।

शर३

MEMORIAL

२

महतः॥ परि। सं०जाताम्॥ उग्र। इह। आ। वह॥ ३ ब्रात्यै। च। अप। चिकीहि। नः॥४॥छ१०॥
वषट्। ते। पूषन्॥ अस्मिन्। सूतौ। अर्यमा। होता। कृणोतु। वेधाः। सिस्रताम्
म। नारी। ऋत०प्रजाता। वि। पर्वाणि। जिहताम्। सूतवै। ऊ इति॥१॥ चतस्रः।
दिवः। प्र०दिशः॥ चतस्रः। भूम्याः। उत॥ देवाः। गर्भम्। सम्॥ ऐरयन्। ताम्। वि
ऊर्णुवन्तु॥ सूतवै॥२॥ सूषा। वि। ऊर्णोतु। वि। योनिम्॥ हापयामसि॥ श्रथय।
सूषणे। त्वम्॥ अव। चम्। बिष्कले॥ सृज॥३॥ न। इव। मांसे। न। पीबसि। न। इव।
मज्जसु। आ०हतम्॥ अवैतु। पृश्नि। शेवलम्। शुने। जरायु। अत्तवे। अव।
रायु। पद्यताम्॥४॥ वि। ते। भिनद्मि॥ मेहनम्। वि। योनिम्। वि। गवीनिके इति। वि।

मातरम्। च। पुत्रम्। च। वि। कुमारं। जरायुणा। अव। प॥ यथा। वातः। यथा। मनः।
यथा। पतंति। पक्षिणः। एवं। च। मू। दश। ऽमास्य। साकं। जरायुणा। पत। अव। जरा
यु। पद्यताम्॥६॥ छ॥११॥ द्वितीयोनुवाकः॥ पंचमेऽ॥ जरायुजः। प्रथमः। उस्रियः। वृषा।
वातऽभ्रजाः। स्तनयन्। एति। वृष्ट्या। सः। नः। मृडाति। तन्वे। ऋजुऽगाः। रुजन्। यः। ए
कम्। ओजः। त्रेधा। वि। चक्रमे॥१॥ अंगेऽअंगे। शोचिषा। शिश्रियाणं। नमस्यंतः।
त्वा। हविषा। विधेम। अंकान्। समऽअंकान्। हविषा। विधेम। यः। अग्रभीत्। पर्व।
अस्य। ग्रभीता॥२॥ मुंच। शीर्षक्त्याः। उत। कासः। एनम्। परुःऽपरुः। आऽवि
विश। यः। अस्य। यः। अभ्रऽजाः। वातऽजाः। यः। च। शुष्मः। वनस्पतीन्। सच ६

ताम्। पर्वतान्। च॥३॥ शम्। मे। परस्मै। गात्राय। शम्। अस्तु। अवराय। मे। शम्।
मे। चतुःऽभ्यः। अंगेभ्यः। शम्। अस्तु। तन्वे। मम॥४॥ छ॥१२॥ नमः। ते। अस्तु। विऽद्यु
ते। नमः। ते। स्तनयित्नवे। नमः। ते। अस्तु। अश्मने। येन। दुःऽदाशे। अस्यसि॥१॥
नमः। ते। प्रऽवतः। नपात्। यतः। तपः। सम्ऽऊहसि। मृड। नः। तनूभ्यः। मयः। तो
केभ्यः। कृधि॥२॥ प्रऽवतः। नपात्। नमः। एव। अस्तु। तुभ्यम्। नमः। ते। हेतये। त
पुषे। च। कृण्मः। विद्म। ते। धाम। परमम्। गुहा। यत्। समुद्रे। अन्तः। निऽहिता। असि।
नाभिः॥३॥ याम्। त्वा। देवाः। असृजंत। विश्वे। इषुम्। कृण्वानाः। असनाय।
धृष्णुम्॥ सा। नः। मृड। विदथे। गृणाना। तस्यै। ते। नमः। अस्तु। देवि॥४॥ छ॥१३॥

भगम्। अस्याः॥ वर्चः। आ। अदिषि। अधि। वृक्षात्ऽइव। स्रजम्। महाबुध्नःऽइव
पर्वतः॥ ज्योक्। पितृषु। आस्ताम्॥१॥ एषा। ते। राजन्। कन्या॥ वधूः। नि। धूयता
म्। यम। सा। मातुः। बध्यताम्। गृहे। अथो इति। भ्रातुः। अथो इति। पितुः॥२॥ एषा
उ॰४ ते। कुलऽपाः। राजन्। ताम्। ऊं इति। ते। परि। दद्मसि॥ ज्योक्। पितृषु। आसाता।
आ। शीर्ष्णः॥ सम्ऽओप्यात्॥३॥ असितस्य। ते। ब्रह्मणा। कश्यपस्य। गय
स्य। च। अन्तःकोशम्ऽइव। जामयः। अपि। नह्यामि। ते। भगम्॥४॥ ख॥ १४॥
सम्। सम्। स्रवन्तु। सिन्धवः॥ सम्। वाताः। सम्। पतत्रिणः॥ इमम्। यज्ञम्। प्रऽ
दिवः॥ मे। जुषन्ताम्। सम्ऽस्राव्येण। हविषा। जुहोमि॥१॥ इह। एव। हवम्। आ॥ १

यात॥ आ। मे॥ इह। सम्ऽस्रावणाः। उत॥ इमम्। वर्धयत। गिरः॥ इह। आ। एतु। सर्वः। यः। पशुः ऊः।
॥ अस्मिन्। तिष्ठतु। या। रयिः॥२॥ ये। नदीनाम्। सम्ऽस्रवन्ति। उत्सासः। सदम्। अक्षि द॰२
ताः॥ तेभिः। मे। सर्वैः। सम्ऽस्रावैः। धनम्। सम्। स्रावयामसि॥३॥ ये। सर्पिषः। सम्ऽस्र
वन्ति। क्षीरस्य। च। उदकस्य। च॥ तेभिः। मे। सर्वैः। सम्ऽस्रावैः। धनम्। सम्। स्रावयाम
सि॥४॥ घ॥ १५॥ ये। अमाऽवास्याम्। रात्रिम्॥ उत्ऽअस्थुः। व्राजम्। अत्त्रिणः॥ अग्निः॥
या तुरीयः। तुम्ऽहा॥ सः। अस्मभ्यम्। अधि। ब्रवत्॥१॥ सीसाय। अधि। आह। वरुणः॥
सीसाय। अग्निः। उप। अवति॥ सीसम्। मे। इन्द्रः। प्र। अयच्छत्। तत्। अङ्ग। यातुऽचा
तनम्॥२॥ इदम्। विऽस्कन्धम्। सहते। इदम्। बाधते। अत्त्रिणः। अनेन। विश्वा
। ससहे॥ या। जातानि। पिशाच्याः॥ यदि। नः। गाम्। हंसि। यदि। अश्वम्। यदि। पु

रुषम्॥तम्।च्॥सीसेन।विध्याम्ः।पप्ता।नुः।=अस्मन्=अवीर०हा॥४॥१६॥१६॥=अमूः
ः।याः।यन्ति।योषितः।हिराः।लोहित०वाससः।=अभ्रातरः०इव।जामयः॥तिष्ठं
तु।हत०वर्चसः॥१॥तिष्ठ।=अवरे।तिष्ठ।परे।उत।त्वम्।तिष्ठ।मध्यमे॥कनि
ष्ठिका।च।तिष्ठति।तिष्ठात्।इत्।धमनिः।मही॥२॥शतस्य।धमनीनाम्॥सह
स्रस्य।हिराणाम्॥अस्थुः।इत्।मध्यमाः।इमाः॥साकम्।=अन्ताः।=अरंसत
॥३॥परि।वः।सिकता०वती।धनूः।बृहती।=अक्रमीत्॥तिष्ठत।इलयत।सु
कम्॥४॥१७॥निः।लक्ष्म्यम्।ललाम्यम्॥निः।=अरातिम्।सुवामसि॥ ६॥
=अथ।या।भद्रा।तानि।नः।प्र०जायै।=अरातिम्।नयामसि॥१॥निः।=अर

णिम्।सविता।साविषत्।पादयोः।निः।हस्तयोः।वरुणः।मित्रः।=अर्यमा॥निः।=अ
स्मभ्यम्।=अनु०मतिः।ररणा॥प्र०इमाम्।देवाः।=असाविषुः।सौ=भगाय।र
यत्।ते।=आत्मनि।तन्वाम्।घोरम्।=अस्ति।यत्।वा।केशेषु।प्रति०चक्षणे।वा
॥सर्वम्।तत्।वाचा।=अप।हन्मः।वयम्।देवः।त्वा।सविता।सूदयतु॥३॥रि
श्यपदीम्।वृष०दतीम्।गो०सेधाम्।विधमाम्।उत।विलीढ्यम्।ललाम्यम् वि०५
॥ताः।=अस्मत्।नाशयामसि॥४॥१८॥मा।नः।विदत्।वि०व्याधिनः।मो इति
=अभि०व्याधिनः।विदत्।=आरात्।शरव्याः।=अस्मत्।विषूचीः।इन्द्र।पात
य॥विष्वंचः।=अस्मत्।शरवः।पतन्तु॥या।=अस्ताः।याः।च।=अस्याः॥दैवीः।मनु

यूंऽषवः॥ मम। अमित्रान्। वि। विध्यत॥२॥ यः। नः। स्वः। यः। अरणः। सऽजातः। उत
। निष्ट्यः। यः। अस्मान्। अभिऽदासति। रुद्रः। शरव्यया। एतान्। मम। अमित्रा
न्। वि। विध्यतु॥३॥ यः। सऽपत्नः। यः। असपत्नः। यः। च। द्विषन्। शपाति। नः। देवाः।
तम्। सर्वे। धूर्वन्तु॥ ब्रह्म। वर्म। मम। अन्तरम्॥४॥१९॥ अदारोऽसृत्। भव
तु। देव। सोम॥ अस्मिन्। यज्ञे। मरुतः। मृडत। नः॥ मा। नः। विदत्। अभिऽभाः
मो इति॥ अशस्तिः॥ मो इति। नः। विदत्। वृजिना। द्वेष्या। या॥१॥ यः। अद्य। सेन्यः। व
धः। अघऽयूनाम्। उत्ऽईरते॥ युवम्। तम्। मित्रावरुणौ॥ अस्मत्। यवय
तम्॥ परि॥२॥ इतः। च। यत्। अमुतः। च। यत्। वधम्। वरुण। यवय॥३॥ वि। २०॥

महत्। शर्म। यच्छ। वरीयः। यवय। वधम्॥३॥ शासः। इत्था। महान्। असि॥ अमित्र
ऽसहः। अस्तृतः॥ न। यस्य। हन्यते। सखा। न। जीयते। कदा। चन॥४॥२०॥ स्वस्तिऽदाः।
विशाम्। पतिः। वृत्रऽहा। विऽमृधः। वशी॥ वृषा। इन्द्रः। पुरः। एतु। नः। सोमऽपाः। अ
भयंऽकरः॥१॥ वि। नः। इन्द्र। मृधः। जहि। नीचा। यच्छ। पृतन्यतः॥ अधमम्। गमय। त
मः। यः। अस्मान्। अभिऽदासति॥२॥ वि। रक्षः। वि। मृधः। जहि। वि। वृत्रस्य। हनू इति।
रुज॥ वि। मन्युम्। इन्द्र। वृत्रऽहन्॥ अमित्रस्य। अभिऽदासतः॥३॥ अप। इन्द्र। द्विषतः।
मनः॥ अप। जिज्यासतः। वधम्॥ वि। महत्। शर्म। यच्छ। वरीयः। यवय। वध
म्॥४॥२१॥ अनुऽसूर्यम्। उत्। अयताम्। हृत्ऽद्योतः। हरिमा। च। ते॥ गोः। रो

हितस्य। वर्णेन॥ तेन। त्वा। परि। दध्मसि॥१॥ परि। त्वा। रोहितैः। वर्णैः। दीर्घायु॰त्वाय। दध्म
सि॥ यथा। अयम्। अरपाः। असत्॥ अथो इति। हरितः। भुवत्॥२॥ याः। रोहि
णीः। देवत्याः॥ गावः। याः। उत। रोहिणीः॥ रूपम्॰रूपम्। वयः॰वयः॥ ताभिः
त्वा। परि। दध्मसि॥३॥ शुकेषु। ते। हरिमाणम्॥ रोपणाकासु। दध्मसि॥ अथो इति
हारिद्रवेषु। ते। हरिमाणम्। नि। दध्मसि॥४॥ ॥छ॥२२॥ नक्तम्॰जाता॥ असि
ओषधे॥ रामे। कृष्णे। असिक्नि। च॥ इदम्। रजनि। रजय॥ किलासम्। पलितम्
च। यत्॥१॥ किलासम्। च। पलितम्। च। निः। इतः। नाशय। पृषत्॥ आ। त्वा॥
स्वः। विशताम्। वर्णः॥ परा। शुक्लानि। पातय॥२॥ असितम्। ते। प्र॰लयनम्॥ आ॰

MEMORIAL

स्थानम्॥ असितम्। तव॥ असिक्नी। असि। ओषधे॥ निः। इतः। नाशय। पृषत्॥३॥
अस्थि॰जस्य। किलासस्य। तनू॰जस्य। च। यत्। त्वचि॥ दूष्या। कृतस्य। ब्रह्मणा।
लक्ष्म। श्वेतम्। अनीनशम्॥४॥ ॥छ॥२३॥ सु॰पर्णः। जातः। प्रथमः। तस्य। त्व
पित्तम्। आसिथ॥ तत्। आसुरी। युधा। जिता॥ रूपम्। चक्रे। वनस्पतीन्॥
१॥ आसुरी। चक्रे। प्रथमा। इदम्। किलास॰भेषजम्॥ इदम्। किलास॰नाशनम्
नम्॥ अनीनशत्। किलासम्॥ स॰रूपाम्। अकरत्। त्वचम्॥२॥ स॰रूपा।
नाम। ते। माता। स॰रूपः। नाम। ते। पिता॥ स॰रूप॰कृत्। त्वम्। ओषधे। सा। स॰
रूपम्। इदम्। कृधि॥३॥ श्यामा। स॰रूपम्॰करणी। पृथिव्याः। अधि।

उनूऽइता॥ तुंदंम्। क्रंदंति॥ सुऽप्रऽस्ताधय। पुना। रूपाणि। कल्पय॥ ४॥ ७॥ ५॥ यत्।
अग्निः। आपः॥ अदहत्। प्रऽविश्य॥ यत्र। अकृण्वन्। धर्मऽधृतः। नमांसि। तत्र। ते।
आहुः॥ परमम्। जनित्रम्। सः। नः। सम्ऽविद्वान्। परि। वृंधि। तक्मन्॥ १॥ यदि।
अर्चिः। यदि। वा। असि। शोचिः। शकल्यऽएषि। यदि। वा। ते। जनित्रं। हूडुः। नाम।
असि। हरितस्य। देवसः॥ २॥ यदि। शोकः। यदि। वा। अभिऽशोकः॥ यदि। वा। रा
ज्ञः॥ वरुणस्य। असि। पुत्रः॥ हूडुः। नाम। असि। हरितस्य। देव। सः। नः। सम्ऽ
विद्वान्। परि। वृंधि। तक्मन्॥ ३॥ नमः। शीताय। तक्मने। नमः। रूराय। शोचिषे।
कृणोमि। यः। अन्येद्युः। उभयऽद्युः। अभिऽएति। तृतीयकाय। नमः। अस्तु। त ११॥

क्मने॥ ४॥ ७॥ २५॥ आरे। असौ। अस्मत्। अस्तु। हेतिः। देवासः। असत्॥ आरे। अ
अ २ श्मा। यम्। अस्यथ॥ सखा। असौ। अस्मभ्यम्। अस्तु। रातिः। सखा। इंद्रः। भगः। स
विता। चित्रऽराधाः॥ २॥ यूयं। नः। प्रऽवतः। नपात्। मरुतः। सूर्यऽत्वचसः। शर्म।
यच्छथ। सऽप्रथाः॥ ३॥ सुसूदत। मृडत। मृडय। नः। तनूभ्यः। मयः। तोकेभ्यः। कृधि
८॥ २६॥ अमूः। पारे। पृदाक्वः। त्रिऽसप्ताः। निःऽजराः। अयवः॥ तासां। जरायुऽभिः। वयम्॥
अक्ष्यौ। अपि। व्ययामसि॥ अघऽयोः। परिऽपंथिनः॥ १॥ विषूची। एतु। कृंतती॥
पिनाकम्ऽइव। बिभ्रती॥ विष्वक्। पुनःऽभुवः। मनः। असम्ऽऋद्धाः। अघऽयवः॥
२॥ न। बहवः। सम्। अशकन्॥ नार्भकाः। अभि। दाधृषुः॥ ३॥ वेणोः। अद्गाः।

सं॒सार॑म्।उ॒त।न॒क्रम्॥ अ॒धा। मि॒षः। वि॒ऽक॒रय॑ः। वि॒घ्न॒ताम्। या॒तु॒ऽधा॒न्य॑ः॥ आ॒ल्प॒

उ॒ऽवा। अ॒न्नि॒तः॥ अ॒सम्ऽऋ॒द्धा॥ अ॒ध॒ऽय॒वः॥६॥ प्रऽस्तु॒तम्। पा॒दौ। प्र॒ऽस्फु॒टत॑म्। व॒ह॑तम्।

ह॒ए॒तः। गृ॒हान्॥ इ॒न्द्रा॒णी। ए॒तु। प्र॒थ॒मा॥ अ॒जी॒ता। अमु॑षिता। पु॒रः॥५॥७॥२१॥ उप॑। प्र।

अ॒गा॒त्। दे॒वः। अ॒ग्निः। र॒क्षः॒ऽहा। अ॒मी॒व॒ऽचात॑नः॥ दह॑न्। अप॑। द्व॒यावि॑नः॥ या॒तु॒ऽधा

नान्। कि॒मी॒दिन॑ः॥१॥ प्रति॑। द॒ह॒। या॒तु॒ऽधा॒नान्। प्रति॑। दे॒व॒। कि॒मी॒दिन॑ः॥ प्र॒ती॒चीः

कृ॒ष्ण॒ऽव॒र्त॒नि॥ सम्। द॒ह॒। या॒तु॒ऽधा॒न्य॑ः॥२॥ या। श॒शाप॑। शप॑नेन॥ या। अ॒घम्। मूर॑म्॥

आ॒ऽद॒धे॥ या। रस॑स्य। हर॑णाय। जा॒तम्। आ॒ऽर॒भे॥ तो॒कम्। अ॒त्तु। सा॥३॥ पु॒त्रम्। अ॒त्तु। ॥१२॥

या॒तु॒ऽधा॒नीः। वि। ति॒ष्ठ॒न्ताम्। अ॒राय्य॑ः॥४॥८॥२२॥ पंच मोष्टौ॥ अ॒ग्नि॒ऽव॒र्ते॑न। म॒णि॒ना॥

येन॑। इन्द्र॑। अ॒भि॒ऽव॒वृ॒धे॥ तेन॑। अ॒स्मान्। ब्र॒ह्म॒णः॒। प॒ते॒॥ अ॒भि। रा॒ष्ट्राय॑। व॒र्ध॒य॒॥१॥

घे

अ॒भि॒ऽवृ॒त्य॑। स॒ऽपत्ना॑न्। अ॒भि। याः। नः॒। अरा॑तयः॥ अ॒भि। पृ॒त॒न्यन्त॑म्। ति॒ष्ठ॒॥ अ॒भि। यः। नः॒।

दु॒र॒स्यति॑॥२॥ अ॒भि। त्वा॒। दे॒वः। स॒वि॒ता॥ अ॒भि। सोम॑ः। अ॒वी॒वृ॒ध॒त्॥ अ॒भि। त्वा॒॥

विश्वा॑। भू॒तानि॑॥ अ॒भि॒ऽव॒र्तः। यथा॑। अस॑सि॥३॥ अ॒भि॒ऽव॒र्तः। अ॒भि॒ऽभ॒वः। स॒प॒त्न॒ऽक्षय॑

म म॒णिः। रा॒ष्ट्राय॑। मह्य॑म्। ब॒ध्य॒ता॒म्॥ स॒ऽपत्ने॑भ्यः। प॒रा॒ऽभुवे॑॥४॥ उत्। अ॒सौ। सूर्य॑ः।

अ॒गा॒त्॥ उत्। इ॒दम्। मा॒म॒कम्। वचः॑॥ यथा॑। अ॒हम्। श॒त्रु॒ऽहः। अ॒सा॒नि॥ अ॒स॒प॒त्नः।

स॒प॒त्न॒ऽहा॥५॥ स॒प॒त्न॒ऽक्षय॑णः। वृष॑। अ॒भि॒ऽरा॑ष्ट्रः। वि॒ऽस॒स॒हिः॥ यथा॑। अ॒हम्। ए॒षाम्।

वी॒राणा॑म्। वि॒ऽराजा॑नि। जन॑स्य। च॒॥६॥ छ॒प्यै॥२१॥ विश्वे॑। दे॒वाः। वसवः॑। रक्ष॑त।

इ॒मम्॥ उ॒त। आ॒दि॒त्याः। जा॒गृ॒त॒। यू॒यम्॥ अ॒स्मिन्। मा। इ॒मम्। स॒ऽना॒भिः। उ॒त।

वा॥अन्य॰नामिः॥मा॥इमम्॥वा॥आपत॥पौरुषेयः॥वधः॥यः॥१॥ये॥वः॥देवाः॥पितरः॥ये
च॥पुत्राः॥सं॰चेतसः॥मे॥शृणुत॥इदम्॥उक्तम्॥सर्वेभ्यः॥वः॥परि॥ददामि॥एतम्॥स्व
स्ति॥एनम्॥जरसे॥वहाथ॥२॥ये॥देवाः॥दिवि॥स्थ॥ये॥पृथिव्याम्॥ये॥अन्तरिक्षे॥ओ
षधीषु॥पशुषु॥अप्॰सु॥अन्तः॥ते॥कृणुत॥जरसम्॥आयुः॥अस्मै॥शतम्॥अन्यान् अ
परि॥वृणक्तु॥मृत्यून्॥३॥येषाम्॥प्र॰याजाः॥उत॥वा॥अनु॰याजाः॥हुत॰भागाः॥अहुत॰ अ
च अदः॥देवाः॥येषाम्॥वः॥पंच॥प्र॰दिशः॥वि॰भक्ताः॥तान्॥वः॥अस्मै॥सत्र॰सदः॥कृणो
मि॥४॥६॥२३॥३०॥आशानाम्॥आशा॰पालेभ्यः॥चतुः॰भ्यः॥अमृतेभ्यः॥इदम्॥भू ॥६३॥
तस्य॥अधि॰अध्यक्षेभ्यः॥विधेम॥हविषा॥वयम्॥१॥ये॥आशानाम्॥आशा॰पालाः॥

चत्वारः॥स्थन॥देवाः॥ते॥नः॥निः॰ऋत्याः॥पाशेभ्यः॥मुंचत॥अंहसः॰अंहसः॥२॥
अस्रामः॥त्वा॥हविषा॥यजामि॥अश्लोणः॥त्वा॥घृतेन॥जुहोमि॥यः॥आशानाम्॥आ
शा॰पालः॥तुरीयः॥देवः॥सः॥नः॥सु॰भूतम्॥आ॥इह॥वक्षत्॥३॥स्वस्ति॥मात्रे॥उत॥पि
त्रे॥नः॥अस्तु॥स्वस्ति॥गोभ्यः॥जगते॥पुरुषेभ्यः॥विश्वम्॥सु॰भूतम्॥सु॰विदत्रम्॥नः॥अ
स्तु॥ज्योक्॥एव॥दृशेम॥सूर्यम्॥४॥७॥३१॥इदम्॥जनासः॥विदथ॥महत्॥ब्रह्म॥व
दिष्यति॥न॥तत्॥पृथिव्याम्॥नो इति॥दिवि॥येन॥प्राणन्ति॥वीरुधः॥१॥अन्तरिक्षे॥
आसाम्॥स्थाम॥श्रान्तसदाम्॰इव॥आ॰स्थानम्॥अस्य॥भूतस्य॥विदुः॥तत्॥वेध
सः॥न॥वा॥२॥यत्॥रोदसी इति॥रेजमाने इति॥भूमिः॥च॥निः॰अतक्षतम्॥आर्द्रम्॥

तत्। अद्य। सर्वदा। समुद्रस्य॰इव। स्रात्याः॥ ३॥ विश्वम्। अन्यासु। अभि॰वारः। तत्। अ
न्यस्याम्। अधि। श्रितम्। दिवे। च। विश्व॰वेदसे। पृथिव्यै। च। अकरम्। नमः॥ ४॥ ३२॥
हिरण्य॰वर्णाः। शुचयः। पावकाः। यासु। जातः। सविता। यासु। अग्निः। याः। अग्निम्।
गर्भम्। दधिरे। सु॰वर्णाः। ताः। नः। आपः। शम्। स्योनाः। भवन्तु॥ १॥ यासाम्। राजा।
वरुणः। याति। मध्ये। सत्यानृते इति सत्य॰अनृते। अव॰पश्यन्। जनानाम्॥ २॥ या
साम्। देवाः। दिवि। कृण्वन्ति। भक्षम्। याः। अन्तरिक्षे। बहु॰धा। भवन्ति। याः। अग्निम्। ग
र्भम्। दधिरे। सु॰वर्णाः॥ ताः॥ ३॥ शिवेन। मा। चक्षुषा। पश्यत। आपः। शिवया। तन्वा। १५
उप। स्पृशत। त्वचम्। मे॥ घृत॰श्चुतः। शुचयः। याः। पावकाः। ताः। नः। आपः। शम्। स्यो

नाः। भवन्तु॥ ४॥ ३३॥ इयम्। वीरुत्। मधु॰जाता। मधुना। त्वा। खनामसि। मधोः। अधि। प्र॰
जाता। असि। सा। नः। मधु॰मतः। कृधि॥ १॥ जिह्वायाः। अग्रे। मधु। मे। जिह्वा॰मूले। मधू
लकम्। मम। इत्। अह। क्रतौ। असः। मम। चित्तम्। उप॰आयसि॥ २॥ मधु॰मत्। मे।
नि॰क्रमणम्। मधु॰मत्। मे। परा॰अयनम्॥ ३॥ वाचा। वदामि। मधु॰मत्। भूयासम्।
मधु॰संदृशः॥ ३॥ मधोः। अस्मि। मधु॰तरः। मदुघात्। मधुमत्॰तरः। माम्। इत्। किल।
त्वम्। वनाः। शाखाम्। मधुमतीम्॰इव॥ ५॥ परि। त्वा। परि॰तत्नुना। इक्षुणा। अगाम्।
मा॥ अवि॰द्विषे। यथा। कामम्। कामिनी। असः। यथा। मत्। न। अप॰गाः। असः॥ ५॥
३४॥ यत्। आ। अबध्नन्। दाक्षायणाः। हिरण्यम्। शत॰अनीकाय। सु॰मनस्य

मानाः॥ तत्। त्वा। बध्नामि। आयुषे। वर्चसे। बलाय। दीर्घायुऽत्वाय। शतऽशारदाय॥ १
न। एनम्। रक्षांसि। न। पिशाचाः। सहंते। देवानाम्। ओजः। प्रथमऽजम्। हि। एतत्। यः। बिभर्
ति। दाक्षायणम्। हिरण्यम्। सः। जीवेषु। कृणुते। दीर्घम्। आयुः॥ २॥ अपाम्। तेजः।
ज्योतिः। ओजः। बलम्। च। वनस्पतीनाम्॥ उत। वीर्याणि॥ इन्द्रःऽइव। इन्द्रियाणि। अ
धि। धारयामः॥ अस्मिन्। तत्। दक्षमाणः। बिभरत्। हिरण्यम्॥ ३॥ समानाम्। मा
साम्। ऋतुऽभिः। त्वा। वयम्। सम्ऽवत्सरस्य। पयसा। पिपर्मि। इंद्राग्नी इति। विश्वे। देवाः
ते। अनु। मन्यन्ताम्। अहृणीयमानाः॥ ४॥ ७॥ ३५॥ एकादश। चापरे परास्युः॥ ३ द्वि
पञ्चपाठकः प्रथमकाण्डं समाप्तं॥ ओं॥ वेनः। तत्। पश्यत्। परमम्। गुहा। यत्। यत्र। विश्वम्।

MEMORIAL

भवति। एकऽरूपम्। इदम्। पृश्निः। अदुहत्। जायमानाः। स्वःऽविदः। अभि। अनूषत। व्राः॥
१॥ प्र। तत्। वोचेत्। अमृतस्य। विद्वान्। गंधर्वः। धाम। परमम्। गुहा। यत्। त्रीणि। पदानि।
निऽहिता। गुहा। अस्य। यः। तानि। वेद। सः। पितुः। पिता। असत्॥ २॥ सः। नः। पिता। जनिता। सः।
उत। बंधुः॥ धामानि। वेद। भुवनानि। विश्वा। यः। देवानाम्। नामऽधाः। एकः॥ एव। तम्।
सम्ऽप्रश्नम्। भुवना। यंति। सर्वा॥ ३॥ परि। द्यावापृथिवी इति। सद्यः। आयम्। उप
अतिष्ठे। प्रथमऽजाम्। ऋतस्य। वाचम्ऽइव। वक्तरि। भुवनेऽस्थाः। धास्युः। एषः। नु
उ। एषः॥ अग्निः॥ ४॥ परि। विश्वा। भुवनानि। आयम्। ऋतस्य। तन्तुम्। विऽततम्। दृ
शेकम्॥ यत्र। देवाः। अमृतम्। आनशानाः॥ समाने। योनौ। अधि। ऐरयंत॥ ५॥

४॥छ॥१॥दिव्यः॥गंधर्वः।भुवनस्य।यः।पतिः।एकः।एव।नमस्यः।विक्षु।ईड्यः॥तम्।त्वा।
योमि।ब्रह्मणा।दिव्य।देव।नमः।ते।अस्तु।दिवि।ते।सधऽस्थम्॥१॥दिवि।स्पृ
ष्टः।यजतः॥सूर्यऽत्वक्।अवऽयाता।हरसः।दैव्यस्य॥मृडात्।गंधर्वः।भुवनस्य।यः।
पतिः।एकः।एव।नमस्यः।सुऽशेवाः॥२॥अनवद्याभिः।सम्।ऊं इति।जग्मे।आभिः।
अप्सरासु।अपि।गंधर्वः।आसीत्॥समुद्रे।आसाम्।सदनम्।मे।आहुः।यतः।
सद्यः॥आ।च।परा।च।यंति॥३॥अभ्रिये।दिद्युत्॥नक्षत्रिये।याः॥विश्वऽवसुम्।
२ वः। गंधर्वम्।सचध्वे॥ताभ्यः।वः।देवीः।नमः।इत्।कृणोमि॥४॥याः।क्लंदाः।
तमिषीचयः॥अक्षऽकामाः॥मनःऽमुहः॥ताभ्यः।गंधर्वऽपत्नीभ्यः।अप्सराभ्यः १६॥

अकरम्॥नमः॥५॥६॥२॥अदः॥यत्॥अव॰धावति॥अवत्॰कम्॥अधि
पर्वतात्॥ततः॥ते॥कृणोमि॥भेषजम्॥सु॰भेषजम्॥यथा॥असंसि॥१॥आत्॥अं
ग॥कुवित्॥अंग॥शतम्॥या॥भेषजानि॥ते॥तेषाम्॥असि॥त्वम्॥उत्॰तमम्॥
अनाःश्रावम्॥अरोग॰णम्॥२॥नीचैः॥खनंति॥असुराः॥अरुः॰स्राणम्
म्॥इदम्॥महत्॥तत्॥आ॰स्रावस्य॥भेषजम्॥तत्॥ऊं इति॥रोगम्॥अनीन
शत्॥३॥उप॰जीकाः॥उत्॥भरंति॥समुद्रात्॥अधि॥भेषजम्॥रोगम्॥अ
रीर॥ १७

१८

मत्॥४॥अरुः॰स्राणम्॥इदम्॥महत्॥पृथिव्याः॥अधि॥उत्॰भृतम्॥त
त्॥आ॰स्रावस्य॥भेषजम्॥तत्॥ऊं इति॥रोगम्॥अनीनशत्॥५॥श
म्॥नः॥भवंतु॥अपः॥ओषधयः॥शिवाः॥इंद्रस्य॥वज्रः॥अप॥हंतु॥र
क्षसः॥आरात्॥वि॰सृष्टाः॥इषवः॥पतंतु॥रक्षसाम्॥दीर्घायु॰
त्वाय॥बृहते॥रणाय॥अरिष्यन्तः॥दक्षमाणाः॥सदा॥एव॥मणि
म्॥विष्कंध॰दूषणम्॥जंगिडम्॥बिभृम॥वयम्॥१॥जंगिडः॥
जंभात्॥वि॰शरात्॥वि॰स्कंधात्॥अभि॰शोचनात्॥मणिः॥
सहस्र॰वीर्यः॥परि॥नः॥पातु॥विश्वतः॥२॥अयम्॥वि॰स्कंधम्॥
सहते॥अयम्॥बाधते॥अत्त्रिणः॥अयम्॥नः॥विश्व॰भेषजः॥जंगि

उः। प्र। स्तु। अवऽदसः॥ ३॥ दिविः। दत्तेन। मणिना। जंगिडेन। मयःऽभुवा॥
विऽस्कंधम्। सहः। रक्षांसि॥ विऽआयामे। सहामहे॥ त्रा। त्राणाः।
यामा। जंगिडः। वा॥ विऽस्कंधात्। अभि। रक्षताम्॥ अरण्यात्।
अन्यः। आऽभृतः॥ कृष्याः। अन्यः। रसेभ्यः। पा॥ कृत्याऽदूषिः। प्र
यम्। मणिः॥ अथो इति। अरातिऽदूषिः॥ अथो इति। सहस्वान्। जं
गिडः। प्र। नः। आयूंषि। तारिषत्॥ ६॥ ४॥ इन्द्र। जुषस्व। प्र। व
ह। आ। याहि। शूर। हरिऽभ्याम्। पिब। सुतस्य। मतेः। इह। मधोः।
वोः। चकानः। चारुः। मदाय॥ १॥ इन्द्र। जठरम्। नव्यः। न। पृ
णस्व। मधोः। दिवः। न। अस्य। सुतस्य। स्वः। न। उप। त्वा। मदाः॥ १९

सुऽवाचः। अगुः॥ २॥ इन्द्रः। तुराषाट्। मित्रः। वृत्रम्। यः। जघान। य
तीः। न। बिभेद। वलम्। भृगुः। न। ससहे। शत्रून्। मदे। सोमस्य।
॥ ३॥ आ। त्वा। विशन्तु। सुतासः। इन्द्र। पृणस्व। कुक्षी इति। विड्ढि।
शक्र। धिया। आ। इहि। नः। उप। ब्रह्माणि। शृणवः। इमा। नः। शृणुष
स्व। आ। इन्द्र। स्वयुक्। भिः। मत्स्व। इह। महे। रणाय॥ ४॥ इन्द्रस्य।
नु। प्र। वोचम्। वीर्याणि। यानि। चकार। प्रथमानि। वज्री॥ अहन्।
अहिम्। अनु। अपः। ततर्द। प्र। वक्षणाः। अभिनत्। पर्वता
नाम्॥ अहन्। अहिम्। पर्वते। शिश्रियाणम्। त्वष्टा। अस्मै।
वज्रम्। स्वर्यम्। ततक्ष॥ वाश्राःऽइव। धेनवः। स्यन्दमानाः।

१२ अजः । समुद्रम् । अवा । जग्मुः । आपः ॥ ३६ ॥ वृष०यमाणः । अवृणीत । सो
मम् । त्रि०कद्रुकेषु । अपिबत् । सुतस्य ॥ आ । सायकम् । मघ०वा । अद
त्त । वज्रम् । अहन् । एनम् । प्रथम०जाम् । अहीनाम् ॥ ३ ॥ ७ ॥ ५ ॥ प्रथमोनु
वाकः । स्तुत्कः २५ ऊये । ७ ॥ समाः । त्वा । अग्ने । ऋतवः । वर्द्धयन्
तु ॥ सं०वत्सराः । ऋषयः । यानि । सत्या ॥ सम् । दिव्येन । दीदिहि ।
रोचनेन ॥ विश्वाः । आ । भाहि । प्र०दिशः । चतस्रः ॥ १ ॥ सम् । इ
ध्यस्व । अग्निम् । प्र । च । वर्द्धय । इमम् । उत् । च । तिष्ठ । महते । सौभ ॥ २० ॥
गाय ॥ मा । ते । रिषन् । उप०सत्तारः । अग्ने ॥ ब्रह्माणः । ते । यशसः ।
सन्तु । मा । अन्ये ॥ २ ॥ त्वाम् । अग्ने । वृणते । ब्राह्मणाः । इमे । शिवः । अ

ग्ने । सम्०वरणे । भव । नः ॥ सपत्न०हा । अग्ने । अभिमाति०जित् । भव ॥ स्वे ।
२ गये । जागृहि । अप्र०युच्छन् ॥ ३ ॥ क्षत्रेण । अग्ने । स्वेन । सम् । रभस्व ।
मित्रेण । अग्ने । मित्र०धाः । यतस्व ॥ सजातानाम् । मध्यमे०स्थाः । राज्ञाम् ॥
अग्ने । विहव्यः । दीदिहि । इह ॥ ४ ॥ अति । निहः । अति । स्रिधः ॥ अति ।
अचित्तीः । अति । द्विषः ॥ विश्वा । हि । अग्ने । दुः०इता । तर । त्वम् ॥ अथ
अस्मभ्यम् । सह०वीरम् । रयिम् । दाः ॥ ५ ॥ ८ ॥ अना०धृष्टा । देवजा
ता । वीरुत् । शपथ०योपनी ॥ आपः । मलम् । इव । प्र । अग्ने । ईरितास
र्वान् । मत् । शपथान् । अधि ॥ १ ॥ यः । च । स०पत्नः । शपथः । जाम्याः । श
पथः । च । यः ॥ ब्रह्मा । यत् । मन्युतः । शपात् ॥ सर्वम् । तत् । नः । अधः०

पदम् ॥ २ ॥ दिवः । मूलम् । अव॰ततम् ॥ पृथिव्याः । अधि । उत्॰ततम् । ते
न । सहस्र॰काण्डेन ॥ परि । नः । पाहि । विश्वतः ॥ ३ ॥ परि । माम् । परि । मे ।
प्र॰जाम् ॥ परि । नः । पाहि । यत् । धनम् ॥ अरातिः । नः । मा । तारीत् । मा ।
नः । तारिषुः । अभि॰मातयः ॥ ४ ॥ शप्तारम् । एतु । शपथः । यः । सु॰हा
र्त् । तेन । नः । सह ॥ चक्षुः॰मन्त्रस्य । दुः॰हार्दः ॥ पृष्टीः । अपि । शृणीम
सि ॥ ५ ॥ ७ ॥ उत् । अगाताम् । भगवती इति भगवती ॥ वि॰चृतौ ।
नाम । तारके इति ॥ वि । क्षेत्रियस्य । मुञ्चताम् ॥ अधमम् । पाशम् ॥ उ ॥ २१
त्॰तमम् ॥ १ ॥ अप । इयम् । रात्री । उच्छतु ॥ अप । उच्छन्तु । अ
भि॰कृत्वरीः ॥ वीरुत् । क्षेत्रिय॰नाशनी ॥ अप । क्षेत्रियम् ।

[illegible] ॥ २ ॥ बभ्रोः । अर्जुन॰काण्डस्य । यवस्य । ते । पलाल्या ॥ तिलस्य । तिल॰पि
ञ्ज्या ॥ ३ ॥ नमः । ते । लाङ्गलेभ्यः । नमः । ईषा॰युगेभ्यः । वीरुत् । क्षेत्रिय॰नाशनी
॥ ४ ॥ नमः । सनिस्रस॰अक्षेभ्यः ॥ नमः । सम्॰देश्येभ्यः ॥ नमः । क्षेत्रस्य ॥ पतये ॥
वीरुत् । क्षेत्रिय॰नाशनी ॥ अप । क्षेत्रियम् । उच्छतु ॥ ५ ॥ ८ ॥ दश॰वृ
क्ष । मुञ्च । इमम् । रक्षसः । ग्राह्याः ॥ अधि । या । एनम् । जग्राह । पर्व॰सु ॥
अथो इति । एनम् । वनस्पते । जीवानाम् । लोकम् । उत् । नय ॥ १ ॥ आ । अ
गात् । उत् । अगात् । अयम् । जीवानाम् । व्रातम् । अपि । अगात् ॥ अभू
त् । ऊँ इति । पुत्राणाम् । पिता । नृणाम् । च । भगवत्॰तमः ॥ २ ॥ अधि॰
इतीः । अधि । अगात् । अयम् ॥ अधि । जीव॰पुराः । अगन् । शतम् ।

दा। अस्य। भिषजः। सहस्रं। उत। वीरुधः॥ ३॥ देवाः। ते। चितिम्। अवि-
दन्। ब्रह्माणः। उत। वीरुधः। चितिम्। ते। विश्वेदेवाः। अविदन्। भूम्यां-
म्। अधि॥ ४॥ यः। चकार। सः। निः। करत्। सः। एव। सुभिषक्ऽतमः। सः।
एव। तुभ्यं। भेषजानि। कृणवत्। भिषजा। शुचिः। ५। १॥ क्षे-
त्रियात्। त्वा। निःऽऋत्याः। जामिऽशंसात्। द्रुहः। मुंचामि। व-
रुणस्य। पाशात्। अनागसं। ब्रह्मणा। त्वा। कृणोमि। शि-
वे इति। ते। द्यावापृथिवी इति। उभे इति। स्ताम्॥ १॥ शं। ते। अ-
ग्निः। सह। अत्ऽभिः। अस्तु। शं। सोमः। सह। ओषधीभिः॥
एव। अहं। त्वां। क्षेत्रियात्। निःऽऋत्याः॥ २॥ शं। ते। वातः।

॥श्री॥

मा२

अन्तरिक्षे। वयः। वातः। शं। ते। भवन्तु। प्रऽदिशः। चतस्रः॥ ३॥ इमाः। याः। दे-
वीः। प्रऽदिशः। चतस्रः। वातऽपत्नीः। अभि। सूर्यः। विऽचष्टे। ताभ्यः। त्वा-
अमृतः। जरसा। आ। दधामि। प्र। यक्ष्मः। एतु। निःऽऋतिः। पराचैः॥
४॥ अमुक्थाः। यक्ष्मात्। दुःऽइतात्। अवद्यात्। द्रुहः। पाशात्। ग्राह्याः। च।
उत्। अमुक्थाः॥ ५॥ अहाः। अरातिं। अविदः। स्योनं। अपि।
अभूः। भद्रे। सुऽकृतस्य। लोके॥ ६॥ सूर्यं। ऋतं। तमसः। ग्रा-
ह्याः। अधि। देवाः। मुंचन्तः। असृजन्। निः। एनसः। एव। अहं। त्वां। क्षे-
त्रियात्। निःऽऋत्याः। जामिऽशंसात्। द्रुहः। मुंचामि। वरुणस्य।
पाशात्। अनागसं। ब्रह्मणा। त्वा। कृणोमि। शिवे इति। ते। द्यावापृ-

पिवीऽइतिऽतनेऽइति । त्वाम् ॥ ५ ॥ ७ ॥ १० ॥ द्वितीयोऽनुवाकः ॥ अनुवाके सूक्तो
म ॥ द्विषः । दूषिः । असि । हत्याः । हृतिः । असि । मन्याः । मतिः । रसि । अमे
जुहि । अयसम । अतिसमम् । ऋामो । अस्तु । त्यौः । क्याः । असि । प्रतिः । असि
अनिचरण्याः । असि ॥ २ ॥ प्रतितम् । असि । चरायैऽअस्मान् । द्वि
ष्टि । यम् । वयम् । द्विष्मः ॥ ३ ॥ सूरिः । असि । वर्चः । धाः । असि । तनूः
पानः । असि ॥ ४ ॥ शुक्रः । असि । भ्राजः । असि । ज्योतिः । असि
आप्नुहि । अयासम । अतिसमम् । ऋामः ॥ ५ ॥ ७ ॥ ११ ॥ द्यावापृथि ॥ २३ ॥
वीऽइतिऽतरू । अन्तरिदाम् । ऋतस्य । पत्नीऽइतरू० गायः । अप्कु
वः ॥ तत । अन्तरिदौम् । तरू । वात० गापम् ॥ त ॥ इह । तप्यताम् । इम

येऽअवपामानेऽइति ॥ ६ ॥ इदम् । देवाः । शृणुत । ये । यज्ञियाः । स्थ । नरः
आजगम ये । तत्कानि । शंसति । पाशः । सः । बद्धः । दुः० कृतानि । युज्य
ताम् । यः । अस्माकम् । मनः । इदम् । हिनस्ति ॥ २ ॥ इदम् । इन्द्र । शृणुहि ।
सोम० पाय । नात । ब्रह्म । हृदा । रावता । जोहवीमि । वृश्च । मित
मा । उग्रिन् । शान० इव । वृक्षम् । यः । अस्माकम् । मनः । हिदम् ।
हिनस्ति ॥ ३ ॥ ऋषिरीतिः ० तिस्रः ० साम० गा० आदित्य ५
नि । वसु० नः । अङ्गिरः ० इष्टापूर्तम् । अवतु । नः । पितृणा
म् । आ । अमुम् । दद । हरसा । दैव्येन ॥ ४ ॥ द्यावापृथिवीऽइति
अनु । मा । आ । दीधीयाम् । विश्वे । देवासः । अनु । मा । आ ॥ २

नद्यम्। अंगिरसः। पितरः। सोम्यासः। पापम्। आ। ऋच्छतु।
अप॰कामस्य। कर्ता ॥५॥ अति॰इव। अयः। मरुतः। मन्यते।
नः। ब्रह्म। वा। यः। निन्दिषत्। क्रियमाणम्। तपूंषि। तस्मै। वृ
जिनानि। सन्तु। ब्रह्म॰द्विषम्। द्यौः। अभि॰संतपाति ॥६॥
सप्त। प्राणान्। अष्टौ। मन्यः। तान्। ते। वृश्चामि। ब्रह्मणा। अ
याः। यमस्य। सादनम्। अग्नि॰दूतः। अरम्॰कृतः। २४
॥७॥ आ। दधामि। ते। पदं। सम्॰इद्धे। जातवेदसि। अ
ग्निः। शरीरम्। वा। विशतु। आ। असुम्। वाक्। अपि। गच्छ
तु ॥८॥२॥ आयुः॰दाः। अग्ने। जरसम्। वृणानः।

घृत॰प्रतीकः। घृत॰पृष्ठः। अग्ने। घृतम्। पीत्वा। मधु। चारु। गव्यम्।
पिता॰इव। पुत्रान्। अभि। रक्षतात्। इमम् ॥१॥ परि। धत्त। धत्त।
नः। वर्चसा। इमम्। जरा॰मृत्युम्। कृणुत। दीर्घम्। आयुः। बृहस्प
तिः। प्र। अयच्छत्। वासः। एतत्। सोमाय। राज्ञे। परि॰धातवै। उं
इति ॥२॥ परि। इदम्। वासः। अधिथाः। स्वस्तये। अभूः। गृष्टीना
म्। अभिशस्ति॰पाः। उं इति। शतं। च। जीव। शरदः। पुरूचीः।
रायः। च। पोषम्। उप॰संव्ययस्व ॥३॥ आ। इहि। अश्मानम्। आ।
तिष्ठ। अश्मा। भवतु। ते। तनूः। कृण्वन्तु। विश्वे। देवाः। आयुः।
ते। शरदः। शतम् ॥४॥ यस्य। ते। वासः। प्रथम॰वास्यम्।

ह सम:। तुभ्य्वा वा॥ विश्वे। अ॒प। वृङ्ग्र। देवा॥ तां। वा॥ न्ता तर:। सु॰
हेध्या॥ वर्द्धमा न म्। अन्तु। जायताम्। बहवः। सु॰ जातम्॥ पाश्चा॥
॥२३॥ नि॰। सु। साम्। हृदुम्। धिषणाम्। ए॰ कुर्या
वाधाम्। जि घु॰ स्वृम्। सर्वा:। च। स्पानस्य:। नारीयाम:। मा
दानं न्व्यमा १॥ नि:। वृ:। गा॰ स्था तु। अप। जामसि। नि:। अ दा
रा। नि:। नृप॰ आ। बनुसात्॥ नि:। वः। गृघ्या। दुहितर:। गृहे भ्य: मु ४
चातयामहे॥ २॥ आसा। यः। अधरात्। गृह्णीत त्वा। सं॰। आ
राय्य। तत्वा। सेदि:। निऋत्या। सर्वा:। वाया तं॰ धान्य:॥ ३॥ २५
ऽरतं॰ पतिः। ति:। अपजुवा इन्द्र:। वहतः। सदान्वा। इन्द्रस्य

ॐ२

कुध्नो। आसीना:। ता:। इन्द्रः। वज्रेण। अधि। तिष्ठतु॥ ४॥ यदि। स्था। द्व
त्रियाणाम्। यदि। वा। पुरुष॰ इषिता:। यदि। स्था। दस्युभ्य:। जाता:।
नश्यता। इतः। सदान्वा:॥ ५॥ परि। धामानि। आसाम्। आशु:। गो
ष्ठाम्॰ इव। असरन्॥ अजैषम्। सर्वान्। आजीन्। व:। नश्यत।
इतः। सदान्वा:॥ ६॥ यथा॥ द्यौ:। च। पृथिवी। च। न। बिभीत:। न। रिष्यत:।
एव। मे। प्राण। मा। बिभे:॥ यथा। अह:। च। रात्री। च॥ २॥ यथा। सूर्य:। च।
चन्द्र:। च॥ ३॥ यथा। ब्रह्म। च। क्षत्रं। च॥ ४॥ यथा। सत्यं। च। अनृतम्।
च॥ ५॥ यथा। भूतं। च। भव्यं। च। न। बिभीत:। न। रिष्यत:॥ एव। मे। प्रा
ण। मा। बिभे:॥ ६॥ ७॥ १५॥ प्राणापानौ। मृत्यो:। मा। पातम्। स्वाहा॥ १॥

द्यावापृथिवी इति द्यावा॰पृथिवी । उप॰श्रुत्या । मा । पातम् । स्वाहा ॥२॥ सूर्य । चक्षुषा । मा । पा
हि । स्वाहा ॥३॥ अग्ने । वैश्वानर । विश्वैः । मा । देवैः । पाहि । स्वाहा ॥४॥
विश्वम्॰भर । विश्वेन । मा । भरसा । पाहि । स्वाहा ॥५॥१६॥ ओजः ।
असि । ओजः । मे । दाः । स्वाहा ॥१॥ सहः । असि । सहः । मे ॥२॥ बलम् । अ
सि । बलम् । मे ॥३॥ आयुः । असि । आयुः । मे ॥४॥ श्रोत्रम् । असि । श्रोत्रम् । मे ॥५॥
चक्षुः । असि । चक्षुः । मे ॥६॥ परि॰पानम् । असि । परि॰पानम् । मे ॥७॥
॥ द्वितीयोनुवाकः । अनुवाके सूक्तः ॥७॥ ऋचा ३५ ॥७॥०।१७॥ भ्रातृव्य
क्षयणम् । असि । भ्रातृव्य॰चातनम् । मे ॥१॥ सपत्न॰क्षयणम् । असि । ॥२८॥
सपत्न॰चातनम् । मे ॥२॥ अराय॰क्षयणम् । असि । अराय॰चातनम्
क्षय

मे ॥३॥ पिशाच॰क्षयणम् । असि । पिशाच॰चातनम् । मे ॥४॥ सदान्वा॰क्षयणम् । असि ।
सदान्वा॰चातनम् । मे । दाः । स्वाहा ॥५॥०।१८॥ अग्ने । यत् । ते । तपः । तेन । त
म् । प्रति । तप । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥१॥ ते । हरः । तेन ।
तम् । प्रति । हर । यः ॥२॥ ते । अर्चिः । तेन । तम् ॥ प्रति । अर्च । यः ॥३॥ ते । शोचिः ।
तेन । तम् । प्रति । शोच । यः ॥४॥ अग्ने । यत् । ते । तेजः । तेन । तम् । अतेजसम् ।
कृणु । यः ॥५॥०।१९॥ वायो इति । यत् । ते । तपः । तेन । तम् । प्रति । तप । यः ॥१॥
तेष इति तिस्रः ॥४॥ वायो इति । यत् । ते । तेजः । तेन । तम् । अतेज
सम् । कृणु । यः ॥५॥०।२०॥ सूर्य । यत् । ते । तपः । तेन । तम् । प्रति । तप ।
यः ॥१॥ तेष इति तिस्रः ॥४॥ सूर्य । यत् । ते । तेजः । तेन । तम् । अ
अतेजसम् । कृणु । यः ॥५॥०॥२१॥ चन्द्र । यत् । ते । तपः । तेन । तम् । प्रति ।

तपय:॥१॥ तेइरद्रुतितिस्त्र॥४॥ चंद्र। यत्। ते। तेजः। तेन। तम्। अतेजसम्।
कृणु। य:॥५॥७॥२२॥ आपः। यत्। वः। तपः। तेन। तम्। प्रति। तपात। य
वः। हरः। तेन। तम्। प्रति। हरत। यः॥२॥ वः। अर्चिः। तेन। तम्। प्रति। अ
र्चतय:॥३॥ वः। शोचिः। तेन। तम्। प्रति। शोचत। यः॥४॥ आपः। यत्।
वः। तेजः। तेन। तम्। अतेजसम्। कृणुत। यः। अस्मान्। द्वेष्टि। यम्।
वयं। द्विष्मः॥५॥७॥२३॥ शेरभक। शेरभ। पुनः। वः। यंतु। यातवः।
पुनः। हेतिः। किमीदिनः॥ यस्य। स्थ। तम्। अत्त। यः। वः। प्र०अहैत्।
तम्। अत्त। स्वा। मांसानि। अत्त॥१॥ शेवृधक। शेवृध। पुनः॥ म्रोक। अनु
म्रोक। पुनः॥३॥ सर्प। अनु०सर्प। पुनः। वः। यंतु। यातवः। पुनः।

हेतिः। किमीदिनः॥४॥ जूर्णि। पुनः। वः। यंतु। यातवः। पुनः। हेतिः। किमी
दिनः॥५॥ उप०अब्दे। पुनः॥६॥ अर्जुनि। पुनः॥७॥ भरूजि। पुनः। वः। यंतु॥
यातवः। पुनः। हेतिः। किमीदिनः॥ यस्य। स्थ। तम्। अत्त। यः। वः। प्र०अ
हैत्। तम्। अत्त। स्वा। मांसानि। अत्त॥८॥७॥२४॥ शम्। नः। देवी। पृश्नि०प
र्णी। अशम्। निःऽऋत्यै। अकः। उग्रा। हि। कण्व०जंभनी। ताम्। अभक्षि। सह
स्वतीम्॥१॥ सहमाना। इयम्। प्रथमा। पृश्नि०पर्णी। अजायत। तया।
अहम्। दुः०नाम्नाम्। शिरः। वृश्चामि। शकुनेः०इव॥२॥ अरायम्।
असृक्०पावानम्। यः। च। स्फातिम्। जिहीर्षति। गर्भ०अदम्। कण्वम्।
नाशय। पृश्नि०पर्णी। सहस्व। च॥३॥ गिरिम्। एनान्। आ। वे
शय। कण्वान्। जीवित०योपनान्। तान्। त्वम्। देवि। पृश्नि०पर्णी। अ

ग्निः० कृत्वा। अनु० दहन्। इह॥४॥ पशवः। एनान्। प्र। अनु। दाः। एनान्। जी
वितं० यापनान्॥ तमसि। यत्र। आगच्छति। तत्। त्र्यं० अवदा। अजीगमन्॥
॥५॥ ॥२५॥ आ। इह। यन्तु। पशवः। ये। परा० इयुः॥ वायुः। येषाम्।
सह० चारम्। जुजोष॥ त्वष्टा। येषाम्। रूप० धेयानि॥ वेद। अस्मिन्।
तान्। गो० स्थे। सविता। नि। यच्छतु॥१॥ इमम्। गो० स्थम्। पशवः। सम्।
स्रवन्तु॥ बृहस्पतिः। आ। नयतु। प्र० जानन्॥ सिनीवाली। नयतु।
आ। अग्रम्। एषाम्॥ आ० जग्मुषः। अनु० मते। नि। यच्छ॥२॥ सं।
सम्। सम्। स्रवन्तु। पशवः॥ सम्। अश्वाः। सम्। ऊं इति। पुरुषाः॥ स २८
म्। धान्यस्य। या। स्फातिः॥ सम्० स्राव्येण। हविषा। जुहोमि॥३॥ सं
सम्। सिंचामि। गवाम्। क्षीरम्॥ सम्। आज्येन। बलम्। रसम्॥

सम्० सिक्ताः। अस्माकम्। वीराः॥ ध्रुवाः। गावः। मयि। गो० पतौ॥४॥ आ।
हरामि। गवाम्। क्षीरम्॥ आ। अहार्षम्। धान्यम्। रसम्॥ आ० हृताः। अस्मा
कम्। वीराः॥ आ। पत्नीः। इदम्। अस्तकम्॥५॥ चतुर्थोऽनुवाकः॥ अनुवा
कस्सूक्ता॥२६॥ ऋचा॥२०॥ द्वा॥०॥ २६॥ न। इत्। शत्रुः। प्राशम्। जयाति॥ स
हमाना। अभि० भूः। असि॥ प्राशम्। प्रति० प्राशः। जहि॥ अरसान्।
कृणु। ओषधे॥१॥ सु० पर्णः। त्वा। अनु। अविन्दत्॥ सूकरः। त्वा। अख
नत्। नसा॥२॥ इन्द्रः। ह। चक्रे। त्वा। बाहौ॥ असुरेभ्यः। स्तरीतवे॥३॥
पाटाम्। इन्द्रः। वि। आश्नात्॥ असुरेभ्यः। स्तरीतवे॥४॥ तया। अ
हम्। शत्रून्। साक्षे। इन्द्रः। सालावृकान्० इव॥५॥ रुद्र। जलाष० भे
षज। नील० शिखण्ड। कर्म० कृत्॥ प्राशम्। प्रति० प्राशः। जहि॥ अर

सान्। कृणुतु। पंचधा॥ ६॥ तस्य। प्राशम्। त्वम्। जहि। यः। नः। इंद्र। अभि॰
दासति। अधि। नः। ब्रूहि। शक्तिऽभिः। प्राशि। माम्। उत्ऽतरम्। कृधि॥ ७॥ ७॥
॥ २७॥ तुभ्यम्। एव। जरिमन्। वर्द्धताम्। अयम्। मा। इमम्। अन्ये। मृत्यवः।
हिंसिषुः। शतम्। ये। माताऽइव। पुत्रम्। प्रऽमनाः। उपऽस्थे। मित्रः। एनम्।
मित्रियात्। पातु। अंहसः॥ १॥ मित्रः। एनम्। वरुणः। वा। रिशादाः। जरा॰
मृत्युम्। कृणुताम्। संविदानौ। तत्। अग्निः। होता। वयुनानि। वि॰
द्वान्। विश्वा। देवानाम्। जनिम। वि। वक्ति॥ २॥ त्वम्। ईशिषे। पशून् ॥ २९॥
ाम्। पार्थिवानाम्। ये। जाताः। उत। वा। ये। जनित्राः। मा। इमम्। प्राणः। हा॰
सीत्। मो इति। अपानः। मा। इमम्। मित्राः। वधिषुः। मो इति। अमित्राः।

॥ ३॥ द्यौः। त्वा। पिता। पृथिवी। माता। जराऽमृत्युम्। कृणुताम्। संविदाने इति
संऽविदाने। यथा। जीवाः। अदितेः। उपऽस्थे। प्राणापानाभ्याम्। गुपि॰
तः। शतम्। हिमाः॥ ४॥ इमम्। अग्ने। आयुषे। वर्चसे। नय। प्रियम्। रेतः। वरु॰
ण। मित्र। राजन्। माताऽइव। अस्मै। अदिते। शर्म। यच्छ। विश्वे। देवाः।
जरत्ऽअष्टिः। यथा। असत्॥ ५॥ ४॥ २८॥ पार्थिवस्य। रसे। देवाः। भग॰
स्य। तन्वः। बले। आयुष्यम्। अस्मै। अग्निः। सूर्यः। वर्चः। आ। धात्।
बृहस्पतिः॥ १॥ आयुः। अस्मै। धेहि। जातऽवेदः। प्रऽजाम्। त्वष्टः। अधि॰
निऽधेहि। अस्मै। रायः। पोषम्। सवितः। आ। सुव। अस्मै। शतम्। जी॰
वाति। शरदः। तव। अयम्॥ २॥ आऽशीः। नः। ऊर्जम्। उत। सौप्रजाः॰
त्वम्। दक्षम्। धत्तम्। द्रविणम्। सऽचेतसौ। जयम्। क्षेत्राणि। सहसा।

अयम् । इन्द्रः ॥ लएवानः । अनु आँ(नो) अध स्तात् । सत्य नाम ॥ ३ ॥ इन्द्रेण । दत्तः । वरु
णेन । त्रिष्टः । मरुत्-भिः । उग्रः । प्र-हितः । नः । आ । आगन् ॥ वाम् । आ वा
पृथिवी इति । उपस्थे । मा । क्षुधत् । मा । त्रिषत् ॥ ४ ॥ ऊर्जम् । अस्मै । ऊर्ज
स्वती इति । धत्तम् ॥ पयः । अस्मै । पयस्वती इति । धत्तम् ॥ ऊर्जम् । अस्मै ।
द्यावापृथिवी इति । अधाताम् । विश्वे । देवाः । मरुतः । ऊर्जम् । आपः ।
॥ ५ ॥ शिवाभिः । ते । हृदयम् । तर्पयामि । अनमीवः । मोदिषीष्ठाः । सु
वर्चाः ॥ स-वासिनौ । पिबताम् । मन्थम् । एतम् । अश्विनोः । रूपम् । परिधाय
मायाम् ॥ ६ ॥ इन्द्रः । एताम् । ससृजे । विद्धः । अग्रे । ऊर्जाम् । स्वधाम् । अ ॥३०॥
जराम् । सा । ते । एषा ॥ तया । त्वम् । जीव । शरदः । सु-वर्चाः । मा । ते । आ । सु
स्रोत् । भिषजः । ते । अक्रन् ॥ ७ ॥ ०२९ ॥ यथा । इदम् । नम्यतः । अधि

तृणम्। वातः। मथायति। एव। मथ्नामि। ते। मनः। यथा। माम्। कामिनी। अ
सः। यथा। मत्। न। अपगाः। असः॥१॥ सम्। च। इत्। नयाथः। अश्विना। का
मिना। सम्। च। वक्षथः। सम्। वाम्। भगासः। अग्मत। सम्। चित्तानि। सम्
ऊं इति। व्रता॥२॥ यत्। सुपर्णाः। विवक्षवः। अनमीवाः। अनमीवाः
विवक्षवः। तत्र। मे। गच्छतात्। हवम्। शल्यःऽइव। कुल्मलम्। यथा
॥३॥ यत्। अन्तरम्। तत्। बाह्यम्। यत्। बाह्यम्। तत्। अन्तरम्। कन्यानाम्।
विश्वऽरूपाणाम्। मनः। गृभाय। ओषधे॥४॥ आ। इयम्। अगन्।
पतिऽकामा। जनिऽकामः। अहम्। आ। अगमम्। अश्वः। कनिक्रदत्। यथा। भगेन। ३१
अहम्। सह। आ। अगमम्॥५॥७॥३०॥ इन्द्रस्य। या। मही। दृषत्। क्रिमेः।
विश्वस्य। तर्हणी। तया। पिनष्मि। सम्। क्रिमीन्। दृषदा। खल्वान्ऽइव॥१॥

शिवः ३

दृष्टम्। अदृष्टम्। अतृहम्। अथो इति। कुरूरुम्। अतृहम्। अल्गण्डून्।
सर्वान्। शलुनान्। क्रिमीन्। वचसा। जम्भयामसि॥२॥ अल्गण्डून्।
हन्मि। महता। वधेन। दूनाः। अदूनाः। अरसाः। अभूवन्। शिष्टान्। अशि
ष्टान्। नि। तिरामि। वाचा। यथा। क्रिमीणाम्। नकिः। उत्ऽशिषातै॥३॥ अ
नुऽआन्त्र्यम्। शीर्षण्यम्। अथो इति। पार्ष्टेयम्। क्रिमीन्। अवस्क
वम्। विऽअध्वरम्। क्रिमीन्। वचसा। जम्भयामसि॥४॥ ये। क्रिमयः। पर्व
तेषु। वनेषु। ओषधीषु। पशुषु। अप्ऽसु। अन्तरिति। ये। अस्माकम्। त
न्वम्। आऽविविशुः। सर्वम्। तत्। हन्मि। जनिम। क्रिमीणाम्॥५॥ अ
नुक्रान्तरूपाश्चाष्टौ॥॥पा ७। ३१॥ उत्ऽयन्। आदित्यः। क्रिमीन्। हन्तु॥

त्रि

नि॰ग्नो। वज्र। दि॒त्रा। र॒श्मि॰ग्नि॥ यो। अ॒ंतः। त्रि॒मयः। ग॒वि॥१॥ विश्वं॰ रू
प॒म्। वृ॒त्र॒ः॰ अ॒र्द॒ौ। त्रि॒ मिमृ। सा॒रंगम्। अ॒र्जु॒न॒म्॥ श्र॒णा॒मि। अ॒स्य॒।
पृ॒ष्ठीः॥ अ॒पि॒ दृ॒श्चा॒मि। यत्॥ शिरः॥२॥ अ॒त्रि॰वत्। वः॥ त्रि॒मयः। ह॒न्मि॥ क
ण्वऽवत्। जमदग्नि॰वत्॥ अ॒गस्त्यस्य। ब्रह्म॒णा॥ सम्। पिनष्मि। अ॒हम्। [illegible]
म्। इ॒हमीन्॥३॥ ह॒ताः। रा॒जा॒। त्रि॒मीणाम्॥ उ॒त। ए॒षाम्। स्थ॒पतिः। ह॒तः। [illegible]
ह॒त॰माता॥ त्रि॒मि॥ ह॒त॰भ्राता। ह॒त॰स्वसा॥४॥ ह॒ता॒सः। [illegible] अ॒स्य। वे॒शसः।
ह॒ता॒सः। परि॑ऽवेशसः॥ अथो॒ इति॑। ये। क्षु॒ल्ल॒काःऽइव। सर्वे॑। ते। त्रि॒मयः। ह॒ताः॥
५॥ प्र। ते॒। श्र॒णा॒मि॥ शृंगे॒ इति॑। या॒भ्याम्। वि॒तु॒दा॒यसि॑॥ भि॒नद्मि॑। ते॒। २२
कुषुम्भम्। यः। ते॒। वि॒ष॰धानः॥६॥७॥३२॥ अ॒क्षीभ्याम्। ते॒। नासि॑

।यो।२

का॒भ्याम्॥ कर्णा॑भ्याम्। छुबु॑का॒त्। अधि॥ यक्ष्मम्। शी॒र्ष॒ण्य॑म्। म॒स्तिष्का॑त्॥ जि॒ह्वा
या॒ः। वि। वृ॒ह॒मि। ते॒॥१॥ ग्री॒वाभ्यः। ते॒। उ॒ष्णिहा॑भ्यः॥ की॒कसा॑भ्यः। अ॒नू॒
क्या॑त्॥ यक्ष्म॑म्। दो॒ष॒ण्य॑म्। अंसा॑भ्याम्॥ बा॒हु॰भ्याम्। वि। वृ॒ह॒मि। ते॒
॥२॥ हृद॑यात्। ते॒। परि॑। क्लो॒म्नः। ह॒ली॑क्ष्णात्। पा॒र्श्वाभ्या॑म्॥ यक्ष्म॑म्। मत॑
स्नाभ्याम्। प्ली॒ह्नः। य॒क्नः॥ ते॒। वि। वृ॒हा॒मसि॥३॥ आ॒न्त्रेभ्यः। ते॒। गुदा॑भ्यः॥
व॒नि॒ष्ठोः। उ॒दरा॑त्। अधि॥ यक्ष्म॑म्। कु॒क्षि॰भ्याम्। प्ला॒शेः। नाभ्याः॥ वि।
वृ॒ह॒मि। ते॒॥४॥ ऊ॒रु॰भ्याम्। ते॒। अ॒ष्ठी॒वत्॰भ्याम्॥ पार्ष्णि॑भ्याम्। प्र॒प॑दाभ्याम्॥
यक्ष्म॑म्। भ॒स॒द्य॑म्। श्रोणि॑॰भ्याम्॥ भा॒सद॑म्। भंस॑सः। वि॥५॥ अ॒
स्थि॰भ्यः। ते॒। म॒ज्ज॰भ्यः॥ स्नाव॑॰भ्यः। ध॒मनि॑॰भ्यः॥ यक्ष्म॑म्। पा॒णि॰भ्या
म्। अ॒ंगुलि॑॰भ्यः॥ न॒खेभ्यः। वि। वृ॒ह॒मि। ते॒॥६॥ अंगे॑॰अंगे। लो

ग्नि॰सोम्नि। यः। ते। पर्वाणि॰पर्वाणि। यद्दोमम्। चचस्यम्। तत्। वयम्। क
स्यपस्य। विं॰वर्हणा। विषंचम्। वि। हरामसि॥ ७॥ ७॥ ३३॥ यः। ईशे। प
शु॰पतिः। पशूनाम्। चतुः॰पदाम्। उत। यः। द्वि॰पदाम्। निः॰क्रीतः। सः।
यज्ञियम्। भागम्। एतु। रायः। पोषाः। यजमानम्। सचंताम्॥ १॥ प्र॰
मुचंतः। भुवनस्य। रेतः। गातुम्। धत्त। यजमानाय। देवाः। उप॰आ
कृतम्। शशमानम्। यत्। अस्थात्। प्रियम्। देवानाम्। अपि। एतु।
पाथः॥ २॥ ये। बध्यमानम्। अनु। दीध्यानाः। अनु॰ऐक्षंत। मनसा। ३३
चक्षुषा। च। अग्निः। तान्। अग्रे। प्र। मुमोक्तु। देवः। विश्व॰कर्मा।
प्र॰जया। सम्॰रराणः॥ ३॥ ये। ग्राम्याः। पशवः। विश्व॰रूपाः। सं वि॰रूपाः
तः। बहु॰धा। एक॰रूपाः। वायुः। तान्। अग्रे। प्र। मुमोक्तु। देवः॥

प्रजा॰पतिः। प्र॰जया। सम्॰रराणः॥ ४॥ प्र॰जानंतः। प्रति। गृह्णंतु। पूर्वे। प्राणम्।
अंगेभ्यः। परि। आ॰चरंतम्। दिवम्। गच्छ। प्रति। तिष्ठ। शरीरैः। स्वः॰
गम्। याहि। पथि॰भिः। देव॰यानैः॥ ५॥ ३४॥ प्र। नद्धयंताः। नावस्र
नि। आनद्धुः। यान्। अग्नयः। अनु॰अतप्यंत। धिष्ण्याः। याः। तेषाम्।
अव॰याः। दुः॰इष्टि। सु॰इष्टम्। नः। तान्। कृणोतु। विश्व॰कर्मा॥ ६॥ य
रु॰पतिः। ऋषयः। एनसा। आक्रुः। निः॰भजंतं। प्र॰जाः। अनु॰तप्य
मानम्। मधव्यान्। स्तोकान्। अप। यान्। रराध। सम्। नः। ते
भिः। सृजतु। विश्व॰कर्मा॥ ७॥ अदान्यान्। सोम॰पान्। मन्यमानः।
यज्ञस्य। विद्वान्। सम्॰ये। न। धीरः। यत्। एनः। चकृ॰वान्। बद्धः। एषः।

तम्।विश्व॰कर्मन्।प्र।मुंच।स्वस्तये॥३॥घोराः।ऋषयः।नमः।अ
स्तु।एभ्यः॥चक्षुः।यत्।एषाम्।मनसः।च।सत्यम्।बृहस्पतये।
महिष।द्यु॰मत्।नमः॥विश्व॰कर्मन्।नमः।ते।पाहि।अस्मान्॥४॥
यज्ञस्य।चक्षुः।प्र॰भृतिः।मुखम्।च।वाचा।श्रोत्रेण।मनसा।जुहो
मि।इमम्।यज्ञम्।वि॰ततम्।विश्व॰कर्मणा।आ।देवाः।यंतु।
सु॰मनस्यमानाः॥५॥०॥३५॥आ।नः।अग्ने।सु॰मतिम्।सम्॰भलः।
त गमेत्।इमाम्।कुमारीम्।सह।नः।भगेन।जुष्टा।वरेषु।सम॰नेषु। ३४
वल्गुः।ओषम्।पत्या॥सौ॰भगम्।अस्तु।अस्यै॥सोम॰जुष्टम्।
ब्रह्म॰जुष्टम्।अर्यम्णा।सम्॰भृतम्।भगम्।धातुः।देवस्य।

देवस्य।सत्येन॥कृणोमि।पति॰वेदनम्॥२॥इयम्।अग्ने।नारी।पतिम्॥विदेष्ट॥
सोमः।हि।राजा।सु॰भगाम्।कृणोति।सुवाना।पुत्रान्।महिषी।भवाति।गत्वा।
पतिम्।सु॰भगा।वि।राजतु॥३॥यथा।आ॰खरः।मघ॰वन्।चारुः।एषः।प्रियः।
मृगाणाम्।सु॰सदाः।बभूव॥एव।भगस्य।जुष्टा।इयम्।अस्तु।नारी॥सम्॰प्रिया।
पत्या।अवि॰राधयन्ती॥४॥भगस्य।नावम्।आ।रोह।पूर्णाम्।अनुप॰दस्वतीम्।
तया।उप॰प्र॰तारय।यः।वरः।प्रति॰काम्यः॥५॥आ।क्रन्दय।धन॰पते।वरम्।
आ॰मनसम्।कृणु॥सर्वम्।प्र॰दक्षिणम्।कृणु।यः।वरः।प्रति॰काम्यः॥६॥इदम्।हि
रण्यम्।गुल्गुलु।अयम्।औक्षः।अथो इति।भगः॥एते।पति॰भ्यः।त्वाम्।

ऋडः। प्रति० कामायवित्तवे॥७॥ आति। नयन्तु। सविता। नयन्तु। पतिः। यं
प्रति० काम्यः। त्वम्। अस्यै। धेहि। उषधे॥ अनुवाके सूक्त ५ सचा २१॥ छा
त्रिंशादेकाधिकोन्यः॥३६॥ चतुर्थप्रपाठकः॥ द्वितीयकांड समाप्तम्॥ श्री
॥ ॥ ॥ ॥श्रीरस्तु॥ श्री ॥कल्याणमस्तु॥ ॥

५०० ग्रंथसंख्य

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

श्लो. २५५०

॥ कांड ३ पा. ते. कांड ४-५-६-७- नास्तुधी छा।

२४५० ग्रंथसंख्य

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

ॐ अग्निः । नः । शत्रून् । प्रति । एतु । विद्वान् । प्रतिऽदहन् । अभिऽशस्तिं । अरा
तिं ॥ सः । सेनां । मोहयतु । परेषां ॥ निःऽहस्तान् । च । कृणवत् । जातऽवेदाः
॥१॥ यूयं । उग्राः । मरुतः । ईदृशे । स्थ ॥ अभि । प्र । इत । मृणत । सहध्वं ॥ अ
अमे मीमृणन् । वसवः । नाथिताः । इमे ॥ अग्निः । हि । एषां । दूतः । प्रतिऽएति । विद्वान् ॥२॥
अमित्रऽसेनां । मघऽवन् ॥ अस्मान् । शत्रुऽयतीं ॥ अभि ॥ युवं । तान् । इंद्र । वृ १८
त्रऽहन् ॥ अग्निः । च । दहतं । प्रति ॥३॥ प्रऽसूतः । इंद्र । प्रऽवता । हरिऽभ्यां ॥ प्र
ते । वज्रः । प्रऽमृणन् । एतु । शत्रून् ॥ जहि । प्रतीचः । अनूचः । पराचः ॥ वि ३६॥

ष्वक् । सत्यं । कृणुहि । चित्तं । एषां ॥४॥ इंद्र । सेनां । मोहय । अमित्राणां ॥ अग्नेः । वा
तस्य । ध्राज्या ॥ तान् । विषूचः । वि । नाशय ॥५॥ इंद्रः । सेनां । मोहयतु ॥ मरुतः । घ्न
न्तु । ओजसा ॥ चक्षूंषि । अग्निः । आ । दत्तां ॥ पुनः । एतु । पराऽजिता ॥६॥ ॥१॥ अ
ग्निः । नः । दूतः । प्रतिऽएतु । विद्वान् ॥ प्रतिऽदहन् । अभिऽशस्तिं । अरातिं ॥ सः ।
चित्तानि । मोहयतु । परेषां ॥ निःऽहस्तान् । च । कृणवत् । जातऽवेदाः ॥१॥ अयं । अ
ग्निः । अमूमुहत् । यानि । चित्तानि । वः । हृदि ॥ वि । वः । धमतु । ओकसः ॥ प्र । वः । धमतु ।
सर्वतः ॥२॥ इंद्र । चित्तानि । मोहयन् ॥ अर्वाङ् । आऽकूत्या । चर ॥ अग्नेः । वातस्य ॥

धमज्या। तान्। विष्वचः। वि। नाशय॥३॥ वि। आ॰कूतयः। एषां। इत। अथो इति॥
चित्तानि। मुह्यत॥ अथो इति। यत्। अद्य। एषां। हृदि। तत्। एषां। परि। निः।
जहि॥४॥ अमीषां। चित्तानि। प्रति॰मोहयंती॥ गृहाण। अंगानि। अप्वे। परा।
इहि॥ अभि। प्र। इहि। निः। दह। हृत्॰सु॥ शोकैः। ग्राह्या। अमित्रान्। तमसा।
विध्य। शत्रून्॥५॥ असौ। या॥ सेना। मरुतः। परेषां॥ अस्मान्। आ॰एति। अभि।
ओजसा। स्पर्धमाना॥ तां। विध्यत। तमसा। अप॰व्रतेन। यथा। एषां। अन्यः। २८
अन्यं। न। जानात्॥६॥ ॥२॥ अचिक्रदत्। स्व॰पाः। इह। भुवत्॥ अग्ने। वि। ३७

चस्व। रोदसी इति। उरूची इति॥ युंजंतु। त्वा। मरुतः। विश्व॰वेदसः। आ। अमुं।
नय। नमसा। रात॰हव्यं॥ दूरे। चित्। संतं। अरुषासः। इंद्रं। आ। च्यवयंतु॥
सख्याय। विप्रं॥ यत्। गायत्रीं। बृहतीं। अर्कं। अस्मै॥ सौत्रामण्या। दधृषंत॥ दे
वाः॥१॥ अत्॰भ्यः। त्वा। राजा। वरुणः। ह्वयतु॥ सोमः। त्वा। ह्वयतु। पर्वतभ्यः॥ इं
द्रः। त्वा। ह्वयतु। विट्॰भ्यः। आभ्यः॥ श्येनः। भूत्वा। विशः। आ। पत।३ इमाः। श्ये
नः। हव्यं। नयतु। आ। परस्मात्॥ अन्य॰क्षेत्रे। अप॰रुद्धं। चरंतं॥ अश्विना। पंथां॥
कृणुतां। सु॰गं। ते॥ इमं। स॰जाताः। अभि॰संविशध्वं॥४॥ ह्वयंतु। त्वा। प्रति॰

जनाः॥ प्रति।मित्राः। अवृषत॥ इंद्राग्नी इति। विश्वे। देवाः॥ ते। विशि। क्षेमं। अ
दीधरन्॥ पा यः। ते। हवं। विऽवदत्॥ सऽजातः। यः। च। निष्ट्यः॥ अपांचं। इंद्र।
तं। कृत्वा॥ अथ। इमं। इह। अव। गमय॥ ३॥ ७॥ १॥ ॥ आ। त्वा। गन्। राष्ट्रं। सह।
वर्चसा॥ उत्। इहि॥ प्राङ्। विशां। पतिः। एकऽराट्। त्वं। वि। राज॥ सर्वाः। त्वा॥
राजन्। प्रऽदिशः। ह्वयंतु॥ उपऽसद्यः। नमस्यः। भव। इह॥ १॥ त्वां। विशः। वृ
णतां। राज्याय। त्वां। इमाः। प्रऽदिशः। पंच। देवीः॥ वर्ष्मन्। राष्ट्रस्य। ककुदि। २५
श्रयस्व॥ ततः। नः। उग्रः। वि। भज। वसूनि॥ २॥ अछ। त्वा। यंतु। हविनः। सऽजा ३८

ताः॥ अग्निः। दूतः। अजिरः। सं। चराति॥ जायाः। पुत्राः। सुऽमनसः। भवंतु॥ बहुं।
बलिं। प्रति। पश्यासै। उग्रः॥ ३॥ अश्विना। त्वा। अग्रे। मित्रावरुणा॥ उभा। विश्वे।
देवाः। मरुतः। त्वा। ह्वयंतु॥ अध। मनः। वसुऽदेयाय। कृणुष्व॥ ततः। नः। उग्रः। वि।
भज। वसूनि॥ ४॥ आ। प्र। द्रव। परमस्याः। पराऽवतः॥ शिवे इति। ते। द्यावापृथिवी
इति। उभे इति। स्तां॥ तत्। अयं। राजा। वरुणः। तथा। आह॥ सः। त्वा। अयं। अह्वत्।
सः। उप। इदं। आ। इहि॥ ५॥ इंद्रऽइंद्र। मनुष्याः। परा। इहि॥ सं। हि। अज्ञास्थाः। वरुणैः।
संऽविदानः॥ सः। त्वा। अयं। अह्वत्। [illegible]। सधऽस्थे॥ सः। देवान्। यक्षत्। सः। ऊं इ

ति।कल्पयाति।विशः।द्वाप्रथ्याः।रेवतीः।बहुं०धा।विं०रूपाः॥सर्वाः।सं०गत्य।
वरीयः।ते।अक्रन्॥ताः।त्वा।सर्वाः।सं०विदानाः।ह्वयंतु॥दशमीम्।उग्रः।सुं०
मनाः।वशा।इह॥७॥७॥४॥॥आ। अयं।अगन्।पर्ण०मणिः।बली।बलेन।
प्रं०मृणन्।सं०पत्नान्॥ओजः।देवानां।पयः।ओषधीनां॥वर्चसा।मा।जिन्वतु।अ
प्रं०यावन्॥१॥ओजः॥दैवीम्।अपि।क्षत्रं।पर्ण०मणे॥मयि।धारयता।तारयिं।अहं
राष्ट्रस्य।अभिं०वर्गे॥निं०जः।भूयासं।उत्तं०तमः॥२॥यं।निं०दधुः।वनस्पतौ।गु २२
ह्यं।देवाः।प्रियं।मणिं॥तं।अस्मभ्यं।सह।आयुषा।देवाः।ददतु।भर्तवे॥३॥सोम ४॥

स्य।उपं०स्तीन्।पर्ण।मह्यम्।त्वम्।सर्वान्।कृणु।अभितः।जनान्।पर्णः।३॥द्या।
स्य।पर्णः।सह।उग्रं।आ।अगन्।इंद्रेण।दत्तः।वरुणेन।शिष्टः॥तं।प्रियासं।बहु
रु।रोचमानः।दीर्घायुं०त्वाय।शत०शारदाय॥४॥आ।मा।रुक्षत्।पर्ण०मणिः॥ प
मह्यै।अरिष्ट०तातये॥यथा।अहं।उत्तरः।असानि॥अर्यम्णः।उत।सं०विदः।
।पा।ये।धीवानः।रथ०काराः।कर्मारः।ये।मनीषिणः॥उपं०स्तीन्।पर्ण।मह्यं।त्वं॥
सर्वान्।कृणु।अभितः।जनान्॥६॥ये।राजानः।राजं०कृतः।सूताः।ग्राम०ण्यः।च।ये।
सि।तनूं०पानः।सं०योनिः।वीरः।वीरेण।मया।सं०वत्सरस्य।तेजसा॥तेन।बध्ना
मि।त्वा।मणे॥७॥७॥४॥प्रथमोनुवाकः॥॥अनुवाके सूक्तं।पंचर्च २३ त्रिंशन्निमि

त्राः। षड्वेभ्रुकायीस्तिस्रः॥ पुमान्। पुंसः। परिऽजातः॥ अश्वत्थः। खदिरात्। अधि॥
सः। हंतु। शत्रून्। मामकान्॥ यान्। अहं। द्वेष्मि। ये। च। मां॥१॥ तान्। अश्वत्थ। निः।
शृणीहि॥ शत्रून्। वैबाधऽदोधतः॥ इंद्रेण। वृत्रऽघ्ना॥ मेदी॥ मित्रेण। वरुणेन।
च॥२॥ यथा॥ अश्वत्थ। निःऽअभनः॥ अंतः। महति। अर्णवे॥ एव। तान्। सर्वान्। निः।
भंग्धि॥ यान्। अहं। द्वेष्मि। ये। च। मां॥३॥ यः। सहमानः। चरसि॥ ससहानःऽइव। ऋ सर॥
षभः॥ तेन। अश्वत्थ। त्वया। वयं॥ सऽपत्नान्। सहिषीमहि॥४॥ सिनातु। एनान्। निःऽ ८०
ऋतिः॥ मृत्योः। पाशैः। अमोक्यैः॥ अश्वत्थ। शत्रून्। मामकान्॥ यान्। अहं। द्वेष्मि॥ ५॥

५

यो। च। मां॥५॥ यथा। अश्वत्थ। वानस्पत्यान्। आऽरोहन्। कृणुषे। अधरान्॥ एव। मे। श
त्रोः। मूर्धानं॥ विष्वक्। भिंधि। सहस्व। च। दाते। अधरांचः। प्र। प्लवंतां॥ छिन्ना। नौः
ऽइव। बंधनात्॥ न। वैबाधऽप्रनुत्तानां॥ पुनः। अस्ति। निऽवर्तनं॥ ७॥ प्र। एनान्।
नुदे। मनसा॥ प्र। चित्तेन। उत। ब्रह्मणा॥ प्र। एनान्। वृक्षस्य। शाखया॥ अश्वत्थ
स्य। नुदामहे॥ ८॥ ६॥ हरिणस्य। रघुऽस्यदः॥ अधि। शीर्षणि। भेषजं॥ सः।
क्षेत्रियं। विऽषाणया॥ विषूचीनं। अनीनशत्॥ १॥ अनु। त्वा। हरिणः। वृषा॥ पत्ऽ
भिः। चतुःऽभिः। अक्रमीत्॥ विऽषाणे। वि। स्य। गुष्पितं॥ यत्। अस्य। क्षेत्रियं। हृदि।

।म। अदंयसत्। अव॰रोचते॥ वत्तष्पद्मम्॰इव। छद्दिः॥ तेन। ते। सर्वं। क्षेत्रियं। अं
गेभ्यः। नाशयामसि॥३॥ अम्न इति। ये इति। द्दिवि। स्तृतगे इति स्तु॰तगे॥ वि॰
चृतौ। नाम। तारके इति॥ वि। क्षेत्रियस्य। मुंचतां॥ अधमं। पाशं। उत॰तमं।
।ध। आपः। इत्। वा। ऊं इति। भेषजीः॥ आपः। अमीव॰चातनीः॥ आपः। विश्व
स्य। भेषजीः॥ आपः। अमीवचातनीः। चा। मुंचंतु। क्षेत्रियात्॥ पायत। आ॰स्तुतेः ६१
क्रियमाणायाः॥ क्षेत्रियं। चा। वि॰आनशे॥ वेद। अहं। तस्य। भेषजं॥ क्षेत्रियं।
नाशयामि। चत्॥ द्दा। अप॰वासे। नक्षत्राणां॥ अप॰वासे। उषसां। उत॥ अप ६॥

अस्मत्। सर्वं। दुः॰भूतं। अप। क्षेत्रियं॥ उ॥ ७॥ ७॥ ॥ आ। यातु। मित्रः।
ऋतु॰भिः। कल्पमानः॥ सं॰वेशयन्। पृथिवीं। उस्रियाभिः॥ अथ। अस्मभ्यं।
वरुणः। वायुः। अग्निः॥ बृहत्। राष्ट्रं। सं॰वेश्यं। दधातु॥ १। धाता। रातिः। सविता।
इदं। जुषंतां॥ इंद्रः। त्वष्टा। प्रति। हर्यंतु। मे। वचः॥ हुवे। देवीं। अदितिं। शूर॰
पुत्रां॥ स॰जातानां। मध्यमे॰स्थाः। यथा। असानि॥ राष्ट्रं॰भृत्। सोमं। सवितारं। नमः॰
भिः॥ विश्वान्। आदित्यान्। अहं। उत्तर॰त्वे॥ अयं। अग्निः। दीदयत्। दीर्घं। एव।
स॰जातैः। इद्धः। अप्रतिब्रुवत्॰भिः॥ ३। इह। इत्। असाथ। न। परः। गमाथ॥ इर्यः।

DR. BHAU DAJI
ME...

गोपाः। वृष्टऽपतिः। वः। आ। अजत॥ अस्मै। कामाय। ... उप। कामिनीः॥ वि
श्वे। वः। देवाः। उपऽसंयन्तु॥४॥ सम्। वः। मनांसि। सम्। व्रता। सम्। आऽकूतीः। नमाम
सि॥ अमी इति। ये। विऽव्रताः। स्थन। तान्। वः। सम्। नमयामसि॥१॥ अहम्। गृभ्णा
मि। मनसा। मनांसि। मम। अनुऽचित्तम्। अभि। आ। इत॥ मम। वशेषु। हृद
यानि। वः। कृणोमि। मम। यातम्। अनुऽवर्त्मानः। आ। इत॥३॥ ३॥ ८॥ कशफ
स्य। विऽशफस्य। द्यौः। पिता। पृथिवी। माता। यथा। अभिऽचक्र। देवाः। तथा। अ
प। कृणुत। पुनः॥१॥ अश्रेष्माणः। अधारयन्। तथा। तत्। मनुना। कृतम्। कृणोमि।

वध्रि। विऽस्कन्धम्॥ मुष्कऽआबर्हः। गवाम्ऽइव॥२॥ पिशङ्गे। सूत्रे। खृगलम्। तत्। आ।
बध्नन्ति। वेधसः॥ श्रवस्युम्। शुष्मम्। काबवम्। वध्रिम्। कृण्वन्तु। बन्धुरः॥३॥ येन। श्रव
स्यवः। चरथ। देवाःऽइव। असुरऽमायया॥ शुनाम्। कपिःऽइव। दूषणः। बन्धुरा।
काबवस्य। च॥४॥ दुष्ट्यै। हि। त्वा। भन्त्स्यामि। दूषयिष्यामि। काबवम्॥ उत्। आर
थःऽरथाःऽइव। शपथेभिः। सरिष्यथ॥५॥ एकऽशतम्। विऽस्कन्धानि। विऽस्थिता।
पृथिवीम्। अनु॥ तेषाम्। त्वाम्। अग्रे। उत्। जहरुः। मणिम्। विस्कन्धऽदूषणम्॥६॥ ३॥ ७॥
॥ प्रथमा। ह। वि। उवास। सा। धेनुः। अभवत्। यमे॥ सा। नः। पयस्वती। दुहाम्॥

उत्तराम्॰उत्तरां।समां॥१॥यां।दे॒वाः।प्रति॰नंदंति॥रात्रिं।धेनुं।उप॰
आयतीं॥सं॰वत्सरस्य।या।पत्नी॥सा।नः।अस्तु।सु॰मंगली॥२॥सं॰वत्सर
स्य।प्रति॰मां॥यां।त्वा।रात्रिं।उप॰आस्महे॥सा।नः।आयुष्मतीं।प्र॰जां॥रायः।
पोषेण।सं।सृज॥३॥इयं।एव।सा।या।प्रथमा॥वि॰औच्छत॥आसु।इतरासु॥
चरति।प्र॰विष्टा॥महांतः।अस्यां।महिमानः।अंतः॥वधूः।जिगाय।नव॰गत्।
जनित्री॥४॥वानस्पत्याः।ग्रावाणः।घोषं।अक्रत॥हविः।कृण्वंतः।परि॰वत्सरी ३
णं॥एकं॰अष्टके।सु॰प्रजसः।सु॰वीराः॥वयं।स्याम।पतयः।रयीणां॥५॥इडा ८

याः।पदं।घृतवत्।सरीसृपं॥जात॰वेदः।प्रति।हव्या।गृभाय॥ये।ग्राम्याः।प
शवः।विश्व॰रूपाः॥तेषां।सप्तानां।मयि।रंतिः।अस्तु॥६॥आ।मा।पुष्टे।च।पोषे।
च॥रात्रि।देवानां।सु॰मतौ।स्याम॥पूर्णा।दर्वि।परा।पत॥सु॰पूर्णा।पुनः।आ।
पत॥७॥सर्वान्।यज्ञान्।सं॰भुंजती॥इषं।ऊर्जं।नः।आ।भर॥८॥आ।अयं।अगन्।
सं॰वत्सरः॥पतिः।एक॰अष्टके।तव॥सा।नः।आयुष्मतीं।प्र॰जां॥रायः।पो
षेण।सं।सृज॥९॥ऋतून्।यजे।ऋतु॰पतीन्॥आर्तवान्।उत।हायनान्॥समाः।
सं॰वत्सरान्।मासान्॥भूतस्य।पतये।यजे॥१०॥ऋतु॰भ्यः।त्वा।आर्तवेभ्यः।

मात्॰स्यः। संवत्सरे स्यः॥ अत्रे। वि॰अत्रे। सं॰ज्ञभे॥ तस्याः। पत्न्ये। यजे
॥१०॥ इडया। जुह्वतः। वयं। देवान्। घृत॰वता। यजे॥ गृहान्। अलुभ्यतः। व
यं॥ सं। विशेम। उप॰गो॰मतः॥ ११॥ एक॰अष्टका। तपसा। तप्यमाना॥ जजा
न। गर्भं। महिमानं। इंद्रं॥ तेन। देवाः। वि। असहंत। शत्रून्॥ हंता। दस्यूनां।
अभवत्। शची॰पतिः॥ १२॥ इंद्र॰पुत्रे। सोम॰पुत्रे॥ दुहिता। असि। प्रजा॰प
तेः॥ कामान्। अस्माकं। पूरय॥ प्रति। गृह्णाहि। नः। हविः॥ १३॥ ७॥ २०॥ द्वितीयो ४४
नुवाकः॥ अनुवाकस्तापा। ऋचा॰दश॥ ॥ मुंचामि। त्वा। हविषा। जीवनाय। कं। ८।

अज्ञात॰यक्ष्मात्। उत। राज॰यक्ष्मात्॥ ग्राहिः। जग्राह। यदि। एतत्। एनं॥ तस्याः।
इंद्राग्नी इति। प्र। मुमुक्तं। एनं॥ १॥ यदि। क्षित॰आयुः। यदि। वा। परा॰इतः॥ य
दि। मृत्योः। अंतिकं। निः॰ऋतः। एव। तं। आ। हरामि। निः॰ऋतेः। उप॰स्थात्॥ अ
स्पार्शं। एनं। शत॰शारदाय॥ २॥ सहस्र॰अक्षेण। शत॰वीर्येण॥ शत॰आयु
षा। हविषा। आ। अहार्षं। एनं॥ इंद्रः। यथा। एनं। शरदः। न। अति। नयाति॥ अति। विश्वस्य।
दुः॰इतस्य। पारं॥ ३॥ शतं। जीव। शरदः। वर्धमानः॥ शतं। हेमंतान्। शतं। उ
इति। वसंतान्॥ शतं। ते। इंद्रः। अग्निः। सविता। बृहस्पतिः॥ शत॰आयुषा। ह

अ१

विषाः अश्रा । हार्षं । एनं ॥४॥ प्र । विशतं । प्राणापानौ ॥ अनड्वाहौ॰इव । व्रजं ॥ वि । अ-
न्ये । यंतु । मृत्यवः ॥ यान् । आहुः । इतरान् । शतं ॥५॥ इह । एव । स्तं । प्राणापानौ ॥
मा । अप । गातं । इतः । युवं ॥ शरीरं । अस्य । अंगानि ॥ जरसे । वहतं । पुनः ॥६॥
जरायै । त्वा । परि । ददामि ॥ जरायै । नि । धुवामि । त्वा ॥ जरा । त्वा । भद्रा । नेष्ट ॥ वि । अन्ये ।
यंतु । मृत्यवः ॥ यान् । आहुः । इतरान् । शतं ॥७॥ अभि । त्वा । जरिमा । अहित । गां । उ-
क्षणं॰इव । रज्ज्वा ॥ यः । त्वा । मृत्युः । अभि॰अधत्त ॥ जायमानं । सु॰पाशया ॥ ४५
तं । ते । सत्यस्य । हस्ताभ्यां ॥ उत् । अमुंचत् । बृहस्पतिः ॥८॥३॥११॥ ॥ इह । एव । १०

ध्रुवां । नि । मिनोमि । शालां ॥ क्षेमे । तिष्ठाति । घृतं । उक्षमाणा ॥ तां । त्वा । शाले । स-
र्व॰वीराः । सु॰वीराः ॥ अरिष्ट॰वीराः । उप । सं । चरेम ॥१॥ इह । एव । ध्रुवा । प्रति ।
तिष्ठ । शाले ॥ अश्व॰वती । गो॰मती । सूनृता॰वती ॥ ऊर्जस्वती । घृत॰वती । प-
यस्वती ॥ उत् । श्रयस्व । महते । सौभगाय ॥२॥ धरुणी । असि । शाले ॥ बृहत्॰छं-
दाः । पूति॰धान्या ॥ आ । त्वा । वत्सः । गमेत् । आ । कुमारः ॥ आ । धेनवः । सायं । आ॰स्पं-
दमानाः ॥३॥ इमां । शालां । सविता । वायुः । इंद्रः ॥ बृहस्पतिः । नि । मिनोतु ॥ ध ॥
मानस्य । पत्नि । शरणा । स्योना ॥ देवी । देवेभिः । नि॰मिता । असि । अग्रे ॥ तृणं ।
प्र॰जानन् । उक्षंतु । उद्ना । मरुतः । घृतेन ॥ भगः । नः । राजा । नि । कृषिं । तनोतु । २

वसाना। सु॰मनाः। असतः। त्वं॥ अप। असमन्। सह॰वीरं। रयिं। दाः॥ ५॥ ऋतेन।
स्थूणां॥ अधि। रोह। वंश॥ उग्रः। वि॰राजन्। अप। वृंक्ष्व। शत्रून्॥ मा। ते। रिषन्।
उप॰सत्तारः। गृहाणां॥ शाले॥ शतं। जीवम। शरदः। सर्व॰वीराः॥ ६॥ आ। इ मां। कु ऊ
मारः। तरुणः॥ आ। वत्सः। जगता। सह॥ आ। इमां। परि॰स्रुतः। कुंभः॥ आ। द
ध्नः। कलशैः। अगुः॥ ७॥ पूर्णं। नारि। प्र। भर। कुंभं। एतं॥ घृतस्य। धारां। अ
मृतेन। सं॰भृतां॥ इमां। पातॄन्। अमृतेन। सं। अंग्धि॥ इष्टापूर्तं। अभि। रक्षा
ति। एनां॥ ८॥ इमाः। आपः। प्र। भरामि॥ अयक्ष्माः। यक्ष्म॰नाशनीः॥ गृहान्। ११

उप। प्र। सीदामि॥ अमृतेन। सह॥ अग्निना॥ ९॥ ३॥ १२॥ ॥ यत्। अदः। सं॰प्रय
तीः॥ अहौ। अनदत। हते॥ तस्मात्। आ। नद्यः। नाम। स्थ॥ ताः। वः। नामानि॥ सिंध
वः॥ १॥ यत्। प्र॰इषिताः। वरुणेन॥ आत्। शीभं। सं॰अवल्गत॥ तत्। आप्नोत्।
इंद्रः। वः। यतीः॥ तस्मात्। आपः। अनु। स्थन॥ २॥ अप॰कामं। स्यंदमानाः॥ अवी
२।२ वरत। वः। हि। कं॥ इंद्रः। वः। शक्ति॰भिः। देवीः॥ तस्मात्। वाः। नाम। वः। हितं॥ ३॥ एकः।
वः। देवः। अपि। अतिष्ठत्॥ स्यंदमानाः। यथा॰वशं॥ उत्। आनिषुः। महीः। इति
तस्मात्। उदकं। उच्यते॥ ४॥ आपः। भद्राः। घृतं। इत्। आपः। आसन्। अग्नी

DR. BHAU DAJI MEMORIAL

पोमैः॥ बिभ्रतिः। आ। पनं। इत्। ताः॥ तीव्रः। रसं। मधु॰पृचां। अरं॰गमः॥ आ।
मा। प्राणेन। सह। वर्चसा। गमेत्॥ पा। आ। तां। इत्। पश्यामि। उत। वा। स्पृणोमि॥
आ। मा। घोषः। गच्छतु। वाक्। मा। आसां॥ अन्याः। ते। ज्ञानं॥ अमृतस्या। तर्हि॥ हिर
एय॰वर्णाः। अहृपं। यदा। वः॥ द्वा। इदं। वः। आर्थं। हृदयं॥ अयं। वत्सः। ऋत॰
वरीः॥ ४ इह। इत्थं। आ। इत। शक्वरीः॥ यत्र। इदं। वेशयामि। वः॥ द्वा। ७॥ १३॥ ॥ सं
वः। गो॰स्थेन। सु॰सदा। सं। रय्या। सं। सुं॰भूत्या॥ अहः॰जातस्य। यत्। नाम। ते ४१
ना। वः। सं। सृजामसि॥ १ सं। वः। सृजतु। अर्यमा। सं। पूषा। सं। बृहस्पतिः॥ सं। १२

इंद्रः। यः। धनं॰जयः॥ मयि। पुष्यत। यत्। वसु॥ २। सं॰जग्मानाः। अबिभ्युषीः॥ अ
स्मिन्। गो॰स्थे। करीषिणीः॥ बिभ्रतीः। सोम्यं। मधु॥ अनमीवाः॥ उप॰एत
न॥ ३ इह। एव। गाः। वः। आ। इतन॥ इह। उ। इति। शकाः॰इव। पुष्यत॥ इह। एव। उत।
प्र। जायध्वं॥ मयि। सं॰ज्ञानं। अस्तु। वः॥ ४ शिवः। वः। गो॰स्थः। भवतु॥ शारि। शा
का॰इव। पुष्यत॥ इह। एव। उत। प्र। जायध्वं॥ मया। वः। सं। सृजामसि॥ ५ मया।
गावः। गो॰पतिना। सचध्वं॥ अयं। वः। गो॰स्थः। इह। पोषयिष्णुः॥ रायः। पोषेण।
बहुला। भवंतीः॥ जीवाः। जीवंतीः॥ उप। वः। सदेम॥ द्वा। ७॥ १४॥ ॥ इंद्रः। अहं। वणि

जों।चोदयामि॥सः।नः।आ।एतु।पुरः०एता।नः।अस्तु॥नुदन्।अरातिं।परि०
पंथिनं।मृगं॥सः।ईशानः।धन०दाः।अस्तु।मह्यं॥१॥ये।पंथानः।बहवः।
देव०यानाः॥अंतरा।द्यावापृथिवी इति।सं०चरंति॥ते।मा।जुषंतां।पय
सा।घृतेन॥यथा।क्रीत्वा।धनं।आ०हराणि॥२॥इध्मेन।अग्ने।इच्छमानः।घृते
न।जुहोमि।हव्यं।तरसे।बलाय॥यावत्।ईशे।ब्रह्मणा।वंदमानः॥इ ४८
मां।धियं।शत०सेयाय।देवीं॥३॥इमां।अग्ने।शरणिं।मीमृषः।नः॥यं।अ
ध्वानं।अगाम।दूरं॥शुनं।नः।अस्तु।प्र०पणः।विक्रयः।च॥प्रति०पणः। १३

धनेर धर

फलिनं।मा।कृणोतु।इदं।हव्यं।सं०विदानौ।जुषेथां॥शुनं।नः।अस्तु।चरितं।
उत्थितं।च॥४॥येन।धनेन।प्र०पणं।चरामि॥धनेन।देवाः।धनं।इच्छमानः॥तत्।मे।
भूयः।भवतु।मा।कनीयः॥अग्ने।सातघ्नः।देवान्।हविषा।नि।सेध॥५॥ये
न।धनेन।प्र०पणं।चरामि।धनेन।देवाः।धनं।इच्छमानः॥तस्मिन्।मे।इंद्रः।
रुचिं।आ।दधातु॥प्रजा०पतिः।सविता।सोमः।अग्निः॥६॥उप।त्वा।नमसा।वयं॥
होतः।वैश्वानर।स्तुमः॥सः।नः।प्रजासु।आत्मसु।गोषु।प्राणेषु।जागृहि॥७॥
विश्वाहा।ते।सदं।इत्।भरेम।अश्वाय०इव।तिष्ठते।जात०वेदः॥रायः।पो

षिस्राः। सा। इषा। मदंतः॥ मा। तु। अग्ने। प्रतिऽवेशाः। रिषाम॥८॥१५॥७॥ पंचमः
प्रपाठकः॥ तृतीयोऽनुवाकः॥ ॥ अनुवाके सूक्त ५। ऋचा ३८। अष्टौ॥ ॐ प्रातः।
अग्निं। प्रातः। इंद्रं। हवामहे॥ प्रातः। मित्रावरुणा। प्रातः। अश्विना॥ प्रातः। भगं।
पूषणं। ब्रह्मणः। पतिं। प्रातः। सोमं। उत। रुद्रं। हुवामहे॥१॥ प्रातःऽजितं। भगं।
उग्रं। हुवामहे। वयं। पुत्रं। अदितेः। यः। विऽधर्ता॥ आध्रः। चित्। यं। मन्यमा
नः। तुरः। चित्। राजा। चित्। यं। भगं। भक्षि। इति। आह॥२॥ भग। प्रऽनेतः। भग। सत्य
राधः॥ भग। इमां। धियं। उत्। अव। ददत्। नः॥ भग। प्र। नः। जनय। गोभिः १५

१४

अश्वैः। भग। प्र। नृऽभिः। नृऽवंतः। स्याम॥३॥ उत। इदानीं। भगऽवंतः। स्याम। उत।
प्रऽपित्वे। उत। मध्ये। अह्नां॥ उत। उत्ऽइतौ। मघऽवन्। सूर्यस्य॥ वयं। देवानां।
सुऽमतौ। स्याम॥४॥ भग। एव। भगऽवान्। अस्तु। देवाः॥ तेन। वयं। भगऽवं
तः। स्याम॥ तं। त्वा। भग। सर्वः। इत्। जोहवीमि॥ सः। नः। भग। पुरःऽएता। भव।
इह॥५॥ सं। अध्वराय। उषसः। नमंत। दधिक्रावाऽइव। शुचये। पदाय॥ अर्वाचीनं।
वसुऽविदं। भगं। नः। रथंऽइव। अश्वाः। वाजिनः। आ। वहंतु॥६॥ अश्वऽवतीः। गोऽ
मतीः। नः। उषसः। वीरऽवतीः। सदं। उच्छंतु। भद्राः॥ घृतं। दुहानाः। विश्वतः। प्रऽ

पीताः॥ यूयं। पात। स्वस्तिऽभिः। सदा। नः॥ ७॥ छ॥ २६॥ ॥ सीरा। युंजंति। कवयः।
युगा। वि। तन्वते। पृथक्॥ धीराः। देवेषु। सुम्नऽया॥ १॥ युनक्त। सीराः। वि। युगा। त
नोत॥ कृते। योनौ। वपत। इह। बीजम्॥ विराजः। श्नुष्टिः। सऽभराः। असत्। नः।
नेदीयः। इत्। सृण्यः। पक्वं। आ। अयवन्॥ २॥ लांगलं। पवीरऽवत्॥ सुऽशेवं। सोम
सत्ऽसरु॥ उत्। इत्। वपतु। गां। अविं। प्रस्थाऽवत्। रथऽवाहनं॥ पीबरीं। च। प्र
फर्व्यं॥ ३॥ इंद्रः। सीतां। नि। गृह्णातु। तां। पूषा। अभि। रक्षतु॥ सा। नः। पयस्व ५०
ती। दुहां॥ उत्तराम्ऽउत्तरां। समां॥ शुनं। सुऽफालाः। वि। तुदंतु। भूमिं॥ १५

शुनं। कीनाशाः। अभि। यंतु। वाहान्॥ शुनासीरा। हविषा। तोशमाना॥ सुऽपिप्पलाः।
ओषधीः। कर्त्त। अस्मै॥ ५॥ शुनं। वाहाः। शुनं। नरः। शुनं। कृषतु। लांगलं॥ शुनं। वर
त्राः। बध्यंतां॥ शुनं। अष्ट्रां। उत्। इंगय॥ ६॥ शुनासीरा। इह। स्म। मे। जुषेथां॥ यत्।
दिवि। चक्रथुः। पयः॥ तेन। इमां। उप। सिंचतम्॥ ७॥ सीते। वंदामहे। त्वा। अर्वा
ची। सुऽभगे। भव॥ यथा। नः। सुऽमनाः। असः। यथा। नः। सुऽफला। भुवः॥ ८॥ घृतेन।
सीता। मधुना। संऽअक्ता॥ विश्वैः। देवैः। अनुऽमता। मरुत्ऽभिः॥ सा। नः। सीते।
पयसा। अभिऽआववृत्स्व॥ ऊर्जस्वती। घृतऽवत्। पिन्वमाना॥ ९॥ छ॥ २७॥ इमां।

खनामि। ओषधिं॥ वीरुधां। बलवत्ऽतमां॥ ययां। सऽपत्नीं। बाधते॥ ययां। संऽवि
दते। पतिं॥१॥ उत्तानऽपर्णे। सुऽभगे॥ देवऽजूते। सहस्वति॥ सऽपत्नीं। मे।
परां। नुद॥ पतिं। मे। केवलं। कुरु॥२॥ नहि। ते। नाम। जग्राह। नो इति। अस्मिन्।
रमसे। पतौ। परां। एव। परावतं। सऽपत्नीं। गमयामसि॥३॥ उत्ऽतरा। अहं।
उत्ऽतरे॥ उत्ऽतरा। इत्। उत्ऽतराभ्यः॥ अधः। सऽपत्नी। या। मम। अधरा। सा।
अधराभ्यः॥४॥ अहं। अस्मि। सहमाना॥ अथो इति। त्वं। असि। ससहिः॥ उभे इ २१
ति। सहस्वती इति। भूत्वा॥ सऽपत्नीं। मे। सहावहै॥५॥ अभि। ते। अधां। सहमानां॥ १६

उप। अधां। सहीयसीं॥ मां। अनु। प्र। ते। मनः॥ वत्सं। गौःऽइव। धावतु। पथा।
वाःऽइव। धावतु॥६॥ ॥१८॥ ॥ संऽशितं। मे। इदं। ब्रह्म। संऽशितं। वीर्यं। ब
लं॥ संऽशितं। क्षत्रं। अजरं। अस्तु। जिष्णुः॥ येषां। अस्मि। पुरःऽहितः॥१॥ सं। अहं।
एषां। राष्ट्रं। स्यामि॥ सं। ओजः। वीर्यं। बलं॥ वृश्चामि। शत्रूणां। बाहून्। अनेन। ह
२।३ विषा। अहं॥२॥ नीचैः। पद्यन्तां। अधरे। भवन्तु॥ ये। नः। सूरिं। मघऽवानं। पृतन्यान्।
क्षिणामि। ब्रह्मणा। अमित्रान्। उत्। नयामि। स्वान्। अहं॥३॥ तीक्ष्णीयांसः। पर
शोः॥ अग्नेः। तीक्ष्णऽतराः। उत॥ इंद्रस्य। वज्रात्। तीक्ष्णीयांसः॥ येषां। अस्मि। पु

रः॰शितः॥६॥ एषां। अहं। आयुधा। सं। स्यामि॥ एषां। राष्ट्रं। सु॰वीरं। वर्द्धयामि॥ ए
षां। क्षत्रं। अजरं। अस्तु। जिष्णु॥ एषां। चित्तं। विश्वे। अवंतु। देवाः॥५॥ उत्। हृष्यं
तां। मघ॰वन्। वाजिनानि॥ उत्। वीराणां। जयतां। एतु। घोषः॥ पृथक्। घोषाः॥
उलुलयः॥ केतु॰मंतः॥ उत्। ईरतां॥ देवाः। इंद्र॰ज्येष्ठाः॥ मरुतः। यंतु। सेन
या॥६॥ प्र। इत। जयत। नरः॥ उग्राः। वः। संतु। बाहवः॥ तीक्ष्ण॰इषवः। अबल॰
धन्वनः। हत॥ उग्र॰आयुधाः। अबलान्। उग्र॰बाहवः॥७॥ अव॰सृष्टा। परा। ५२
पत। शरव्ये। ब्रह्म॰संशिते॥ जय। अमित्रान्। प्र। पद्यस्व॥ जहि। एषां। वरं॰व

रं॥ मा। अमीषां। मोचि। कः। चन॥८॥३१॥ ॥ अयं। ते। योनिः। ऋत्वियः॥ यतः
जातः। अरोचथाः॥ तं। जानन्। अग्ने। आ। रोह॥ अथ। नः। वर्द्धय। रयिं॥१॥ अग्ने
अच्छ। वद। इह। नः॥ प्रत्यङ्। नः। सु॰मनाः। भव॥ प्र। नः। यच्छ। विशां। पते॥ धन॰
दाः। असि। नः। त्वं॥२॥ प्र। नः। यच्छतु। अर्यमा॥ प्र। भगः। प्र। बृहस्पतिः॥ प्र। देवीः॥
प्र। उत। सूनृता॥ रयिं। देवी। दधातु। मे॥३॥ सोमं। राजानं। अवसे। अग्निं। गीः॰
भिः। हवामहे॥ आदित्यं। विष्णुं। सूर्यं। ब्रह्माणं। च। बृहस्पतिं॥४॥ त्वं। नः। अग्ने। अ
ग्नि॰भिः। ब्रह्म। यज्ञं। च। वर्द्धय॥ त्वं। नः। देव। दातवे॥ रयिं। दानाय। चोदय॥५॥

इंद्रवायू इति । उभौ । इह ॥ सु॰हवा । इह । हवामहे । यथा । नः । सर्वः । इत् । जनः ॥
सं॰गत्यां । सु॰मनाः । असत् ॥ दान॰कामः । च । नः । भुवत् ॥ ६ ॥ अर्यमणं । बृह
स्पतिं ॥ इंद्रं । दानाय । चोदय ॥ वातं । विष्णुं । सरस्वतीं ॥ सवितारं । च । वाजिनं ॥ ७ ॥
वाजस्य । नु । प्र॰सवे । सं । बभूविम ॥ इमा । च । विश्वा । भुवनानि । अंतः ॥ उत । अदि
त्संतं । दापयतु । प्र॰जानन् ॥ रयिं । च । नः । सर्व॰वीरं । नि । यच्छ ॥ दुह्रां । मे । पंच । प्र॰ ३३
दिशः ॥ दुह्रां । उर्वीः । यथा॰बलं ॥ प्र । आपेयं । सर्वाः । आ॰कूतीः ॥ मनसा । हृ
दयेन । च ॥ गो॰सनिं । वाचं । उत् । एयं । वर्चसा । मा । अभि । उत् । इहि ॥ आ । रुंधां ।

१८

15

सर्वतः । वायुः । त्वष्टा । पोषं । दधातु । मे ॥ १० ॥ ४ ॥ २० ॥ चतुर्थोनुवाकः ॥ अनुवाक
सू । ५ ऋ । ५० । दश ॥ ये । अग्नयः । अप्॰सु । अंतः ॥ ये । वृत्रे । ये । पुरुषे । ये । अश्म॰
सु ॥ यः । आ॰विवेश । ओषधीः । यः । वनस्पतीन् ॥ तेभ्यः । अग्नि॰भ्यः । हुतं । अस्तु ।
एतत् ॥ १ ॥ यः । सोमे । अंतः । यः । गोषु । अंतः । यः । आ॰विष्टः । वयः॰सु । यः । मृगेषु ॥ यः ।
आ॰विवेश । द्वि॰पदः । यः । चतुः॰पदः । तेभ्यः ॥ २ ॥ यः । इंद्रेण । स॰रथं । याति । दे
वः ॥ वैश्वानरः । उत । विश्व॰दाव्यः ॥ यं । जोहवीमि । पृतनासु । ससहिं । तेभ्यः ॥
यः । देवः । विश्व॰अत् । यं । ऊं इति । कामं । आहुः ॥ यं । दातारं । प्रति॰गृह्णंतं । आ

ऋः । यः । धीरः । शक्रः । परि॰भूः । अदाभ्यः । तेभ्यः । धायं । चा । होतारं । मनसा ।
अभि । सं॰विदुः ॥ त्रयः॰दश । भौवनाः । पंच । मानवाः ॥ वर्चः॰धसः । यशसः । सूनृ
ताः॰वाताः ॥ तेभ्यः ॥ पा । उक्ष॰अन्नाय । वशा॰अन्नाय ॥ सोम॰पृष्ठाय । वेधसे ॥ वै
श्वानर॰ज्येष्ठेभ्यः । तेभ्यः ॥ द्यां । दिवं । पृथिवीं । अनु । अन्तरिक्षं ॥ ये । वि॰द्युतं
अनु॰संचरंति ॥ ये । दिक्षु । अन्तः ॥ ये । वाते । अन्तः ॥ तेभ्यः । अग्नि॰भ्यः । हुतं । अ
स्तु । एतत् ॥ ७ हिरण्य॰पाणिं । सवितारं । इन्द्रं । बृहस्पतिं । वरुणं । मित्रं । अग्निं । वि २४
श्वान् । देवान् । अंगिरसः । हवामहे ॥ इमं । क्रव्य॰अदं । शमयंतु । अग्निं ॥ ८ शां १८

तः । अग्निः । क्रव्य॰अत् ॥ शांतः । पुरुष॰रेषणः ॥ अथो इति । यः । विश्व॰दाव्यः ॥
तं । क्रव्य॰अदं । अशीशमं ॥ ९ ये । पर्वताः । सोम॰पृष्ठाः ॥ आपः । उत्तान॰शी
वरीः ॥ वातः । पर्जन्यः । आत् । अग्निः ॥ ते । क्रव्य॰अदं । अशीशमन् ॥ १० ॥ ६ ॥ २१ ॥
हस्ति॰वर्चसं । प्रथतां । बृहत् । यशः ॥ अदित्याः । यत् । तन्वः । सं॰बभूव ॥ तत् । स
र्वे । सं । अदुः । मह्यं । एतत् ॥ विश्वे । देवाः । अदितिः । स॰जोषाः ॥ १ मित्रः । च । वरु
णः । च । इन्द्रः । रुद्रः । च । चेततु ॥ देवासः । विश्व॰धायसः ॥ ते । मा । अंजंतु । वर्च
सा ॥ २ येन । हस्ती । वर्चसा । सं॰बभूव ॥ येन । राजा । मनुष्येषु । अप्॰सु । अन्तः ॥

येनमदेवाःदेवतां।अग्रेअआयम्॥तेनमां।अघ।वर्चसा॥अग्ने।वर्चस्विनं।
कृणु॥१यत।ते।वर्चसजातं।वदः।बृहत।नवति।आं।कृतः॥यावत्
त्स्यस्य।वर्च।आसुरस्य।वा।हस्तिनः॥ तावत्।मा।अश्विना।वर्चआ।
धत्तां।पुष्करं।स्रजा॥१॥यावत्।चतस्त्रः।प्रं।दिशः।चक्षुः।यावत्।सं।अ
स्नुते॥तावत्।सं।एतु।इंद्रियं।मयितत्।हस्तिं।वर्चसं॥१॥हस्ती।मृग
णां।सुं।सदं।अतिस्थां।वान्।बत्त्व।हि।तस्य।नमेन।वर्चसा॥अग्नि। २५
सिंचामि।मां।अहं॥३॥ब॥२२॥ ॥येन।वेहत।बत्त्वविथ।नाशयामसि।

२

तत्।चत्॥इदं।तत्।अन्यत्र।चत्।अपान्दुरो।नि।दध्मसि॥१॥आ।ते।योनिं।ग
र्भः।एतु।पुमान्।बाणः।इव।इषुं।धिं॥आ।वीरः।अत्र।जायतां॥पुत्रः।ते।
दशमास्यः॥पुमांसं।पुत्रं।जनय।तं।पुमान्।अनुजायतां॥नवासि।पुत्राणां।
माता॥जातानां।जनयाः।च।यो॥३॥यानि।भद्राणि।बीजानि॥ऋषभाः।जनयंति।
च॥तैः।चं।पुत्रं।विंदस्व॥सा।प्रंसूः।धेनुका।भव॥४॥कृणोमि।ते।प्राजा
पत्यं॥आ।योनिं।गर्भः।एतु।ते॥विंदस्व।त्वं।पुत्रं।नारि॥यः।तुभ्यं।शं।असत्।
शं।ॐ।इति।तस्मै।त्वं।भव॥५॥यासां।द्यौः।पिता।पृथिवी।माता॥समुद्रः।मूलं

वीरुधां । बृहत्वा । ताः । वः । पुत्र॰विद्याय । देवीः । प्र । अवंतु । उषधयः ॥ ६ ॥ ७ ॥
॥ २३ ॥ पयस्वतीः । उषधयः ॥ पयस्वत् । मामकं । वचः ॥ अथो इति । पयस्वतीनां ।
आ । भरे । अहं । सहस्र॰शः ॥ १ ॥ वेद । अहं । पयस्वंतं । चकार । धान्यं । बहु ।
सं॰भृत्वा । नाम । यः । देवः । तं । वयं । हवामहे ॥ यः॰यः । अयज्वनः । गृहे ॥ २ ॥
इमाः । याः । पंच । प्र॰दिशः । मानवीः । पंच । कृष्टयः ॥ वृष्टे । शापं । नदीः॰इव ॥
इह । स्फातिं । सं॰आवहान् ॥ ३ ॥ उत्॰उत्सं । शत॰धारं । सहस्र॰धारं । अक्षि- २६
तं ॥ एव । अस्माकं । इदं । धान्यं ॥ सहस्र॰धारं । अक्षितं ॥ ४ ॥ शत॰हस्त । सं॰

आ-
हर ॥ सहस्र॰हस्त । सं । किर ॥ कृतस्य । कार्यस्य । च ॥ इह । स्फातिं । सं॰आवह ॥ ५ ॥
तिस्रः । मात्राः । गंधर्वाणां । चतस्रः । गृह॰पत्न्याः ॥ तासां । या । स्फातिमत्॰तमा ।
तया । त्वा । अभि । मृशामसि ॥ उप॰ऊहः । च । सं॰ऊहः । च ॥ क्षत्तारौ । ते ।
प्रजा॰पते ॥ तौ । इह । आ । वहतां । स्फातिं ॥ बहुं । भूमानं । अक्षितं ॥ ७ ॥ ७ ॥ २४ ॥
उत्॰तुदः । त्वा । उत् । तुदतु ॥ मा । धृथाः । शयने । स्वे ॥ इषुः । कामस्य । या । भी-
मा ॥ तया । विध्यामि । त्वा । हृदि ॥ १ ॥ आधी॰पर्णां । काम॰शल्यां ॥ इषुं । संकल्प-
कुल्मलां ॥ तां । सु॰संनतां । कृत्वा ॥ कामः । विध्यतु । त्वा ॥ २ ॥ या । प्लीहानं । शोष

यति॥ कामस्य। इषुः। सुऽसंनता॥ प्राचीनऽपक्षा। विऽओषा। तया। विध्यामि।
त्वा। हृदि॥ ३॥ शुचा। विद्धा। विऽओषया। शुष्कऽआस्या। अभि। सर्प। मा॥ मृदुः।
निऽमन्युः। केवली॥ प्रियऽवादिनी। अनुऽव्रता॥ ४॥ आ। अज्मि। त्वा।
आऽअजन्या॥ पत्सि। मातुः। अथो इति। पितुः॥ यथा। मम। क्रतौ। असः॥ मम।
चित्तम्। उपऽआयसि॥ ५॥ वि। अस्यै। मित्रावरुणौ। हृदः। चित्तानि। अस्यतम्॥ २२
अथ। एनाम्। अक्रतुम्। कृत्वा॥ मम। एव। कृणुतम्। वशे॥ ६॥ २५॥ पंचमोनुवाकः॥
अनुवाके सू॰। १ ऋ॰। ३५। पंचवर्गाः॥ ॥ ये। अस्याम्। स्थ। प्राच्याम्। दिशि॥ हेतयः। नाम।

देवाः। तेषाम्। वः। अग्निः। इषवः॥ ते। नः। मृडत। ते। नः। अधि। ब्रूत॥ तेभ्यः। वः। नमः।
तेभ्यः। वः। स्वाहा॥ १॥ स्थ। दक्षिणायाम्। दिशि॥ अविष्यवः। नाम। देवाः॥ तेषाम्। वः।
कामः। इषवः॥ २॥ स्थ। प्रतीच्याम्। दिशि॥ विराजः। नाम। देवाः॥ तेषाम्। वः। आपः।
इषवः॥ ३॥ स्थ। उदीच्याम्। दिशि॥ प्रऽविध्यन्तः। नाम। देवाः। तेषाम्। वः। वातः। इष-
वः॥ ४॥ स्थ। ध्रुवायाम्। दिशि॥ निऽलिम्पाः। नाम। देवाः॥ तेषाम्। वः। ओषधीः। इषवः।
५॥ ये। अस्याम्। स्थ। ऊर्ध्वायाम्। दिशि॥ अवस्वन्तः। नाम। देवाः॥ तेषाम्। वः। बृहस्पतिः।
इषवः॥ ते। नः। मृडत। ते। नः। अधि। ब्रूत॥ तेभ्यः। वः। नमः। तेभ्यः। वः। स्वाहा॥ ६॥ २६॥

अधिपति॰भ्यः नमः रक्षितृ॰भ्यः नमः इषु॰भ्यः नमः एभ्यः अस्तु॥ (faded)

॥२८॥ प्राची॥ दिक्॥ अग्निः॥ अधि॰पतिः॥ असितः॥ रक्षिता॥ आदित्याः॥ इषवः॥ ते
भ्यः नमः॥ अस्तु॥ यः॥ अस्मान्॥ द्वेष्टि॥ यं॥ वयं॥ द्विष्मः॥ तं॥ वः॥ जंभे॥ दध्मः॥१॥
दक्षिणा॥ दिक्॥ इंद्रः॥ अधि॰पतिः॥ तिरश्चि॰राजिः॥ रक्षिता॥ पितरः॥ इषवः॥२
प्रतीची॥ दिक्॥ वरुणः॥ अधि॰पतिः॥ पृदाकुः॥ रक्षिता॥ अन्नं॥ इषवः॥३॥ उदी
ची॥ दिक्॥ सोमः॥ अधि॰पतिः॥ स्वजः॥ रक्षिता॥ अशनिः॥ इषवः॥४॥ ध्रुवा॥ दिक्॥
विष्णुः॥ अधि॰पतिः॥ कल्माष॰ग्रीवः॥ रक्षिता॥ वीरुधः॥ इषवः॥५॥ ऊर्ध्वा॥ दिक्॥ बृह॥ २६
स्पतिः॥ अधि॰पतिः॥ श्वित्रः॥ रक्षिता॥ वर्षं॥ इषवः॥ तेभ्यः॥ नमः॥ अधिपति॰भ्यः॥ 58

२३

नमः॥ रक्षितृ॰भ्यः॥ नमः॥ इषु॰भ्यः॥ नमः॥ एभ्यः॥ अस्तु॥ यः॥ अस्मान्॥ द्वेष्टि॥ यं॥ व
यं॥ द्विष्मः॥ तं॥ वः॥ जंभे॥ दध्मः॥६॥७॥२७॥ ॥एक॰एकया॥ एषा॥ सृष्ट्या॥ सं॥
बभूव॥ यत्र॥ गाः॥ असृजंत॥ भूत॰कृतः॥ विश्व॰रूपाः॥ यत्र॥ वि॰जायते॥ य
मिनी॥ अप॰ऋतुः॥ सा॥ पशून्॥ क्षिणाति॥ रिफती॥ रुशती॥१॥ एषा॥ पशून्॥ सं॥ क्षि
णाति॥ क्रव्य॰अत्॥ भूत्वा॥ वि॰अद्वरी॥ उत॥ एनां॥ ब्रह्मणे॥ दद्यात्॥ तथा॥ स्यो
ना॥ शिवा॥ स्यात्॥२॥ शिवा॥ भव॥ पुरुषेभ्यः॥ गोभ्यः॥ अश्वेभ्यः॥ शिवा॥ शिवा॥ अ
स्मै॥ सर्वस्मै॥ क्षेत्राय॥ शिवा॥ नः॥ इह॥ एधि॥ इह॥ पुष्टिः॥ इह॥ रसः॥ इह॥ सहस्र॰

सातमा।नवा।पुरुषन्।यमिनि।पोषय॥७॥यत्रासुहार्दाःसु॰कृतःमदंति॥
वि॰हाय॥रोगं।तन्वः।स्वायाः॥तं।लोकं।यमिन्या।अभि॰संबभूव॥सा।नः।
मा।हिंसीत्।पुरुषान्।पुरुषन्।वा॥५॥यत्रासु॰हार्दाःसु॰कृतां॥अग्निहोत्रहु
तां।यत्र।लोकः॥तं।लोकं।यमिन्या।अभि॰संबभूव॥सा।नः।मा।हिंसीत्।पुरु
षान्।पुरुषन्।वा॥६॥७॥२८॥ ॥यत्।राजानः।वि॰भजंत॥इष्टापूर्तस्य॥षोड
शं॥यमस्य॥अमी इति॥सना॰सदः॥अविः।तस्मात्।प्र।मुंचति।दत्तः।शिति॰ ५९ 59
पात्।स्वधा॥१॥सर्वान्।कामान्।पूरयति॥आ॰भवन्।प्र॰भवन्।भवन्॥आ

२४

अविं।लोकेन।संमि॰ मितं॥३

कृति॰प्र॰।अविः।दत्तः॥शिति॰पात्।न।उप॰दस्यति॥२॥यः।ददाति।शिति॰
पादं।अविं।लोकेन।सं॰मितं॥सः।नाकं।अभि॰आरोहति॥यत्र।शुल्कः।न
क्रियते।अबलेन।बलीयसे॥३॥पंच॰अपूपं।शिति॰पादं॥प्र॰दाता।उप॰जी
वति॥पितॄणां।लोके।अक्षितं॥४॥पंच॰अपूपं।शिति॰पादं।अविं।लोकेन।सं॰
मितं॥प्र॰दाता।उप॰जीवति॥सूर्यामासयोः।अक्षितं॥५॥इरा॰इव।न।उप
दस्यति॥समुद्रः॰इव।पयः।महत्॥देवौ।सवासिनौ॰इव॥शिति॰पात्।न।
उप॰दस्यति॥६॥कः।इदं।कस्मै।अदात्॥कामः।कामाय।अदात्॥कामः

दाता । कामं । प्रतिऽगृहीता ॥ कामं । समुद्रं । आ । विवेश ॥ कामेन । त्वा । प्रति । गृ
ह्णामि ॥ काम । एतत् । ते ॥ ७ ॥ भूमिः । त्वा । प्रति । गृह्णातु । अंतरिक्षं । इदं । महत् ॥
मा । अहं । प्राणेन । मा । आत्मना । मा । प्रजया । प्रतिऽगृह्य । वि । राधिषि ॥ ८ ॥ ६ ॥
। २९ ॥ सऽहृदयं । सांऽमनस्यं ॥ अविऽद्वेषं । कृणोमि । वः ॥ अन्यः । अन्यं । अभि । हर्य
त ॥ वत्सं । जातंऽइव । अघ्न्या ॥ १ ॥ अनुऽव्रतः । पितुः । पुत्रः ॥ माता । भवतु । संऽमनाः ॥
जाया । पत्ये । मधुऽमतीं ॥ वाचं । वदतु । शंतिऽवां ॥ २ ॥ मा । भ्राता । भ्रातरं । द्विक्ष ६०
त् ॥ मा । स्वसारं । उत । स्वसा ॥ सम्यंचः । सऽव्रताः । भूत्वा ॥ वाचं । वदत । भद्रया ॥ ३ ॥ येन ।

२४

देवाः । न । विऽयंति । नो । इति । च । विऽद्विषते । मिथः ॥ तत् । कृण्मः । ब्रह्म । वः । गृहे ।
संऽज्ञानं । पुरुषेभ्यः ॥ ४ ॥ ज्यायस्वंतः । चित्तिनः । मा । वि । यौष्ट ॥ संऽराधयंतः । सऽ
धुराः । चरंतः ॥ अन्यः । अन्यस्मै । वल्गु । वदंतः । आ । इत ॥ सध्रीचीनान् । वः । संऽम
नसः । कृणोमि ॥ ५ ॥ समानी । प्रऽपा । सह । वः । अन्नऽभागः । समाने । योक्त्रे । सह । वः । यु
नज्मि ॥ सम्यंचः । अग्निं । सपर्यत ॥ अराः । नाभिंऽइव । अभितः ॥ ६ ॥ सध्रीचीनान् । वः ।
संऽमनसः । कृणोमि ॥ एकऽश्नुष्टीन् । संऽवननेन । सर्वान् ॥ देवाःऽइव । अमृतं । र
क्षमाणाः ॥ सायंऽप्रातः । सौमनसः । वः । अस्तु ॥ ७ ॥ ७ ॥ ३० ॥ वि । देवाः । जरसा । अ

हृतं॑नू । वि । वं॒ । अ॒ग्ने । अ॒सत्या॑ ॥ वि । अ॒हं । स॒र्वे॑ण । पा॒प्मना॑ ॥ वि । य॒क्ष्मेण॑ । सं । आयु॑-

षा ॥ १ ॥ वि । आ॒र्त्या । पव॑मानः ॥ वि । श॒क्रः । पा॒प॒ऽकृ॒त्यया॑ ॥ २ ॥ वि । ग्रा॒म्याः । प॒शवः॑ ।

आ॒र॒ण्यैः ॥ वि । आपः॑ । तृ॒ष्णया॑ । अ॒सर॒न् ॥ ३ ॥ वि । इ॒मे इति॑ । द्यावा॑पृथि॒वी इति॑ । इ॒तः ॥ ६१

वि । पन्था॑नः । दिशं॑ऽदिशं ॥ ४ ॥ त्वष्टा॑ । दु॒हि॒त्रे । व॒ह॒तुं । यु॒न॒क्ति॒ । इति॑ । इ॒दं । विश्वं॑ ।

भुव॑नं । वि । या॒ति॒ ॥ ५ ॥ अ॒ग्निः । प्रा॒णान् । सं । द॒धा॒ति॒ ॥ च॒न्द्रः । प्रा॒णेन॑ । सं॒ऽहि॒तः ॥ ६ ॥ प्रा॒-

णेन॑ । वि॒श्वतः॑ऽवीर्यं ॥ दे॒वाः । सूर्यं॑ । सं । ऐ॒र॒य॒न् ॥ ७ ॥ आयु॑ष्मतां । आ॒यु॒ःऽकृतां॑ । प्रा॒णे- २२

न॑ । जीव॑ । मा । मृ॒थाः॒ ॥ ८ ॥ प्रा॒णेन॑ । प्रा॒ण॒तां । प्र । अ॒न॒ ॥ इ॒ह । ए॒व । भ॒व॒ । मा । मृ॒थाः॒ ॥ ९ ॥ उत् । आ-

२९

यु॒षा ॥ उत् । ओष॑धीनां । रसे॑न ॥ १० ॥ आ । प॒र्जन्य॑स्य । वृ॒ष्ट्या ॥ उत् । अ॒स्था॒म॒ । अ॒मृताः॑ ।

व॒यं ॥ वि । अ॒हं । स॒र्वे॑ण । पा॒प्मना॑ ॥ वि । य॒क्ष्मेण॑ । सं । आयु॑षा ॥ ११ ॥ ७ ॥ ३१ ॥ षष्ठो॑ऽनु-

वा॒कः ॥ अ॒नु॒वा॒के सू॒क्तानि॑ । ४४ ॥ च॒तुर्द॒शां । त्या । अ॒नु॒वा॒क॒स॒ख्य सं॒ख्यां । वि॒द॒ध्य॒म दश-

कानि मि॒त्त्वा॒त् ॥ षष्ठः॑ प्र॒पा॒ठ॒कः स॒मा॒प्तः ॥ तृ॒तीयं॑ कां॒डं स॒मा॒प्तं ॥ ॥ ॐ ब्रह्म॑ । ज॒ज्ञा॒नं ।

प्र॒थ॒मं । पु॒रस्ता॑त् ॥ वि । सी॒म॒तः । सु॒ऽरु॒चः॑ । वे॒नः । आ॒व॒ः ॥ सः । बु॒ध्न्याः॑ । उ॒प॒ऽमाः । अ॒स्य॒ ।

वि॒ऽस्थाः ॥ स॒तः । च॒ । योनिं॑ । अस॑तः । च॒ । वि । व॒रिति॑ ॥ १ ॥ इ॒यं । पित्र्या॑ । रा॒ष्ट्री । ए॒तु॒ । अग्रे॑ । प्र॒थ॒-

माय॑ । ज॒नुषे॑ । भु॒व॒ने॒ऽस्थाः ॥ तस्मै॑ । ए॒तं । सु॒ऽरु॒चं । ह्वा॒रं । अ॒ह्यं॑ ॥ घ॒र्मं । श्री॒ण॒न्तु॒ । प्र॒थ॒मा॑

MEMORIAL

पाथस्य वा ॥२॥ प्र । यः । जज्ञे । विद्वान् । अस्य । बंधुं । विश्वा । देवानां । जनिम । विव
क्ति ॥ ब्रह्म । ब्रह्मणः । उत् । जभार । मध्यात् ॥ नीचैः । उच्चैः । स्वधाः । अभि । प्र । त
स्थौ ॥३॥ सः । हि । दिवः । सः । पृथिव्याः । ऋतऽस्थाः । मही । क्षेमं । रोदसी इ
ति । अस्कभायत् ॥ महान् । मही इति । अस्कभायत् । विऽजातः ॥ नघां । द्यां । सद्म
पार्थिवं । च । रजः ॥४॥ सः । बुध्न्यात् । आष्ट्र । जनुषा । अभि । अग्रं । बृहस्पतिः । दे ५२
वता । तस्य । सम्ऽराट् ॥ अहः । यत् । शुक्रं । ज्योतिषः । जनिष्ट ॥ अथ । द्युऽमंतः ।
वि । वसंतु । विप्राः ॥५॥ नूनं । तत् । अस्य । काव्यः । हिनोति ॥ महः । देवस्य । पूर्व्यस्य

२१

धाम । एषः । जज्ञे । बहुऽभिः । साकं । इत्था ॥ पूर्वे । अर्धे । विऽसिते । ससन् । नु ॥६॥
यः । अथर्वाणं । पितरं । देवऽबंधुं । बृहस्पतिं । नमसा । अव । च । गच्छात् ॥
त्वं । विश्वेषाम् । जनिता । यथा । असः ॥ कविः । देवः । न । दभायत् । स्वधाऽवा
न् ॥७॥ ७ ॥१॥ ॥ यः । आत्मऽदाः । बलऽदाः । यस्य । विश्वे । उपऽआसते । प्रऽशिष
म् । यस्य । देवाः ॥ यः । अस्य । ईशे । द्विऽपदः । यः । चतुःऽपदः ॥ कस्मै । देवाय । ह
विषा । विधेम ॥१॥ यः । प्राणतः । निऽमिषतः । महित्वा ॥ एकः । राजा । जगतः । बभू
व ॥ यस्य । छाया । अमृतं । यस्य । मृत्युः । कस्मै ॥२॥ यं । क्रंदसी इति । अवतः ।

वस्कभाने इति॥ तियसाने इति। रोदसी इति। अक्रयेथां॥ यस्य। असौ। पंथाः।
रजसः। विऽमानः। कस्मै॥३॥ यस्य। द्यौः। उर्वी। पृथिवी। च। मही॥ यस्य। अदः।
उरु। अंतरिक्षम्॥ यस्य। असौ। सूरः। विऽततः। महिऽत्वा। कस्मै॥४॥ यस्य। वि
श्वे। हिमऽवंतः। महिऽत्वा॥ समुद्रं। यस्य। रसया। सह। आहुः॥ इमाः। च। प्रऽदि
शः। यस्य। बाहू इति। कस्मै॥५॥ आपः। अग्रे। विश्वम्। आवन्। गर्भम्। दधानाः।
अमृताः। ऋतऽज्ञाः॥ यासु। देवीषु। अधि। देवः। आसीत्। कस्मै॥६॥ हिरण्यऽग 13
र्भः। सम्। अवर्तत। अग्रे॥ भूतस्य। जातः। पतिः। एकः। आसीत्॥ सः। दाधार।

२८

पृथिवीम्। उत। द्याम्। कस्मै॥७॥ आपः। वत्सम्। जनयंतीः॥ गर्भम्। अग्रे। सम्
ऐरयन्॥ तस्य। उत। जायमानस्य॥ उल्बः। आसीत्। हिरण्ययः॥ कस्मै। दे
वाय। हविषा। विधेम॥८॥१॥ उत। इतः। त्रयः। अक्रमन्। व्याघ्रः। पुरुषः।
वृकः॥ हिरुक्। हि। यंति। सिंधवः॥ हिरुक्। देवः। वनस्पतिः। हिरुक्। नमंतु। श
त्रवः॥१॥ परेण। एतु। पथा। वृकः। परमेण। उत। तस्करः॥ परेण। दत्वती। रज्जुः॥
परेण। अघऽयुः। अर्षतु॥२॥ अक्ष्यौ। च। ते। मुखं। च। ते॥ व्याघ्र। जंभयामसि॥
आत्। सर्वान्। विंशतिम्। नखान्॥३॥ व्याघ्रम्। दत्वतां। वयम्॥ प्रथमम्। जं

नयामसि॥ आ। नः। ऊं इति। स्तेनं। अघो इति। अहिम्॥ या। उ०धानम्। अथो इति॥
वृकम्॥ ध॥ यः। अघ। स्तेनः। आ०अयति। सः। सम्०पिष्टः। अप। अयति। प
थाम्। अप०ध्वंसना। एतु। इंद्रः। वज्रेण। हंतु। तं॥ पा। मूर्णाः। मृगस्य। दंताः। अ
पि०शीर्णाः। ऊं इति। पृष्टयः॥ नि०म्रुक्। ते। गोधा। भवतु॥ नीचा। अयत्। शशयुः।
मृगः॥ ६। यत्। संयमः। न। वि। यमः॥ वि। यमः। यत्। न। सम्०यमः। इंद्र०जाः।
सोम०जाः। आथर्वणम्। असि। व्याघ्र०जंभनम्॥ ७॥ ४॥ ३॥ ॥ यां। त्वा। गंधर्वः। ५४
अखनत्॥ वरुणाय। मृत०व्रजे॥ तां। त्वा। वयं। खनामसि। ओषधिम्। शेप०

२५

हर्षणीम्॥ ध॥ १॥ उत्। उषाः। उत्। ऊं इति। सूर्यः॥ उत्। इदम्। मामकम्। वचः॥
उत्। एजतु। प्रजा०पतिः॥ वृषा। शुष्मेण। वाजिना॥ २॥ यथा। स्म। ते। वि०रोह
तः। अभि०तप्तम्०इव। अनति॥ ततः। ते। शुष्म०वत्०तरं॥ इयम्। कृणोतु। ओ
षधिः॥ ३॥ उत्। शुष्मा। ओषधीनाम्। सारः। ऋषभाणां॥ सं। पुंसाम्। इंद्र। वृ
ष्ण्यम्॥ अस्मिन्। धेहि। तनू०वशिन्॥ ध॥ अपाम्। रसः। प्रथम०जः। अथो
इति। वनस्पतीनाम्॥ उत। सोमस्य। भ्राता। असि। उत। आर्शम्। असि। वृ
ष्ण्यम्॥ पा। अद्य। अग्ने। अद्य। सवितः। अद्य। देवि। सरस्वति॥ अद्य। अस्य।

ब्रह्मणः। पते। धनुः॰इव। आ। तानय। पसः॥६॥ आ॥ अहम्। तनोमि। ते। पसः॥
अधि। ज्याम्॰इव। धन्वनि॥ क्रमस्व। ऋशः॰इव। रोहितम्॥ अनव॰ग्लायता।
सदा॥ अश्वस्य। अश्वतरस्य॥ अजस्य। पेत्वस्य। च॥ अथ। ऋषभस्य। ये। वाजाः॥
तान्। अस्मिन्। धेहि। तनू॰वशिन्॥८॥४॥ ॥ सहस्र॰शृङ्गः। वृषभः॥ यः।
समुद्रात्। उत्॰आचरत्॥ तेन। सहस्येन। वयम्॥ नि। जनान्। स्वापयामसि॥१॥
न। भूमिम्। वातः। अति। वाति॥ न। अति। पश्यति। कः। चन॥ स्त्रियः। च। सर्वाः।
स्वापय। शुनः। च। इन्द्र॰सखा। चरन्॥२॥ प्रोष्ठे॰शयाः। तल्पे॰शयाः॥ नारीः। ५५

३०

याः। वह्य॰शीवरीः॥ स्त्रियः। याः। पुण्य॰गन्धयः॥ ताः। सर्वाः। स्वापयामसि॥३॥
एजत्॰एजत्। अजग्रभम्॥ चक्षुः। प्राणम्। अजग्रभम्॥ अङ्गानि। अजग्रभम्।
सर्वाः॥ रात्रीणाम्। अति॰शर्वरे॥४॥ यः। आस्ते। यः। च। चरति॥ यः। च। तिष्ठन्।
वि॰पश्यति॥ तेषाम्। सम्। दध्मः। अक्षीणि॥ यथा। इदम्। हर्म्यम्। तथा॥५॥ स्वप्तु। मा-
ता। स्वप्तु। पिता॥ स्वप्तु। श्वा। स्वप्तु। विश्पतिः॥ स्वपन्तु। अस्यै। ज्ञातयः॥ स्वप्तु।
अयम्। अभितः। जनः॥६॥ स्वप्न। स्वप्न॰अभिकरणेन॥ सर्वम्। नि। स्वापय। जनम्॥
आ। उत्॰सूर्यम्। अन्यान्। स्वापय॥ आ। वि॰उषम्। जागृतात्। अहम्। इन्द्रः॰इव।

अस्थिः। अस्थितः॥७॥ पा॥ छ॥ प्रथमोऽनुवाकः समाप्तः॥ म॥ पा॥ अ॥३७॥ मन्त्र॥ ॥
ब्राह्मणः। जज्ञे। प्रथमः॥ दशऽशीर्षः। दशऽआस्यः॥ सः। सोमम्। प्रथमः।
पपौ॥ सः। चकार। अरसम्। विषम्॥१॥ यावती इति। द्यावापृथिवी इति। वरि
म्णा॥ यावत्। सप्त। सिन्धवः। विऽतस्थिरे। वाचम्। विषस्य। दूषणीम्। ताम्। इ
तः। निः। अवादिषम्॥२॥ सुऽपर्णः। त्वा। गरुत्मान्॥ विषः। प्रथमम्। आवयत्॥
न। अमीमदः। न। अरूरुपत्॥ उत। अस्मै। अभवः। पितुः॥३॥ यः। ते। आस्यत्। प
ञ्चऽअंगुरिः॥ वक्रात्। वित्। अधि। धन्वनः॥ अपऽस्कंभस्य। शल्यात्॥ निः। अ

39

वोचम्। अहम्॥ विषम्॥४॥ शल्यात्। विषम्। निः। अवोचम्॥ प्रऽअंजनात्। उत। २
पर्णऽधेः॥ अपाष्ठात्। शृंगात्। कुल्मलात्॥ निः। अवोचम्। विषम्॥५॥ अ
रसः। ते। इषो इति। शल्यः॥ अथो इति। ते। अरसम्। विषम्॥ उत। अरसस्य। वृक्ष
स्य। धनुः। ते। अरसारसम्॥६॥ ये। अपीषन्। ये। अदिहन्। ये। आस्यन्। ये।
अवऽअसृजन्॥ सर्वे। ते। वध्रयः। कृताः॥ वध्रिः। विषऽगिरिः। कृतः॥७॥ व
ध्रयः। ते। खनितारः॥ वध्रिः। त्वम्। असि। ओषधे॥ वध्रिः। सः। पर्वतः। गिरिः॥
यतः। जातम्। इदम्। विषम्॥८॥ छ॥ द॥ वाः। इदम्। वारयाते। वरणऽवत्या

MEMORIAL

म्।अधि।तत्र।अमृतस्य।आऽसिक्तम्॥तेन।ते।वारये।विषम्॥२॥अरसम्।प्रा
च्यम्।विषम्॥अरसम्।यत्।उदीच्यम्॥अथ।इदम्।अधराच्यम्।करंभेण।वि
कल्पते॥३॥करंभम्।कृत्वा।तिर्यम्॥पीबःऽपाकम्।उदारथिम्॥क्षुधा।किल।
त्वा।दुस्तनो इति दुःऽतनो।जक्षिऽवान्।सः।न।रुरुपः॥४॥३॥ ॥वि।ते।मदम्।
मदऽवति॥शरम्ऽइव।पातयामसि॥प्र।त्वा।चरुम्ऽइव।येष्ठाऽवितम्।वच
सा।स्थापयामसि॥तिष्ठं० येषंतम्।वचसा।स्थापयामसि॥५॥परि।ग्रामम्ऽइव। 52
आऽचितम्॥वचसा।स्थापयामसि॥तिष्ठ।वृक्षःऽइव।स्थाम्नि॥अभ्रिऽखाते।न।

33

रूरुपः॥६॥पवस्तैः।त्वा।परि।अक्रीणन्।दूर्शेभिः।अजिनैः।उत।प्रऽक्रीः।अ
सि।त्वम्।ओषधे॥अभ्रिऽखाते।न।रूरुपः॥७॥६॥ ॥अनाप्ताः।ये।वः।प्रथमाः।यानि।
कर्माणि।चक्रिरे॥वीरान्।नः।अत्र।मा।दभन्।तत्।वः।एतत्।पुरः।दधे॥७॥७॥
भूतः।भूतेषु।पयः।आ।दधाति॥सः।भूतानाम्।अधिऽपतिः।बभूव॥तस्य।मृत्युः।
चरति।राजऽसूयम्॥सः।राजा।राज्यम्।अनु।मन्यताम्।इदम्॥१॥अभि।प्र।इहि।मा।अ
प।वेनः।उग्रः।चेत्ता।सपत्नऽहा॥आ।तिष्ठ।मित्रऽवर्धन॥तुभ्यम्।देवाः।अधि।ब्र
वन्॥२॥आऽतिष्ठंतम्।परि।विश्वे।अभूषन्।श्रियम्।वसानः।चरति।स्वऽरोचिः॥

महत् । तत् । वृष्णः । असुरस्य । नाम ।। आ । विश्व॰रूपः । अमृतानि । तस्थौ ।। २ व्या
घ्रः । अधि । वैयाघ्रे ।। वि । क्रमस्व । दिशः । महीः ।। विशः । त्वा । सर्वाः । वाञ्छन्तु । आ
पः । दिव्याः । पयस्वतीः ।। ३ याः । आपः । दिव्याः । पयसा । मदन्ति । अन्तरिक्षे । उत
वा । पृथिव्याम् ।। तासाम् । त्वा । सर्वासाम् । अपाम् ।। अभि । सिञ्चामि । वर्चसा ।। ४
अभि । त्वा । वर्चसा । असिचन् । आपः । दिव्याः । पयस्वतीः ।। यथा । असः । मित्र॰
वर्धनः ।। तथा । त्वा । सविता । करत् ।। ५ । एना । व्याघ्रम् । परि॰सस्वजानाः ।। सिंहम् ५६
हिन्वन्ति । महते । सौभगाय ।। समुद्रम् । न । सु॰भुवः । तस्थि॰वांसम् ।। मर्मृज्य

३३

न्ते । द्वीपिनम् । अप्॰सु । अन्तः ।। ७ ।। छ ।। प ।। ।। आ । इहि । जीवम् । त्रायमाणम् ।। प
र्वतस्य । असि । अक्ष्यम् ।। विश्वेभिः । देवैः । दत्तम् ।। परि॰धिः । जीवनाय । कम् ।
।१। परि॰पानम् । पुरुषाणाम् ।। परि॰पानम् । गवाम् । असि ।। अश्वानाम् । अर्व
ताम् ।। परि॰पानाय । तस्थिषे ।।२। उत । असि । परि॰पानम् ।। यातु॰जम्भनम् । आ॰
अञ्जन ।। उत । अमृतस्य । त्वम् । वेत्थ ।। अथो इति । असि । जीव॰भोजनम् ।। अथो
इति । हरित॰भेषजम् ।।३। यस्य । आ॰अञ्जन । प्र॰सर्पसि ।। अङ्गम्॰अङ्गम् । प
रुः॰परुः ।। ततः । यक्ष्मम् । वि । बाधसे ।। उग्रः । मध्यमशीः॰इव ।। ४ । न । एनम् ।

प्र। आप्नोति। शपथः। न। कृत्या। न। अभि॰शोचनम्। न। एनम्। वि॰स्कंधम्।
अश्नुते। यः। त्वा। बिभर्ति। आ॰अंजन॥ पा। असत्॰मंत्रात्। दुः॰स्वप्न्यात्॥
दुः॰कृतात्। शमलात्। उत। दुः॰हार्दः। चक्षुषः। घोरात्। तस्मात्। नः। पाहि।
आ॰अंजन॥ ५॥ इदम्। विद्वान्। आ॰अंजन। सत्यम्। वक्ष्यामि। न। अनृतम्।
सनेयम्। अश्वम्। गाम्। अहम्। आत्मानम्। तव। पुरुष॥ ६॥ ७॥ त्रयः। दा
साः। आ॰अंजनस्य। तक्मा। बलासः। आत्। अहिः। वर्षिष्ठः। पर्वतानाम्। त्रि॰
ककुत्। नाम। ते। पिता॥ ८॥ यत्। आ॰अंजनम्। त्रैककुदम्। जातम्। हिम॰

वतः। परि। यातून्। च। सर्वान्। जंभयत्। सर्वाः। च। यातु॰धान्यः॥ ९॥ यदि। वा।
असि। त्रैककुदम्। यदि। यामुनम्। उच्यसे। उभे इति। ते। भद्रे इति। नाम्नी इति।
ते। ताभ्याम्। नः। पाहि। आ॰अंजन॥ १०॥ ३॥ ५॥ ॥ वातात्। जातः। अंतरिक्षा
त्। विद्युतः। ज्योतिषः। परि। सः। नः। हिरण्य॰जाः। शंखः। कृशनः। पातु। अंह
सः॥ १॥ यः। अग्रतः। रोचनानाम्। समुद्रात्। अधि। जज्ञिषे। शंखेन। हत्वा। र
क्षांसि। अत्त्रिणः। वि। सहामहे॥ २॥ शंखेन। अमीवाम्। अमतिम्। शंखेन। उ
त। सदान्वाः। शंखः। नः। विश्व॰भेषजः। कृशनः। पातु। अंहसः॥ ३॥ दिवि। जातः।

समुद्र॰जः। सिंधुतः। परि॥ आऽभृतः॥ सः। नः। हिरण्य॰जाः। शंखः॥ आयुः॰प्रत
रणः। मणिः॥४॥ समुद्रात्। जातः। मणिः॥ वृत्रात्। जातः। दिवाऽकरः॥ सः। अस्मा
न्। सर्वतः। पातु। हेत्याः॥ देव॰असुरेभ्यः॥५॥ हिरण्यानाम्। एकः। असि॥ सो
मात्। त्वम्। अधि। जज्ञिषे॥ रथे। त्वम्। असि। दर्शतः। इषु॰धौ॥ रोचनः। त्वम्। प्र।
नः। आयूंषि। तारिषत्॥६॥ देवानाम्। अस्थि। कृशनम्। बभूव। तत्। आत्मन्॰
वत्। चरति। अप्॰सु। अंतः॥ तत्। ते। बध्नामि। आयुषे। वर्चसे। बलाय। दीर्घा
यु॰त्वाय। शत॰शारदाय। कार्शनः। त्वा। अभि। रक्षतु॥७॥ ७॥ १०॥ द्वितीयोऽनु

वाकः॥ सप्त। पंच। ऋ। २। ६। नव। ॥ अनड्वान्। दाधार। पृथिवीम्। उत। द्याम्॥ अनड्वा
न्। दाधार। उरु। अंतरिक्षम्॥ अनड्वान्। दाधार। प्र॰दिशः। षट्। उर्वीः॥
अनड्वान्। विश्वम्। भुवनम्। आ। विवेश॥१॥ अनड्वान्। इंद्रः। सः। पशु॰भ्यः।
वि। चष्टे॥ त्रयान्। शक्रः। वि। मिमीते। अध्वनः॥ भूतम्। भविष्यत्। भुवना। दुहा
नः॥ सर्वा। देवानाम्। चरति। व्रतानि॥२॥ इंद्रः। जातः। मनुष्येषु। अंतः॥ घर्मः।
तप्तः। चरति। शोशुचानः॥ सु॰प्रजाः। सन्। सः। उदारे। न। सर्षत्॥ यः। न।
अश्नीयात्। अनडुहः। वि॰जानन्॥३॥ अनड्वान्। दुहे। सु॰कृतस्य। लोके॥ आ

एनम्। आ। प्याययति। पवमानः। पुरस्तात्। पर्जन्यः। धाराः। मरुतः। ऊधः। अस्य॥
यज्ञः। पयः। दक्षिणा। दोहः। अस्य॥ ४॥ यस्य। न। ईशे। यज्ञऽपतिः। न। यज्ञः॥ न।
अस्य। दाता। ईशे। न। प्रतिऽगृहीता॥ यः। विश्वऽजित्। विश्वऽभृत्। विश्वऽ
कर्मा॥ घर्मम्। नः। ब्रूत। यतमः। चतुःऽपात्॥ ५॥ येन। देवाः। स्वः। आऽरुरु
हुः। हित्वा॥ शरीरम्। अमृतस्य। नाभिम्॥ तेन। गेष्म। सुऽकृतस्य। लोकम्॥ घ
र्मस्य। व्रतेन। तपसा। यशस्यवः॥ ६॥ इन्द्रः। रूपेण। अग्निः। वहेन॥ प्रजाऽप
तिः। परमेऽस्थी॥ विऽराट्। विश्वानरे। अक्रमत॥ वैश्वानरे। अक्रमत। अनडु १९

३८

MEMORIAL

हि। अक्रमत॥ सः। अदृंहयत॥ सः। अधारयत॥ ७॥ मध्यम्। एतत्। अनडुहः॥
यत्र। एषः। वहः। आऽहितः॥ एतावत्। अस्य। प्राचीनम्॥ यावान्। प्रत्यङ्। समऽ
आहितः॥ ८॥ यः। वेद। अनडुहः। दोहान्॥ सप्त। अनुपऽदस्वतः॥ प्रऽजाम्। च।
लोकम्। च। आप्नोति॥ तथा। सप्तऽऋषयः। विदुः॥ ९॥ पत्ऽभिः। सेदिम्। अव
ऽक्रामन्॥ इरम्। जङ्घाभिः। उत्ऽखिदन्॥ श्रमेण। अनड्वान्। कीलालम्।
कीनाशः। च। अभि। गच्छतः॥ १०॥ द्वादश॥ वै। एताः। रात्रीः॥ व्रत्याः। आहुः। प्रजाऽ
पतेः॥ तत्र। उप। ब्रह्म। यः। वेद। तत्॥ वै। अनडुहः। व्रतम्॥ ११॥ दुहे। सायम्।

दुहा। प्रऽहृतः। दुहे। मध्यं। छिन्नम्। पसि॥ दोहलः। यो। अस्याः। सम्ऽयति॥ तान्। वि
ष्मै। अङ्गऽपऽदस्वतः॥१२॥७॥ ॥१॥ रोहणी। असि। रोहणी॥ अस्थ्नः। छिन्न
स्य। रोहणी। रोहय। इदम्। अरुंधति॥४॥ यत्। ते। रिष्टम्। यत्। ते। द्युत्तं। अ
स्ति॥ पेष्ट्रम्। ते। आत्मनि॥ धाता। तत्। भद्रया। पुनः॥ सम्। दधत्। परुषा। प
क्ता रुः॥२॥ सं। ते। मज्जा। मज्ज्ञा। भवतु॥ सं। ऊं इति। ते। परुषा। परुः॥ सम्। ते। मां
सस्य। विऽस्रस्तं॥ सम्। अस्थि। अपि। रोहतु॥ अस्थ। ३। मज्जा। मज्ज्ञा। सम्। धी ७२
यताम्॥ चर्मणा। चर्म। रोहतु॥ असृक्। ते। अस्थि। रोहतु॥ मांसम्। मांसे

३१

न। रोहतु॥४॥ लोम। लोम्ना। सम्। कल्पय। त्वचा। सम्। कल्पय। त्वचम्॥ असृक्
ते। अस्थि। रोहतु॥ छिन्नम्। सम्। धेहि। ओषधे॥५॥ सः। उत्। तिष्ठ। प्र। इहि। प्र।
द्रव। रथः। सुऽचक्रः। सुऽपविः। सुऽनाभिः॥ प्रति। तिष्ठ। ऊर्ध्वः॥६॥ यदि। कर्तम्।
पतित्वा। सम्ऽशश्रे॥ यदि। वा। अश्मा। प्रऽहृतः। जघान॥ ऋभुः। रथस्यऽइव॥
अङ्गानि। सम्। दधत्। परुषा। परुः॥७॥८॥१२॥ ॥उत। देवाः। अवऽहितम्॥ देवाः॥
उत्। नयथ। पुनः॥ उत। आगः। चक्रुषम्। देवाः॥ देवाः। जीवयथ। पुनः॥१॥ द्वौ।
इमौ। वातौ। वातः॥ आ। सिंधोः। आ। पराऽवतः॥ दक्षम्। ते। अन्यः। आऽवातु॥

वि। अन्यः। वातु। यत्। रपः॥२॥ आ। वात। वाहि। भेषजम्॥ वि। वात। वाहि। यत्।
रपः॥ त्वम्। हि। विश्व॰भेषजः॥ देवानाम्। दूतः। ईयसे॥३॥ त्रायन्ताम्। इमम्। दे-
वाः॥ त्रायन्ताम्। मरुताम्। गणाः॥ त्रायन्ताम्। विश्वा। भूतानि॥ यथा। अयम्।
अरपाः। असत्॥४॥ आ। त्वा। अगमम्। शंताति॰भिः॥ अथो इति। अरिष्टता-
ति॰भिः॥ दक्षम्। ते। उग्रम्। आ। अभारिषम्॥ परा। यक्ष्मम्। सुवामि। ते॥५॥
अयम्। मे। हस्तः। भगवान्॥ अयम्। मे। भगवत्॰तरः॥ अयम्। मे। विश्व॰ ७३
भेषजः॥ अयम्। शिव॰अभिमर्शनः॥६॥ हस्ताभ्याम्। दश॰शाखाभ्याम्॥ ३८

जिह्वा। वाचः। पुरः॰गवी॥ अनामयित्नु॰भ्याम्। हस्ताभ्याम्॥ ताभ्याम्। त्वा। अभि। मृ-
शामसि॥७॥७॥१३॥ अजः। हि। अग्नेः। अजनिष्ट। शोकात्॥ सः। अपश्यत्।
जनितारम्। अग्रे॥ तेन। देवाः। देवताम्। अग्रे। आयन्॥ तेन। रोहान्। रुरु-
हुः। मेध्यासः॥१॥ क्रमध्वम्। अग्निना। नाकम्॥ उख्यान्। हस्तेषु। बिभ्रतः॥ दिवः।
पृष्ठम्। स्वः। गत्वा॥ मिश्राः। देवेभिः। आद्ध्वम्॥२॥ पृष्ठात्। पृथिव्याः। अहम्। अन्त-
रिक्षम्। आ। अरुहम्॥ अन्तरिक्षात्। दिवम्। आ। अरुहम्॥ दिवः। नाकस्य। पृष्ठा-
त्। स्वः। ज्योतिः। अगाम्। अहम्॥३॥ स्वः। यन्तः। न। अप। ईक्षन्ते॥ आ। द्याम्। रोहन्ति।

रोहस्व॥इति॥यज्ञम्॥ये।विश्वतः॰धारम्॥सु॰विद्वांसः।वि॰तेनिरे॥अग्ने
प्र।इहि।प्रथमः।देवतानाम्॥चक्षुः।देवानाम्।उत।मानुषाणाम्॥इयक्ष
माणाः।भृगु॰भिः।स॰जोषाः।स्वः।यंतु।यजमानाः।स्वस्ति॥५॥अजम्।अ
नज्मि।पयसा।घृतेन॥दिव्यम्।सु॰पर्णम्।पयसम्।बृहंतम्॥तेन।गेष्म।सु॰
कृतस्य।लोकम्॥स्वः।आ॰रोहंतः।अभि।नाकम्।उत्॰तमम्॥६॥पंच॰ओ १४
दनम्।पंच॰भिः।अंगुलि॰भिः॥दर्व्या।उत्।हर।पंच॰धा।एतम्।ओदनम्॥प्रा ३५
च्याम्।दिशि।शिरः।अजस्य।धेहि॥दक्षिणायां।दिशि।दक्षिणम्।धेहि।पा

३५

र्श्वम्॥७॥प्रतीच्याम्।दिशि।भसदम्।अस्य।धेहि॥उत्तरस्याम्।दिशि।उत्तरम्।धे
हि॥पार्श्वम्॥ऊर्ध्वायाम्।दिशि।अजस्य।अनूकम्।धेहि॥दिशि।ध्रुवायाम्।
धेहि।पाजस्यम्॥अंतरिक्षे।मध्यतः।मध्यम्।अस्य॥८॥शृतम्।अजम्।शृतया।
प्र।ऊर्णुहि।त्वचा॥सर्वैः।अंगैः।सम्॰भृतम्।विश्व॰रूपम्॥सः।उत्।तिष्ठ।इ
तः।अभि।नाकम्।उत्॰तमम्॥पत्॰भिः।चतुः॰भिः।प्रति।तिष्ठ।दिक्षु॥९॥
२४॥ ॥सम्॰उत्पतंतु।प्र॰दिशः।नभस्वतीः॥सम्।अभ्राणि।वात॰जूतानि।यं
तु॥महा॰ऋषभस्य।नदतः।नभस्वतः॥वाश्राः।आपः।पृथिवीम्।तर्पयंतु॥१॥सम्।

ईरयंतु। तविषाः। सुऽदानवः॥ अपाम्। रसाः। ओषधीभिः। सचंताम्॥
वर्षस्य। सऽगाः। महयंतु। भूमिम्॥ पृथक्। जायंताम्। ओषधयः। विश्वऽरूपाः॥२
॥ सम्। ईक्षयस्व। गायतः। नभांसि॥ अपाम्। वेगासः। पृथक्। उत्। विजंताम्॥
वर्षस्य। सऽगाः। महयंतु। भूमिम्॥ पृथक्। जायंताम्। वीरुधः। विश्वऽरूपाः॥३॥
गणाः। त्वा। उप। गायंतु। मारुताः॥ पर्जन्य। घोषिणः। पृथक्॥ सऽगाः। वर्षस्य। ९५
वर्षतः॥ वर्षंतु। पृथिवीम्। अनु॥४॥ उत्। ईरयत। मरुतः। समुद्रतः। त्वेषः। अर्कः।
नभः। उत्। पातयाथ॥ महाऽऋषभस्य। नदतः। नभस्वतः॥ वाश्राः। आपः। पृथि-

४०

वीम्। तर्पयंतु॥५॥ अभि। क्रंद। स्तनय। अर्दय। उदऽधिम्॥ भूमिम्। पर्जन्य। पय-
सा। सम्। अंग्धि॥ त्वया। सृष्टम्। बहुलम्। आ। एतु। वर्षम्॥ आशारऽएषी। कृशऽ-
गुः। एतु। अस्तम्॥६॥ सम्। वः। अवंतु। सुऽदानवः॥ उत्साः। अजगराः। उत॥ मरु-
त्ऽभिः। प्रऽच्युताः। मेघाः। वर्षंतु। पृथिवीम्। अनु॥७॥ आशाम्ऽआशाम्। वि। द्यो-
तताम्॥ वाताः। वांतु। दिशःऽदिशः॥ मेघाः। सम्। यंतु। पृथिवीम्॥८॥ आपः।
विऽद्युत्। अभ्रम्। वर्षम्॥ सम्। वः। अवंतु। सुऽदानवः॥ उत्साः। अजगराः। उ-
त॥ मरुत्ऽभिः। प्रऽच्युताः। मेघाः। प्र। अवंतु। पृथिवीम्। अनु॥९॥ अपाम्। अ-

ग्निः। तुन्नतिं। समृ॰विद्वानः॥ यः। ओषधीनाम्। अधि॰पाः। बृहद्बासः। नः। वृष
म्। वृत्रताम्। जात॰वेदाः॥ ज्ञानम्। प्र॰जाभ्यः। अमृतम्। दिवः। परि॥१०॥ प्र
जा॰पतिः। सलिलात्। आ। समुद्रात्। आपः। ईरयन्। उद॰धिम्। अर्दयाति
प्र। प्यायताम्। वृष्णः। अश्वस्य। रेतः। अर्वाङ्। एतेन। स्तनयित्नुना। आ। इहि।

अचिं ११॥ अपः। नि॰सिंचन्। असुरः। पिता। नः॥ श्वसन्तः। गर्गराः। अपाम्। वरुण। अव
नीचीः। अपः। सृज॥ वदन्तु। पृश्नि॰बाहवः। मण्डूकाः। इरिणा। अनु॥१२॥ सं॰व
त्सरम्। शशयानाः॥ ब्राह्मणाः। व्रत॰चारिणः॥ वाचम्। पर्जन्य॰जिन्विताम्॥

४१

प्र। मण्डूकाः। अवादिषुः॥१३॥ उप॰प्रवद। मण्डूकि॥ वर्षम्। आ। वद। तादुरि॥ म
ध्ये। हृदस्य। प्लवस्व॥ वि॰गृह्य। चतुरः। पदः॥१४॥ खण्वखा३इ। खैमखा३इ॥
मध्ये। तदुरि॥ वर्षम्। वनुध्वम्। पितरः॥ मरुताम्। मनः। इच्छत॥१५॥ महान्तम्।
कोशम्। उत। अव। अभि। सिंच॥ सं॰विद्युतम्। भवतु। वातः। वातु॥ तन्वत
म्। यज्ञम्। बहु॰धा। वि॰सृष्टाः॥ आ॰नन्दिनीः। ओषधयः। भवन्तु॥१६॥१५॥ ट
तीयाष्टकः॥ अष्टकः॥ ॥७॥ बृहत्। एषाम्। अधि॰स्था
ता॥ अन्तिकात्॰इव। पश्यति॥ यः। स्तायत्। मन्यते। चरन्॥ सर्वम्। देवाः। इ

DR. BHAU DAJI
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

दम्। विदुः॥१॥ यः। तिष्ठति। चरति। यः। च। वंचति। यः। नि॰लायं। चरति। यः। प्र॰
तंकम्॥ द्वौ। सम्॰निषद्य। यत्। मंत्रयेते इति। राजा। तत्। वेद। वरुणः। तृ
तीयः॥२॥ उत। इयम्। भूमिः। वरुणस्य। राज्ञः। उत। असौ। द्यौः। बृहती। दूरे॰
अंता। उतो इति। समुद्रौ। वरुणस्य। कुक्षी इति। उत। अस्मिन्। अल्पे। उद
के। नि॰लीनः॥३॥ उत। यः। द्याम्। अति॰सर्पात्। परस्तात्। न। सः। मुच्यातै। व
रुणस्य। राज्ञः॥ दिवः। स्पशः। प्र। चरंति। इदम्। अस्य। सहस्र॰अक्षाः। अ
ति। पश्यंति। भूमिं॥४॥ सर्वं। तत्। राजा। वरुणः। वि। चष्टे। यत्। अंतरा। रोद

नि२

सी इति। यत्। परस्तात्॥ सम्॰ख्याताः। अस्य। नि॰मिषः। जनानाम्। अक्षान्॰इ
व। श्व॰घ्नी॥ नि। मिनोति। तानि॥५॥ ये। ते। पाशाः। वरुण। सप्त॰सप्त। त्रेधा। ति
३।शि ष्ठंति। वि॰सिताः। रुशंतः॥ छिनंतु। सर्वे। अनृतम्। वदंतम्॥ यः। सत्य॰वादी। अ
ति। तम्। सृजंतु॥६॥ शतेन। पाशैः। अभि। धेहि। वरुण। एनम्॥ मा। ते। मो
चि। अनृत॰वाक्। नृ॰चक्षः॥ आस्ताम्। जाल्मः। उदरम्। स्रंशयित्वा॥ कोशः॰
इव। अबंधः। परि॰कृत्यमानः॥७॥ यः। सम्॰आम्यः। वरुणः। यः। वि॰आम्यः॥
यः। सम्॰देश्यः। वरुणः। यः। वि॰देश्यः॥ यः। दैवः। वरुणः। यः। च। मानुषः॥ प

तेः। चा। स्मार्विः। अत्ति। स्यामि। पाशैः। असौ। आमुष्यायण। अमुष्याः। पुत्र॥
तान्। ऊं इति। ता। सर्वान्। अनु॰सं दिशामि॥ ९॥ ३॥ १६॥ ईशानाम्। त्वा। भेष
जानाम्॥ उत्॰जेषे। आ। रभामहे॥ चक्रे। सहस्र॰वीर्याम्॥ सर्वस्मै। ओषधे। त्वा
॥ १॥ सत्य॰जितम्। शपथ॰यावनीम्॥ सहमानाम्। पुनः॰सराम्॥ सर्वाः। सम्
अह्वि। ओषधीः॥ इतः। नः। पारयात्। इति॥ २॥ या। शशाप। इत्येका॥ ३॥ याम्। ते। च
क्रुः। आमे। पात्रे। याम्। चक्रुः। नील॰लोहिते। आमे। मांसे। कृत्याम्। याम्। च
क्रुः॥ तया। कृत्या॰कृतः। जहि॥ ४॥ दौः॰स्वप्न्यम्। दौः॰जीवित्यम्। रक्षः। अभ्व

म्। अराय्यः॥ दुः॰नाम्नीः। सर्वाः। दुः॰वाचः। ताः। अस्मत्। नाशयामसि॥ ५॥
क्षुध॰मारम्। तृष्णा॰मारं। अगोताम्। अनपत्य॰ताम्॥ अपामार्ग। त्वया। व
यम्॥ सर्वम्। तत्। अप। मृज्महे॥ तृष्णा॰मारम्। क्षुध॰मारम्। अथो इति।
अक्ष॰पराजयम्॥ अपामार्ग। त्वया। वयम्॥ सर्वम्। तत्। अप। मृज्महे॥ ७॥
अपामार्गः। ओषधीनाम्॥ सर्वासाम्। एकः। इत्। वशी॥ तेन। ते। मृज्मः। आ॰स्थि
तम्॥ अथ। त्वम्। अगदः। चर॥ ८॥ ३॥ १७॥ ॥ समम्। ज्योतिः। सूर्येण। अह्ना।
रात्री। सम॰वती॥ ४। कृणोमि। सत्यम्। ऊतये। अरसाः। सन्तु। कृत्वरीः॥ १॥ यः।

देवाः। कृत्याम्। कृत्वा॥ हरात्। अविदुषः। गृहम्॥ वत्सः। धारुःऽइव। मातरम्॥
तम्। प्रत्यक्। उप। पद्यताम्॥ २॥ अमा। कृत्वा। पाप्मानम्॥ यः। तेन। अन्यम्।
जिघांसति॥ अश्मानः। तस्याम्। दग्धायाम्॥ बहुलाः। फट्। करिक्रति॥ सहस्र
ऽधामन्। विऽशिखान्॥ विऽग्रीवान्। छायय। त्वम्॥ प्रति। स्म। चक्रुषे। कृत्या
म्॥ प्रियाम्। प्रियऽवते। हर॥ ४॥ अनया। अहम्। ओषध्या॥ सर्वाः। कृत्याः। अ
दूदुषम्॥ याम्। क्षेत्रे। चक्रुः। याम्। गोषु। याम्। वा। ते। पुरुषेषु॥ ५॥ यः। चका
र। न। शशाक। कर्तुम्॥ शश्रे। पादम्॥ अङ्गुरिम्॥ चकार। भद्रम्। अस्मभ्यम्॥ २८

४४

आत्मने। तपनम्। तु। सः॥ ६॥ अपामार्गः। अप। मार्ष्टु॥ क्षेत्रियम्। शपथः। च। यः॥
अपऽअह। यातुऽधानीः॥ अप। सर्वाः। अराय्यः॥ ७॥ अपऽमृज्य। यातुऽधाना
न्॥ अप। सर्वाः। अराय्यः॥ अपामार्ग। त्वया। वयम्॥ सर्वम्। तत्। अप। मृज्म
हे॥ ८॥ १८॥ उतो इति। असि। अबन्धुऽकृत्॥ उतो इति। असि। नु। जामिऽ
कृत्॥ उतो इति। कृत्याऽकृतः। प्रऽजाम्॥ नडम्ऽइव। आ। छिन्धि। वार्षिकम्॥ १॥
ब्राह्मणेन। परिऽउक्ता। असि॥ कण्वेन। नार्षदेन॥ सेनाऽइव। एषि।
त्विषिऽमती॥ न। तत्र। भयम्। अस्ति॥ यत्र। प्रऽआप्नोषि। ओषधे॥ २॥ अग्रम्।

एषि। उषधी नाम्॥ ज्योतिषा॑ऽइव। अभि॰दीपयन्॥ उत। त्राता। असि। पाकस्य॥
अथो इति। हंता। असि। रक्षसः॥३॥ यत्। अदः। देवाः। असुरान्॥ त्वया। अग्रे
नि॰अकुर्वत॥ ततः। त्वम्। अधि। उषधे॥ अपामार्गः। अजायथाः॥४॥ वि॰भिंद
ती। शत॰शाखा॥ वि॰भिंदन्॥ नाम। ते। पिता॥ प्रत्यक्। वि। भिंधि। त्वम्॥ यः। अस्मान्। नमूछ
अभि॰दासति॥५॥ असतः। भूम्याः। समम्। अभवत्॥ तत्। याम्। एति। महत्। व्यचः॥
तत्। वै। ततः। वि॰धूपायत्॥ प्रत्यक्। कर्तारम्। ऋच्छतु॥६॥ प्रत्यङ्। हि। सं॰ब 80
भूविथ॥ प्रतीचीन॰फलः। त्वम्॥ सर्वान्। मत्। शपथान्। अधि। वरीयः। यवय।

।४। दुधम्॥७॥ शतेन। मा। परि। पाहि। सहस्रेण। अभि। रक्ष। मा॥ इंद्रः। ते। वीरुधाम्।
पते॥ उग्रः। उग्मानम्। आ। दधत्॥८॥१९॥ आ। पश्यति। प्रति। पश्यति॥ परा।
पश्यति। पश्यति॥ दिवम्। अंतरिक्षम्। आत्। भूमिम्॥ सर्वम्। तत्। देवि। प
श्यति॥१॥ तिस्रः। दिवः। तिस्रः। पृथिवीः॥ षट्। च। इमाः। प्र॰दिशः। पृथक्॥ त्वया।
अहम्। सर्वा। भूतानि॥ पश्यानि। देवि। उषधे।२। दिव्यस्य। सु॰पर्णस्य॥ तस्
य। हा। असि। कनीनिका॥ सा। भूमिम्। आ। रुरोहिथ॥ वह्यम्। श्रांता। वधूः॰
इव॥३॥ तां। ताम्॥ मा। सहस्र॰अक्षः। देवः॥ दक्षिणे। हस्ते। आ। दधत्॥ तया।

अहम् । सर्वम् । पश्यामि ॥ यः । च । सूद्रः । उत । आर्यः ॥५॥ आविः । कृणुष्व । रूपाणि ।
मा । आत्मानम् । अप । गूहथाः ॥ अथो इति । सहस्रऽचक्षो इति सहस्रऽचक्षो । त्वम् ।
प्रति । पश्याः । किमीदिनः ॥ पा । दर्शया । मा । यातुऽधानान् ॥ दर्शय । यातुऽधान्यः ॥
पिशाचान् । सर्वान् । दर्शय ॥ इति । त्वा । आ । रभे । ओषधे ॥६॥ कश्यपस्य । चक्षुः । अ
सि ॥ शुन्याः । च । चतुःऽअक्षाः ॥ वीध्रे । सूर्यम्ऽइव । सर्पन्तं ॥ मा । पिशाचम् । तिरः ।
करः ॥७॥ उत् । अग्रभम् । परिऽपानात् ॥ यातुऽधानम् । किमीदिनम् ॥ तेन । अ
हम् । सर्वम् । पश्यामि ॥ उत । शूद्रम् । उत । आर्यम् ॥८॥ यः । अन्तरिक्षेण । पतति ॥

दिवम् । यः । च । अतिऽसर्पति ॥ भूमिम् । यः । मन्यते । नाथम् ॥ तम् । पिशाचम् । प्र । द
र्शय ॥९॥७॥२०॥ तृतीयोऽनुवाकः ॥ अनुवाके सूक्तानि ५ । ऋ॰ ४२ । अथ त्रयोद
श ॥ सप्तमः प्रपाठकः ॥ ॥७॥ आ । गावः । अग्मन् । उत । भद्रम् । अक्रन् ॥ सीदन्तु ।
गोऽस्थे । रणयन्तु । अस्मे इति ॥ प्रजाऽवतीः । पुरुऽरूपाः । इह । स्युः ॥ इन्द्राय । पूर्वीः ।
उषसः । दुहानाः ॥१॥ इन्द्रः । यज्वने । गृणते । च । शिक्षते ॥ उप । इत् । ददाति । न ।
स्वम् । मुषायति ॥ भूयःऽभूयः । रयिम् । इत् । अस्य । वर्धयन् ॥ अभिन्ने । खिल्ये ।
नि । दधाति । देवऽयुम् ॥२॥ न । ताः । नशन्ति । न । दभाति । तस्करः ॥ न । आसाम् । आ

MEMORIAL

मित्रः।व्यथिः।आ।दधर्षति॥देवान्।च।याभिः।यजते।ददाति।च।ज्योक्।इत्।ता
भिः।सचते।गोऽपतिः।सह॥३॥न।ताः।अर्वा।रेणुऽककाटः।अश्नुते।न।संस्कृ
तऽत्रम्।उप।यंति।ताः।अभि॥उरुऽगायम्।अभयम्।तस्य।ताः।अनु।गावः।
मर्त्तस्य।वि।चरंति।यज्वनः॥४॥गावः।भगः।गावः।इंद्रः।मे।इच्छात्॥गावः।सो
मस्य।प्रथमस्य।भक्षः॥इमाः।याः।गावः।सः।जनासः।इंद्रः॥इच्छामि।हृदा।म
नसा।चित्।इंद्रम्॥५॥यूयम्।गावः।मेदयथ।कृशम्।चित्।अश्रीरम्।चित् ८२
कृणुथ।सुऽप्रतीकम्॥भद्रम्।गृहम्।कृणुथ।भद्रऽवाचः॥बृहत्।वः।वयः।

उच्यते।सभासु॥६॥प्रजाऽवतीः।सुऽयवसे।रुशंतीः॥शुद्धाः।अपः।सुऽप्रपा
णे।पिबंतीः॥मा।वः।स्तेनः।ईशत।मा।अघऽशंसः॥परि।वः।रुद्रस्य।हेतिः।
वृणक्तु॥७॥३॥२१॥इमम्।इंद्र।वर्द्धय।क्षत्रियम्।मे॥इमम्।विशाम्।एक
ऽवृषम्।कृणु।त्वम्॥निः।अमित्रान्।अक्ष्णुहि।अस्य।सर्वान्॥तान्।रंधय।अ
स्मै।अहम्ऽउत्तरेषु॥१॥आ।इमम्।भज।ग्रामे।अश्वेषु।गोषु॥निः।तम्।भज
वयं यः।अमित्रः।अस्य॥वर्ष्म।क्षत्राणाम्।अयम्।अस्तु।राजा॥इंद्र।शत्रुम्।रंधय।सर्वम्।
अस्मै॥२॥अयम्।अस्तु।धनऽपतिः।धनानाम्॥अयम्।विशाम्।विश्पतिः।अ

स्तु।राजा॥अस्मिन्।इंद्र।महि।वर्चांसि।धेहि।अवर्चसम्।कृणुहि।शत्रुम्।अ
स्य॥३॥अस्मै।द्यावापृथिवी इति।भूरि।वामम्।दुहाथाम्॥घर्मदुघेइवेति
घर्मदुघे॰इव।धेनू इति॥अयम्।राजा।प्रियः।इंद्रस्य।भूयात्॥प्रियः।गवाम्।
ओषधीनाम्।पशूनाम्॥४॥युनज्मि।ते।उत्तर॰वंतम्।इंद्रं।येन।जयंति।न।
परा॰जयंते॥यः।त्वा।करत्।एक॰वृषम्।जनानाम्॥उत।राज्ञाम्।उत्॰त ८२
मम्।मानवानाम्॥५॥उत्तरः।त्वम्।अधरे।ते।स॰पत्नाः॥ये।के।च।राजन्।
प्रति॰शत्रवः।ते॥एक॰वृषः।इंद्र॰सखा।जिगीवान्॥शत्रु॰यताम्।आ।भर।

भोजनानि॥६॥सिंह॰प्रतीकः।विशः।अद्धि।सर्वाः॥व्याघ्र॰प्रतीकः।अव।बा
धस्व।शत्रून्॥एक॰वृषः।इंद्र॰सखा।जिगीवान्॥शत्रु॰यताम्।आ।खिद।
भोजनानि॥७॥२२॥अग्नेः।मन्वे।प्रथमस्य।प्र॰चेतसः॥पांच॰जन्यस्य।ब
हु॰धा।यम्।इंधते॥विशः॰विशः।प्रविशिवांसम्।ईमहे॥सः।नः।मुंचतु।
अंहसः॥१॥यथा।हव्यम्।वहसि।जात॰वेदः॥यथा।यज्ञम्।कल्पयसि।प्र॰जानन्॥
एव।देवेभ्यः।सु॰मतिम्।नः।आ।वह।सः॥२॥यामन्॰यामन्।उप॰युक्तम्।
वहिष्ठम्॥कर्मन्॰कर्मन्।आ॰भगम्।अग्निम्।ईडे।रक्षः॰हनम्॥यज्ञ॰

हंधम्।व्हृत०आहुतम्।सः॥३॥स्तु०जातम्।जात०वेदसम्॥अग्निम्।वैश्वानरम्।
वि०न्नम्॥हव्य०वाहम्।हवाम्।हसः॥४॥येन।ऋषयः।बलम्।अघोतयन्।युजा॥
जा॥येन।असुराणाम्।अयुवंत।मायाः॥येन।अग्निना।पणीन्।इंद्रः।जिणा।
णा।यसः॥पायन।देवाः।अमृतंम्।अनु०अविंदन्॥येन।उषधीः।मधु०मतीः।
अलएवन्॥येन।देव्यस्य।इदम्।प्र०दिवाः।स्वः।आ०अनरन्।सः॥६यस्य।
इदम्।प्र०दिशियत्।वि०रावत्॥यत्।जातम्।जनितव्यम्।वा।केवलम्॥स्तो
मि।अग्निं।नाथितः।जोहवीमि।सः॥७॥७॥२३॥७॥इंद्रस्य।मन्महे।शश्वत्।इ

त्।अस्य।मन्महे॥वृत्र०घ्नः।स्तोमाः।उप।मा।इमे।आ।अगुः॥यः।दाशुषः।सु
कृतः।हवम्।एति।सः॥१॥यः।उग्रीणम्।उग्र०बाहुः।ययुः॥यः।दानवा
नाम्।बलम्।आ०रुरोज॥येन।जिताः।सिंधवः।येन।गावः।सः॥२॥यः।च
र्षणि०प्रः।वृषभः।स्वः०विद्॥यस्मै।ग्रावाणः।प्र०वदंति।नृम्णम्॥यस्य।अ
ध्वरः।सप्त०होता।मदिष्टः।सः॥३॥यस्य।अवृशासः।ऋषभासः।उक्षणः॥य
स्मै।मीयंते।स्वरवः।स्वः०विदे॥यस्मै।शुक्रः।पवते।ब्रह्म०शुंभितः।सः॥४॥
यस्य।जुष्टिम्।सोमिनः।कामयंते॥यम्।हवंत।इषु०मंतम्।गो०इष्टौ॥

यस्मिन्। अर्कः। शिश्रिये। यस्मिन्। ऽ जनासः।।५। यः। प्रथमः। कर्मऽकृत्याय।
यज्ञे।। यस्य। वीर्यम्। प्रथमस्य। अनुऽबुद्धम्।। येन। उत्ऽयतः। वज्रः। अ
भि॰आऽयत। अहिम्। सः।।६।। यः। सम्ऽग्रामान्। नयति। सम्। युधे। वशी।।
यः। पुष्टानि। सम्ऽसृजति। द्वयानि।। स्तौमि। इन्द्रम्। नाथितः। जोहवीमि।। सः।
नः। मुंचतु। अंहसः।।७।।ठ।।२५।। वायोः। सवितुः। विदथानि। मन्महे। यौ। आ
त्मन्ऽवत्। विभृथः। यौ। च। रक्षथः।। यौ। विश्वस्य। परिभू इति परि॰भू। बभू ८५
वथुः।। तौ। नः। मुंचतम्। अंहसः।।१।। ययोः। सम्ऽख्याता। वरिमा। पार्थिवानि।।

याभ्याम्। रजः। युपितम्। अंतरिक्षे।। ययोः। प्र॰आयम्। न। अनु॰आनशे। कः।
चन।। तौ।।२।। तव। व्रते। नि। विशंते। जनासः।। त्वयि। उत्ऽइते। प्र। ईरते। चित्रऽभा
नौ इति चित्र॰भानौ।। युवम्। वायो इति। सविता। च। भुवनानि। रक्षथः।। तौ।।
३।। अप। इतः। वायो इति। सविता। च। दुः॰कृतम्। अप। रक्षांसि। शिमिदाम्। च।
सेधतम्।। सम्। हि। ऊर्जया। सृजथः। सम्। बलेन।। तौ।।४।। रयिम्। मे। पोषम्।
सविता। उत। वायुः।। तनू इति। दक्षम्। आ। सुवताम्। सु॰शेवम्।। अयक्ष्म॰
ताऽतिम्। महः। इह। धत्तम्।। तौ।।५।। प्र। सु॰मतिम्। सवितः। वायो इति। ऊतये।।

मह्स्वंतम्।मंस्सरम्।मादयाथः॥अर्वाक्।वामस्य।प्र॰वतः।नि।यछतम्।तौ॥
॥द्वा३५॥श्रेष्ठाः।नः।आ।शिषः।देवयोः।क्षमन्।अस्थिरन्॥स्तौमि।देवम्।सवि
तारम्।च।वास्तुम्।तौ।नः॥७॥७॥२५॥पंचमानुवाकः॥स्त।पञ्चा३५॥अपराः।पं
च॥मन्चो।वाम्।द्यावापृथिवी।इति।स्तु॰तो।जसौ॥सञ्चेतसौ।यइति।अप्रथया
म्।अमिता।योजनानि॥प्रतिस्थे इति।प्रति॰स्थे।हि।अनवतम्।वस्त्नाम्।तेइति।
नः॥१प्रतिस्थे इति।प्रति॰स्थे।हि।अनवतम्।वस्त्नाम्॥प्रहेहे इति।प्र॰हेहे।देवी ८६
इति।सुजगे इति।सु॰जगे।उरुची इति॥द्यावापृथिवी इति।नवतम्।मास्योन
51

इति।तेइति॥२॥असंतापे इत्यसम्॰तापे।सु॰तपसौ।हुवे।अहम्॥उर्वी इति।
गंन्नी।रइति।कवि॰ति।नमस्ये इति॥२ येइति।अमृतम्।बिभृथः।येइति।स
वौ।षि॥येइति।स्त्रोत्याः।बिभृथः।येइति।मनुष्यान्।ध॥येइति।उस्त्रियाः।बिभृथः।
येइति।वनस्पतीन्॥ययोः।वाम्।विश्वा।भुवनानि।अंतः॥५येइति।कीलालेन।त
र्पयथः।यइति।घृतेन॥याभ्याम्।ऋते।न।किम्।वन।शकु॰वंति॥द्यावापृथि
वी इति।नवतम्।मास्योने इति।तेइति॥छायता।मा।इदम्।अत्ति॰शोचति॥येन
येन।वा।ऋतम्॥पोरुषया।तान।देवान्॥स्तौमि।द्यावापृथिवी इति।नाधितः॥

BHU
MEMORIAL

जोऽहवीमि॥ तेइति। नः। मुंचंतु। अंहसः॥७॥७॥२६। मरुताम्। मन्वे। अधि। मे।
ब्रुवंतु॥ प्र। इमम्। वाजम्। वाज॰सातौ। अवंतु॥ आशून्ऽइव। सुऽयमान्।
अह्वे। ऊतये॥ ते। नः। मुंचंतु। अंहसः॥१॥ उत्सम्। अक्षितम्। वि॰अचंति। ये।
सदा। ये। आ॰सिंचंति। रसम्। ओषधीषु॥ पुरः। दधे। मरुतः। पृश्नि॰मातॄन्।
ते॥२। पयः। धेनूनाम्। रसम्। ओषधीनाम्। जवम्। अर्वताम्। कवयः। ये। इन्व
थ॥ शग्माः। भवंतु। मरुतः। नः। स्योनाः। ते॥३। अपः। समुद्रात्। दिवम्। उत्। व
हंति॥ दिवः। पृथिवीम्। अभि। ये। सृजंति॥ ये। अत्॰भिः। ईशानाः। मरुतः। च

५२

रंति। ते॥४। ये। कीलालेन। तर्पयंति। ये। घृतेन॥ ये। वा। वयः। मेदसा। सम्ऽसृ
जंति॥ ये। अत्॰भिः। ईशानाः। मरुतः। वर्षयंति॥ ते॥५। यदि। इत्। इदम्। मरु
तः। मारुतेन॥ यदि। देवाः। दैव्येन। ईदृक्। आर। यूयम्। ईशिध्वे। वसवः। तस्य।
निः॰कृतेः। ते॥६। तिग्मम्। अनीकम्। विदितम्। सहस्वत्॥ मारुतम्। शर्धः। पृत
नासु। उग्रम्॥ स्तौमि। मरुतः। नाधितः। जोहवीमि॥ ते। नः। मुंचंतु। अंहसः॥७॥८॥
२७॥ भवाशर्वौ। मन्वे। वाम्। तस्य। वित्तम्॥ ययोः। वाम्। इदम्। प्र॰दिशि। यत्।
वि॰राजति॥ यौ। अस्य। ईशाथेइति। द्वि॰पदः। यौ। चतुः॰पदः॥ तौ। नः। मुंचतम्।

अंहसः॥१॥ यथा॥ अत्रिं॰ अधि॥ उत्। यतः। हृरा। विनं॥ यौ। विद्विता। इषुं॰न्त ताम्।
असिष्टे॥२॥ सहस्र॰अंहै। वृत्र॰हना। कुवे। अहम्॥ हरण वृती। इति हरण॰
वृती। स्तुवन्। नमि। कृ यौ॥३॥ यौ। आरेता। प्येइत्या॰रेता। धा। बहुं। साकम्।
अयै॥ श्रा। वा। इत। अस्यां। क्षम्। अत्रिं॰ नां। जनेषु॥४॥ यः। वधत्। न। अप॰प
घातकः। वनां। अंतः। द। विष्टुः। उत। मा। इषेषु॥५॥ यः। क्रत्वा॰ इतः। मूर्ने॰
ता। या। तु॰ध्मनः॥ नि। तस्मिन्। धनाम्। वनाम्। उ यौ॥ यौ। अस्य। ई शाथ। इति
छिं॰पदः। यौ। वचः॰पदः॥ तो॥६॥ अधिनः। ब्रूतम्। एतनासु। उ यौ॥ सम्। व ८८

५३

जुना। स्वजतम्। ...ः। किमीदौ॥ स्तोमि। नवा। शार्वौ। नाथितः। ओहवीमि। तौ॥७॥ ८॥
२८। मध्वो। वाम्। मित्रावरुणा। ऋत॰वृधौ॥ सं॰चेतसौ। द्रुह्वणा। यौ। नुदथ
इति॥ प्र। सत्य॰वानम्। अवथः। नरेषु। तौ॥१॥ सं॰चेतसौ। द्रुह्वणः। यौ। नुद
थ इति॥ प्र। सत्य॰वानम्। अवथः नरेषु। यौ। गच्छथः। नृ॰वद्वसौ। बभ्रुक्वणा॥
स्तुतम्। तौ॥२॥ यौ। अंगिरसम्। अवथः। यौ। अगस्तिम्॥ मित्रावरुणा। जमदग्नि॰
अग्निम्। अत्रिम्॥ यौ। कश्यपम्। अवथः। यौ। वसिष्ठम्। तौ॥३॥ यौ। श्याव॰
अश्वम्। अवथः। वध्रि॰अश्वम्॥ मित्रावरुणा। पुरु॰मीढम्। अत्रिम्॥ यौ।

विऽमदम्। अवथः। सम्ऽवध्रिम्। ता॥४॥ यौ। नरऽवाजम्। अवथः। यौ। गवि
ष्टिरं॥ विश्वामित्रम्। वरुणा। मित्रा। कुत्सम्॥ यौ। कक्षीवंतम्। अवथः। प्र। उत। क
एवम्। ता॥५॥ यौ। मेधऽअतिथिम्। अवथः। यौ। त्रिऽशोकम्॥ मित्रावरुणा। उ
शनाम्। काव्यम्। यौ। यौ। गोतमम्। अवथः। प्र। उत। मुद्गलम्। ता॥६॥ ययोः।
रथः। सत्यऽवर्त्मा। ऋजुऽरश्मिः॥ मिथुया। चरंतम्। अभिऽयाति। दूषयन्॥ स्तौ
मि। मित्रावरुणौ। नाथितः। जोहवीमि॥ ता। नः। मुंचतं। अंहसः॥७॥३॥२५॥ अह
म्। रुद्रेभिः। वसुऽभिः। चरामि॥ अहम्। आदित्यैः। उत। विश्वऽदेवैः॥ अहम्। ५८

मित्रावरुणा। उभा। बिभर्मि॥ अहम्। इंद्राग्नी इति। अहम्। अश्विना। उभा॥१॥ अ
हम्। राष्ट्री। सम्ऽगमनी। वसूनाम्॥ चिकितुषी। प्रथमा। यज्ञियानाम्॥ ताम्। मा।
देवाः। वि। अदधुः। पुरुऽत्रा॥ भूरिऽस्थात्राम्। भूरि। आऽवेशयंतीः॥२॥ अहम्। एव।
स्वयम्। इदम्। वदामि। जुष्टम्। देवानाम्। उत। मानुषाणाम्॥ यम्। कामये। त
म्ऽतम्। उग्रम्। कृणोमि॥ तम्। ब्रह्माणम्। तम्। ऋषिम्। तम्। सुऽमेधाम्॥३॥ मया।
सः। अन्नम्। अत्ति। यः। विऽपश्यति॥ यः। प्राणिति। यः। ईम्। शृणोति। उक्तम्॥
अमंतवः। माम्। ते। उप। क्षियंति॥ श्रुधि। श्रुत। श्रद्धिऽवम्। ते। वदामि॥४॥ अ

हम्।रुद्राय।धनुः।आ।तनोमि।।ब्रह्मऽद्विषे।शरवे।हन्तवै।ऊं इति।।अहम्।
जनाय।सऽमदम्।कृणोमि।।अहम्।द्यावापृथिवी इति।आ।विवेश।।५।।अह
म्।सोमम्।आहनसम्।बिभर्मि।।अहम्।त्वष्टारम्।उत।पूषणम्।भगम्।।अ
हम्।दधामि।द्रविणम्।हविष्मते।।सुप्रऽअव्ये।यजमानाय।सुन्वते।।६।।अह
म्।सुवे।पितरम्।अस्य।मूर्द्धन्।।मम।योनिः।अप्ऽसु।अन्तः।समुद्रे।।ततः।वि
तिष्ठे।भुवनानि।विश्वा।।उत।अमूम्।द्याम्।वर्ष्मणा।उप।स्पृशामि।।७।।अह
म्।एव।वातःऽइव।प्र।वामि।।आऽरभमाणा।भुवनानि।विश्वा।।परः।दिवा।प २०

मूल्यार

रः।एना।पृथिव्या।।एतावती।महिम्ना।सम्।बभूव।।८।।३०।। षष्ठोनुवाकः।।
स्त०५।ऋ।१२।६८।अष्टमः प्रपाठकः।। ।।८।।त्वया।मन्यो इति।सऽरथम्।आऽ
रुजन्तः।।हर्षमाणाः।धृषितासः।मरुत्वन्।।तिग्मऽइषवः।आयुधा।सम्ऽशिशा
नाः।।उप।प्र।यन्तु।नरः।अग्निऽरूपाः।।१।।अग्निःऽइव।मन्यो इति।त्विषितः।सह
स्व।।सेनाऽनीः।नः।सहुरे।हूतः।।एधि।हत्वाय।शत्रून्।वि।भजस्व।वेदः।।ओजः
मिमानः।वि।मृधः।नुदस्व।।२।।सहस्व।मन्यो इति।अभिऽमातिम्।अस्मे।।रुज
न्।मृणन्।प्रऽमृणन्।प्र।इहि।शत्रून्।।उग्रम्।ते।पाजः।ननु।आ।रुरुध्रे।।वशी।

५६क

वशाम्।नयासि।एकं॰जा।चे॥३॥एकः।बहूनाम्।असि।मन्यो इति।ईडिता॥वि
शंऽविशम्।युद्धाय।सम्।सं॰शिशाधि॥अकृत्तं॰रुक्।त्वया।युजा।वयम्।द्युमं॰
मंतम्॥घोषम्।विं॰जयाय।कृण्मसि॥४॥विजेषं॰कृत्।इंद्रः॰इव।अनवं॰ब्र
वः॥अस्माकम्।मन्यो इति।अधि॰पाः।भव।इह॥प्रियम्।ते।नाम।सहुरे।गृणी
मसि॥विद्म।तम्।उत्सम्।यतः।आ॰बभूथ॥५॥आ॰भूत्या।सहजाः।वज्र।साय
क॥सहः।बिभर्षि।अभि॰भूते।उत्॰तरम्॥क्रत्वा।नः।मन्यो इति।सह।मेदी।एधि॥
महा॰धनस्य।पुरुहूत।सम्॰सृजि॥६॥सम्॰सृष्टम्।धनम्।उभयम्।

५६

सम्॰आकृतम्॥अस्मभ्यम्।धत्ताम्।वरुणः।च।मन्युः॥भियः।दधानाः।हृदये
षु।शत्रवः॥परा॰जितासः।अप।नि।लयंताम्॥७॥८॥३॥यः।ते।मन्यो इति।
अविधत्।वज्र।सायक॥सहः।ओजः।पुष्यति।विश्वम्।आनुषक्॥साह्याम।दास
म्।आर्यम्।त्वया।युजा।वयम्।सहः॰कृतेन।सहसा।सहस्वता॥१॥मन्युः।
इंद्रः।मन्युः।एव।आस।देवः॥मन्युः।होता।वरुणः।जात॰वेदाः॥मन्युः।विशः।
ईडते।मानुषीः।याः॥पाहि।नः।मन्यो इति।तपसा।सं॰जोषाः॥२॥अभि।इहि।
मन्यो इति।तवसः।तवीयान्॥तपसा।युजा।वि।जहि।शत्रून्॥अमित्र॰हा।
वृत्र॰हा।

MEMORIAL

वृत्र॰हा। दस्यु॰हा। च। विश्वा। वसूनि। आ। भर। त्वम्। नः॥३॥ त्वम्। हि। मन्यो इति। अभिभूति॰
ओजाः॥ स्वयम्॰भूः। भामः। अभिमाति॰सहः॥४॥ विश्व॰चर्षणिः। सहुरिः। सहा
वान्। अस्मासु। ओजः। पृतनासु। धेहि॥४॥ अभागः। सन्। अप। परा॰इतः। अस्मि॥
तव। क्रत्वा। तविषस्य। प्र॰चेतः। तम्। त्वा। मन्यो इति। अक्रतुः। जिहीड। ४। अहम्॥
स्वा। तनूः। बल॰दावा। नः। आ। इहि॥५॥ अयम्। ते। अस्मि। उप। नः। आ। इहि। अर्वा
ङ्॥ प्रतीचीनः। सहुरे। विश्व॰धायः। मन्यो इति। वज्रिन्। अभि। नः। आ। ववृत्स्व॥
हनाव। दस्यून्। उत। बोधि। आपेः॥६॥ अभि। प्र। इहि। दक्षिणतः। भव। नः। अध॥

वृत्राणि। जंघनाव। भूरि। जुहोमि। ते। धरुणम्। मध्वः। अग्रम्। उभौ। उप॰अं
शु। प्रथमा॥ पिबाव॥७॥६॥३२॥ ॥ अप। नः। शोशुचत्। अघम्॥ अग्ने। शुशुग्धि॥
आ। रयिम्॥ अप। नः। शोशुचत्। अघम्॥१॥ सु॰क्षेत्रिया। सुगातु॰या॥ वसु॰या॥
च। यजामहे॥२॥ प्र। यत्। भन्दिष्ठः। एषाम्। प्र। अस्माकासः। च। सूरयः॥३॥ प्र। यत्। ते।
अग्ने। सूरयः॥ जायेमहि। प्र। ते। वयम्॥४॥ प्र। यत्। अग्नेः। सहस्वतः॥ विश्वतः। यं
ति। भानवः॥५॥ त्वम्। हि। विश्वतः॰मुख॥ विश्वतः। परि॰भूः। असि॥६॥ द्विषः। नः। वि
श्वतः॰मुख॥ अति। नावा॰इव। पारय॥७॥ सः। नः। सिन्धुम्॰इव। नावा॥ अति। प

षि। स्वस्तये॥ अपानः। शोशुचत्। अघम्॥ ८॥ ७॥ २३॥ ॥ ब्रह्म। अस्य। शीर्षम्।
बृहत्। अस्य। पृष्ठम्॥ वामऽदेव्यम्। उदरम्। ओदनस्य॥ छंदांसि। पक्षौ। मुख
म्। अस्य। सत्यम्॥ विष्टारी। जातः। तपसः। अधि। यज्ञः॥ १ अनस्थाः। पूताः। पव
नेन। शुद्धाः॥ शुचयः। शुचिम्। अपि। यंति। लोकम्॥ न। एषाम्। शिश्नम्। प्र।
दहति। जातऽवेदाः॥ स्वःऽगे। लोके। बहु। स्त्रैणम्। एषाम्॥ २ विष्टारिणं।
ओदनम्। ये। पचंति॥ न। एनान्। अवर्तिः। सचते। कदा। चन॥ आस्ते। यमे।
उप। याति। देवान्। सम्। गंधर्वैः। मदते। सोम्येभिः॥ ३ विष्टारिणम्। ओद ८-३

४५

नम्। ये। पचंति॥ न। एनान्। यमः। परि। मुष्णाति। रेतः॥ रथी। ह। भूत्वा। रथऽयाने।
ईयते॥ पक्षी। ह। भूत्वा। अति। दिवः। सम्। एति॥ ४ एषः। यज्ञानाम्। विऽततः।
वहिष्ठः॥ विष्टारिणम्। पक्त्वा। दिवम्। आ। विवेश॥ आंडीकम्। कुमुदम्। सम्।
तनोति। बिसम्॥ शालूकम्। शफकः। मुलाली॥ एताः। त्वा। धाराः। उप। यंतु।
सर्वाः॥ स्वःऽगे। लोके। मधुऽमत्। पिन्वमानाः॥ उप। त्वा। तिष्ठंतु। पुष्करि
णीः। सम्ऽअंताः॥ घृतऽह्रदाः। मधुऽकूलाः। सुरऽउदकाः॥ क्षीरेण। पू
र्णाः। उदकेन। दध्ना॥ ६ चतुरः। कुंभान्। चतुःऽधा। ददामि॥ क्षीरेण। पू

र्सीन्।उदकेन।दध्ना।एताः।त्वा।धाराः।उप।यंतु।सर्वाः॥स्वः॰गे।लोके।
मधु॰मत्।पिन्वमानाः।उप।त्वा।तिष्ठंतु।पुष्करिणीः।सम्॰अंताः॥७॥इमम्।
ओदनम्।नि।दधे।ब्राह्मणेषु।विष्टारिणम्।लोक॰जितम्।स्वः॰गम्॥
सः।मे।मा।क्षेष्ट।स्वधया।पिन्वमानः॥विश्व॰रूपा।धेनुः।काम॰दुघा।मे।अ
स्तु॥८॥७॥३४॥यम्।ओदनम्।प्रथम॰जाः।ऋतस्य।प्रजा॰पतिः।तपसा।ब्र
ह्मणे।अपचत्॥यः।लोकानाम्।वि॰धृतिः।न।अभि॰रिषात्॥तेन।ओदनेन।अ
ति।तराणि।मृत्युम्॥१॥येन।अतरन्।भूत॰कृतः।अति।मृत्युम्॥यम्।अनु॰

अविन्दन्।तपसा।श्रमेण॥यम्।पपाच।ब्रह्मणे।ब्रह्म।पूर्वम्।तेन॥२॥यः।
दाधार।पृथिवीम्॥विश्व॰भोजसम्॥यः।अंतरिक्षम्।आ॰अपृणात्।रसेन॥
यः।अस्तभ्नात्।दिवम्।ऊर्ध्वः।महिम्ना॥तेन॥३॥यस्मात्।मासाः।निः॰मिताः।त्रिं
शत्॰अराः।सम्॰वत्सरः।यस्मात्।निः॰मितः।द्वादश॰अरः॥अहोरात्राः।यम्।
परि॰यंतः।न।आपुः।तेन॥४॥यः।प्राण॰दः।प्राण॰दवान्।बभूव॥यस्मै।
लोकाः।घृत॰वंतः।क्षरंति॥ज्योतिष्मतीः।प्र॰दिशः।यस्य।सर्वाः।तेन॥५॥
यस्मात्।पक्वात्।अमृतम्।सम्॰बभूव॥यः।गायत्र्याः।अधि॰पतिः।बभूव॥

यस्मिन्। वेदाः। नि॰हिताः। विश्व॰रूपाः॥ तेन। ओदनेन। अति। तराणि। मृत्युम्।
॥६॥ अव। बाधे। द्विषन्तम्। देव॰पीयुम्॥ स॰पत्नाः। ये। मे। अप। ते। भवन्तु॥
ब्रह्म॰ओदनम्। विश्व॰जितम्। पचामि॥ शृण्वन्तु। मे। श्रत्॰दधानस्य। दे
वाः॥७॥७॥३॥ सप्तमनुवाक॥ स्त्रा।पा।ऊ।३७ सप्तवा पिबोध्यसयः॥ ७॥ ॥ तान्।
सत्य॰ओजाः। प्र। दहतु। अग्निः। वैश्वानरः। वृषा॥ यः। नः। दुरस्यात्। दिप्सात्।
च। अथो इति। यः। नः। अराति॰यात्॥१ यः। नः। दिप्सत्। अदिप्सतः। दिप्सतः।
यः। च। दिप्सति॥ वैश्वानरस्य। दंष्ट्रयोः। अग्नेः। अपि। दधामि। तम्॥२॥ ये। ५

५०

बानूर

आ॰गरे। मृगयन्ते। प्रति॰क्रोशे। अमा॰वास्ये। क्रव्य॰अदः। अन्यान्। दिप्स
२८ तः। सर्वान्। तान्। सहसा। सहे॥३॥ सहे। पिशाचान्। सहसा। एषाम्। द्रविणम्।
ददे॥ सर्वान्। दुरस्यतः। हन्मि॥ सम्। मे। आ॰कूतिः। ऋध्यताम्॥४॥ ये। देवाः।
तेन। हासन्ते। सूर्येण। मिमते। जवम्॥ नदीषु। पर्वतेषु। ये। सम्। तैः। प
शु॰भिः। विदे॥५॥ तपनः। अस्मि। पिशाचानाम्। व्याघ्रः। गोमताम्॰इव॥ श्वा
नः। सिंहम्॰इव। दृष्ट्वा। ते। न। विन्दन्ते। नि॰अञ्चनम्॥६॥ न। पिशाचैः। सम्।
शक्नोमि। न। स्तेनैः। न। वनर्गु॰भिः॥ पिशाचाः। तस्मात्। नश्यन्ति। यम्। अहम्

बृहत्॥ सहः। दाधार। रोदसी इति॥४॥ गिरीन्। अज्रान्। रेपः

स्वः। नृ ऽपते। चुना॥ सः। राज सि। पुरु ऽस्तुत॥ एकः। वृत्राणि। जिघ्नसे॥
इंद्रं। जैत्रा। श्रवस्या। च। यंतवे॥६॥७॥ वयम्। उ। त्वा। तदित्। अर्थाः। इंद्र। मं ३२
मिदं पुरे त्यक्रतेः॥४ इंद्राय। साम। गायत॥ विप्राय। बृहते। बृहत्॥
। धर्म ऽकृते। विपः ऽचिते। पनस्यवे॥५ त्वं। इंद्र। अभि ऽभूः। असि।
। त्वं। सूर्यं। अरोचयः॥ विश्व ऽकर्मा॥ विश्व ऽदेवः। महान्। असि॥
वि ऽभ्राजन्। ज्योतिषा। स्वः। अगच्छः। रोचनं। दिवः॥ देवाः।
ते। इंद्र। सख्याय। येमिरे॥ १ तमवृत्तिप्रशपयतेतितिस्रः॥६
इ मा। नु। कं। भुवना। सीसधाम॥ इंद्रः। च। विश्वे। च। देवाः॥ य
ज्ञं। च। नः। तन्वं। च। प्र ऽजां। च। आदित्यैः। इंद्रः। सह। सीक्लृ ८
पाति॥१॥ आदित्यैः। इंद्रः। स ऽगणः। मरुत् ऽभिः॥ अस्माकं। भूतु। अ
विता। तनूनां॥ हत्वाय। देवाः। असुरान्। यत्। आयन्॥ देवाः। दे
व ऽत्वं। अभि ऽरक्षमाणाः॥ २ प्रत्यंचं। अर्कं। अनयन्। शचीभि
॥ आत्। इत्। स्वधां। इषिरां। परि। अपश्यन्॥ अया। वाजं। दे
व ऽहितं। सनेम॥ मदेम। शत ऽहिमाः। सु ऽवीराः॥ ३ विद्यत्ते॥
वसु। मत्थि। दाशुषे॥ ईशानः। अप्रति ऽस्कुतः। इंद्रः। अंग॥४
कदा। मर्तं। अराधसं। पदा। क्षुंपं। इव। स्फुरत्॥ कदा।
नः। शुश्रवत्। गिरः। इंद्रः। अंग॥ म यः। विता। हि। त्वा। बहु ऽभ्यः।

ऽपा॥ सुत॒ऽवान्। आ॒ऽविवा॑सति॥ उ॒ग्रं। तत्। पु॒न्यते। शाव॒ः। इंद्रः।
ऽअं॒ग॥६ यः। इंद्र॒। सोम॒ऽपातमः॥ मदः॥ शविष्ठ। चेतति॥ येन।
हंसि। नि। अ॒त्रिणं। तं। ई॒महे॥७ येन। दश॒ऽग्वं। अधि॒ऽगुं॥ वे
प॒यंतं। स्वः॒ऽनरं॥ येन। स॒मुद्रं। आवि॒थ। तं। ई॒महे॥८ ये
न॥ सिंधुं। म॒हीः। अ॒पः॥ रथान्ऽइव। प्र॒ऽचोदयः॥ पंथां। ऋ
तस्य। यातवे। तं। ई॒महे॥९॥६३॥ आ। पा। इंद्र। नः। गृध्यि। प्रिय॒ः॥
सत्रा॒ऽजित। अगो॑ह्यः॥ गिरिः। न। वि॒श्वतः। पृथुः। पतिः। दिवः॥
१ ऽवृ॒धि। हि। अ॒स्य। सोम॒ऽपाः॥ उ॒भे इति। व॒भ्रू॒। यद्। तदपीड़ ८२

तिं॥ इंद्रं। अप॒स्तिं। सु॒न्वतः। वृधः। पतिः। दिवः॥ रथं। हि। शश्वतं
तं॥ इंद्रः। द॒र्त्रा। पु॒रां। अ॒सि। हं॒ता। दस्योः। मनोः॥ २ ऽपा। इ
त्ऽऊं इति। मद्वः। म॒दिं॒ऽतरं॥ सिंच। वा। वा॒। अधर्योः इति। अंधसः॥
एव। हि। वीरः। स्तवते। स॒दाऽवृधः॥ ३ इंद्र। स्था॒तः। ह॒रीणां॥
न॒किः। ते। पू॒र्व्यऽस्तुतिं॥ उत्। आ॒नंश। श॒वसा। न। भ॒दना॥
४ तं। वः। वाजानां। पतिं। अहूमहि। श्रव॒स्यवः॥ अप्रा॒युऽभिः।
य॒ज्ञेभिः। व॒वृधेन्यं॥५॥१४॥ एतो इति। नु। इंद्रं। स्तवाम
सरवायः। स्तोम्यं। नरं॥ कृ॒ष्टीः। यः। विश्वाः। अ॒भि। अस्ति। ए

कः। इन्द्र॥१= प्रगोऽरूदत्तय। गोऽनृषे॥ घृता पोद स्यं वच
:॥ घृतात्। स्वादीयः। मधुनः। च। वोचत॥२ पस्यो= प्रमिता
नि। वीर्या॥ न। राधः। परिऽएतवे॥ ज्योतिः। न। विश्वं= रभि
= अस्ति। दक्षिणा॥३ स्तुहि। इन्द्रं। व्यश्वऽवत॥= अ
नूर्मिं। वाजिनं। यमं॥= अर्यः। गयं। मंहमानं। वि। दाशुषे॥
॥ एव। नूनं। उप। स्तुहि॥ वैयश्व। दशमं। नवं॥ सुऽविद्वां
सं। चर्कृत्यं। चरणीनां॥५ वेत्थ। हि। निःऽऋतीनां॥ वज्रऽ
हस्त। परिऽवृजं॥ अहःऽअहः। शुन्ध्युः। परिपदांऽइव॥ ४२

ऋ॥ अच्छा। दक्ष॥ पंचमोनुवाकः॥१०॥ वृनोति। हि। सुन्वन्। क्षयं। परी
णसः॥ सुन्वानः। हि। स्म। यजति। अव। द्विषः। देवानां। अव
द्विषः॥ सुन्वानः। इत्। सिसासति॥ सहस्रा। वाजी। अवृतः॥१
सुन्वानाय। इंद्रः। ददाति। आऽभुवं॥ रयिं। ददाति। आऽभुवं॥
मा। इत्। इति। भवः। मत्सत। अस्ति। तानि। पौंस्या॥ सना। भुव
न्। द्युम्नानि। मा। उत। जारिषुः। मत्सत। पुरा। उत। जाति
षु॥ यत्। वः। चित्रं। युगेऽयुगे॥ नव्यं। घोषात्। अमर्त्यं
= अस्मासु। तत्। मरुतः। यत्। च। दुस्तरं॥ दिद्युत। यत्।

चा।तु स्तारं॥२=अग्निं।होतारं।मन्यादास्वंतं॥वसुं।सूनुं।स
हसः।जात०वेदसं॥विप्रं।न।जात०वेदसं॥यः।ऊर्ध्वया।सु
०अध्वरः॥देवः।देवाच्या।कृपा॥घृतस्य।वि०भ्राष्टिं।अनु
।वष्टि।शोचिषा॥आ०जुह्वानस्य।सर्पिषः॥२यज्ञैः।सं०मि
श्लाः।पृषतीभिः।ऋष्टि०भिः॥यामन्।शुभ्राः।अंजिषु।प्रि
याः।उत॥आ०सद्य।बर्हिः।भरतस्य।सूनवः॥पोत्रात्।
आ।सोमं।पिबत।दिवः।नरः॥४ आ।वक्षि।देवान्।
इह।विप्र।यक्षि।च॥उशन्।होतः।नि।सद।योनिषु। ४४

त्रिषु॥प्रति।वीहि।प्र०स्थितं।सोम्यं।मधु॥पिब।आग्नी
ध्रात्।तव।भागस्य।तृप्णुहि॥एषः।स्यः।ते।तन्वः।नृम्ण
०वर्धनः॥सहः।ओजः।प्र०दिवि।बाह्वोः।हितः।तुभ्यं।
सुतः।मघ०वन्।तुभ्यं।आ०भृतः॥त्वं।अस्य।ब्राह्मणा
त्।आ।तृपत्।पिब॥६यं।ऊं इति।पूर्वं।अहुवे।तं।इ
दं।हुवे॥सः।इत्।ऊं इति।हव्यः।ददिः।यः।नाम।पत्य
ते॥अध्वर्यु०भिः।प्रस्थितं।सोमं।द्रविणः०दः।पिब।ऋ
तु०भिः॥७॥२॥१७॥सुरूपकृत्नुं ऊतये इति तिस्रः।इ

परां। इहि। विग्रं। अस्तृतं॥ इंद्रं। पृच्छ। विपःऽचितं॥ यः। ते।
सखिऽभ्यः। आ। वरं॥ ४ उत। ब्रुवंतु। नः। निदः॥ निः। अन्य
तः। चित्। आरत॥ दधानाः। इंद्रे। इत्। दुवः॥ ५ उत।
नः। सुऽभगान्। अरिः॥ वोचेयुः। दस्म। कृष्टयः॥ स्याम।
इत्। इंद्रस्य। शर्मणि॥ ६ आ। ईं। आशुं। आशवे। भ
र॥ यज्ञऽश्रियं। नृऽमादनं॥ पतयत्। मंदयत्ऽसखं॥
७ अस्य। पीत्वा। शतक्रतो इति शतऽक्रतो॥ घनः। वृत्राणां
अभवः॥ प्र। आवः। वाजेषु। वाजिनं॥ ८॥ तं। त्वा। वा
जेषु। वाजिनं॥ वाजयामः। शतक्रतो इति शतऽक्रतो॥ ४५

धनानां। इंद्र। सातये॥ ९ यः। रायः। अवनिः। महान्॥ सुऽपारः।
सुन्वतः। सखा॥ तस्मै। इंद्राय। गायत॥ १० आ। तु। आ। इत। नि। सी
दत॥ इंद्रं। अभि। प्र। गायत॥ सखायः। स्तोमऽवाहसः॥ ११ पुरुऽ
तमं। पुरूणां॥ ईशानं। वार्याणां॥ इंद्रं। सोमे। सचा। सुते॥ १२
॥ ६७॥ सः। घ। नः। योगे। आ। भुवत्॥ सः। राये। सः। पुरंऽध्यां॥
गमत्। वाजेभिः। आ। सः। नः॥ १ यस्य। संऽस्थे। न। वृण्वते॥
हरी इति। समत्ऽसु। शत्रवः॥ २ सुतऽपाव्ने। सुताः। इमे॥ शु
चयः। यंति। वीतये॥ सोमासः। दधिऽआशिरः॥ ३ त्वं। सुतस्य।

पीतये॥ सुघः। हृद्धः। अजा पृथ्वाः॥ इंद्र। ज्येष्ठां। म। स। क्रतो इति
स्वऽक्रतो॥४ आ। चा। विरांत्रा। आ। रावः। सोमासः। इंद्र। गिर्वणः।
रां। ते। संतु। प्रऽचेतसे॥ ५ चां। स्तोमाः। अवीरुधन्॥ चां। उक्था
। शत्ऽक्रतो इति शतऽक्रतो॥ चां। वर्द्धंतु। नः। गिरः॥ ६ अक्षितऽ
ऊतिः। सनेत्। इमं॥ वाजं। इंद्रः। सहस्रिणं॥ यस्मिन्। विश्वानि
पौंस्या॥ ७ मा। नः। मर्ताः। अभि। द्रुहन्॥ तनूनां। इंद्र। गिर्वणः।
ईशानः। यवय। वधं॥ ८ युजंति ब्रध्नमरुषमिति तिस्रः॥ ११ अ
दइत्यस्य धाम निति त्सेकौ॥ १२ छा उदूः॥ वीळु। विळु। आरुजत्नु ऽभिः॥ ४६

गुहां। चित्। इंद्र। वह्निऽभिः॥ अविंदः। उस्रियाः। अनु॥ १ देवऽ
यंतः। यथा। मतिं॥ अच्छ। विदत्ऽवसुं। गिरः॥ महां। अनूषत
श्रुतं॥ २ इंद्रेण। सं। हि। दृक्षसे इति दृक्षसे॥ ३ अतः। परिऽज्मन्। आ। गहि॥
दिवः। वा। रोचनात्। अधि॥ सं। अस्मिन्। ऋंजते। गिरः॥ ५ इतः।
वा। सातिं। ईमहे॥ दिवः। वा। पार्थिवात्। अधि॥ इंद्रं। महः। वा।
रजसः॥ ६ इंद्रमिद्गाथिनो बृहदिति तिस्रः॥ ८ इंद्र। वाजेषु।
नः। अव॥ सहस्रऽप्रधनेषु। च॥ उग्रः। उग्राभिः। ऊतिऽभिः॥ १२॥
इंद्रं। वयं। महाऽधने॥ इंद्रं। अर्भे। हवामहे॥ युजं। वृत्रेषु। वज्रिणं॥

तिं५

११॥ सः। नः। वृषन्। अमुं। चुरुं॥ सत्राऽदावन्। अप। वृधि॥ अस्मभ्यं
अप्रतिऽस्कुतः॥१२॥ तुंजेऽतुंजे। ये। उतऽतरे॥ स्तोमाः। इंद्रस्य। वज्रिणः॥
न। विंधे। अस्य। सुऽस्तुतिं॥१३॥ वृषा। यूथाऽइव। वंसगः॥ कृष्टीः। इ
यर्ति। ओजसा॥ ईशानः। अप्रतिऽस्कुतः॥१४ यः। एकः। चर्षणीनां॥ वसू
नां। इरज्यसि॥ इंद्रः। पंच। क्षितीनां॥१५ इंद्रं। वः। विश्वतः। परि। ह्येकां॥१६
आ। इंद्र। सानसिं। रयिं॥ सऽजित्वानं। सदाऽसहं॥ वर्षिष्ठं। ऊतये। भर
७॥ नि। येन। मुष्टिऽहत्यया॥ नि। वृत्रा। रुणधामहे॥ त्वाऽऊतासः। नि।
अर्वता॥१८॥ इंद्र। त्वाऽऊतासः। आ। वयं॥ वज्रं। घना। ददीमहि॥ जये
म। सं। युधि। स्पृधः॥१९ वयं। शूरेभिः। अस्तृऽभिः॥ इंद्र। त्वया। युजा।

५

वयं॥ ससह्याम। पृतन्यतः॥२०॥ छ॥७०॥ महान्। इंद्रः। परः। च। नु
॥ महिऽत्वं। अस्तु। वज्रिणे॥ द्यौः। न। प्रथिना। शवः॥१॥ सऽमोहे
वा। ये। आशत॥ नरः। तोकस्य। सनितौ॥ विप्रासः। वा। धियाऽयवः॥
२॥ यः। कुक्षिः। सोमऽपातमः॥ समुद्रःऽइव। पिन्वते॥ उर्वीः। आप
ः। न। काकुदः॥३ एवा। हि। अस्य। सूनृ तेतिति स्वः॥ ६ इंद्र। आ। इ
हि। मत्सि। अंधसः॥ विश्वेभिः। सोमपर्वऽभिः॥ महान्। अभिष्टिः। ओ
जसा॥७ आ। ईं। एनं। सृजत। सुते॥ मंदिं। इंद्राय। मंदिने॥ चक्रिं।
विश्वानि। चक्रये॥८॥ मत्स्व। सुऽशिप्र। मंदिऽभिः॥ स्तोमेभिः। विश्वऽच
र्षणे॥ सचा। एषु। सवनेषु। आ॥९ असृग्रं। इंद्र। ते। गिरः॥ प्रति

वां। उत। प्रऽशस्तत॥ अजोषाः। वृषभं। पतिं॥१०॥ सं। चोदय। चित्रं।
अर्वाक्॥ राधः। इंद्र। वरेण्यं॥ असत्। इत्। ते। विऽभु। प्रऽभु॥११॥ अ-
स्मान्। सु। तत्रं। चोदय॥ इंद्र। राये। रभस्वतः॥ तुविऽद्युम्न।
यशस्वतः॥१२॥ सं। गोऽमत्। इंद्र। वाजऽवत्॥ अस्मे इति। पृथु। श्र-
वः। बृहत्॥ विश्वऽआयुः। धेहि। अक्षितं॥१३॥ अस्मे इति। धेहि। श्र-
वः। बृहत्॥ द्युम्नं। सहस्रऽसातमं॥ इंद्र। ताः। रथिनीः। इषः॥१४॥
वसोः। इंद्रं। वसुऽपतिं॥ गीःऽभिः। गृणंतः। ऋग्मियं॥ होम। गंता-
रं। ऊतये॥१५॥ सुतेऽसुते। निऽओकसे॥ बृहत्। बृहते। आ। इत्। अरि-
ः। इंद्राय। शूषं। अर्चति॥१६॥१८॥२४ छो नुवाकः॥ विश्वेषु। हि। त्वा। स-

वनेषु। तुंजते॥ समानं। एकं। वृषऽमन्यवः। पृथक्॥ स्वरिति स्वः।
सनिष्यवः। पृथक्। तं। त्वा। नावं। न। पर्षणिं॥ शूषस्य। धुरि। धीमहि॥ इं-
द्रं। न। यज्ञैः। चितयंतः। आयवः॥ स्तोमेभिः। इंद्रं। आयवः॥१॥ विऽत्वा। ततस्रे। मि-
थुना। अवस्यवः॥ व्रजस्य। साता। गव्यस्य। निःऽसृजः॥ सक्षंतः। इंद्र। निः-
ऽसृजः॥ यत्। गव्यंता। द्वा। जना॥ स्वः। यंता। संऽऊहसि॥ आविः। करिक्रत्।
वृषणं। सचाऽभुवं॥ वज्रं। इंद्र। सचाऽभुवं॥ उत। इति। नु। अस्य॥
उषसः। जुषेत। हि॥ अभिऽक्षस्य। बोधि। हविषः। हवीमऽभिः। स्वःऽसाता।
हवीमऽभिः॥ यत्। इंद्र। हंतवे। मृधः॥ वृषा। वज्रिन्। चिकेतति॥ अ- सिर
स्य। अस्य। वेधसः। नवीयसः॥ मन्म। श्रुधि। नवीयसः॥३७॥
तुभ्यं। इत्। इमा। भुवना। शूर। विश्वा॥ तुभ्यं। ब्रह्माणि। वर्धना। कृ-

लो मि॥ चं। न०त्रिः। हव्यं। विश्वथा। अस्ति॥ ४ नु। चित्। नु। ते। मन्यमानस्य। द
स्मा॥ उत्। अनु। वंति। महिमानं। उग्र॥ न। वीर्यं। इंद्र। ते। न। राधः। प्रवः। म
हे। महि०वृधे। भरध्वं। प्र०चेतसे। प्र। सु०मतिं। कृणुध्वं॥ विशः। पूर्वीः। प्र।
चर। चर्षणि०प्राः॥ ५ यदा। वज्रं। हिरण्यं। इत्। अथ। रथं॥ हरी इति। यं।
अस्य। वहतः। वि। सूरि०भिः॥ आ। तिष्ठति। मघ०वा। सनंश्रुतः। इंद्रः। वा
जस्य। दीर्घ०श्रवसः। पतिः॥ ६ सो इति। चित्। नु। वृष्टिः। यूथ्या। स्वा। स
चां॥ इंद्रः। श्मश्रूणि। हरिता। अभि। प्रुष्णुते॥ अव। वेति। सु०क्षयं। सु
ते। मधु॥ उत्। इत्। धूनोति। वातः। यथा। वना॥ ७ यः। वाचा। वि०वाचः।
मृध्र०वाचः॥ पुरु। सहस्रा। अशिवा। जघान॥ तत्०तत्। इत्। अस्य। पौंस्यं।
गृणीमसि॥ पिता०इव। यः। तविषीं। ववृधे। शवः॥ ८ त्वं। रथ। चित्। अनाशस्तः।

इव। समसि॥ त्वं। सत्य॥ गोषु। अश्वेषु। शुभ्रिषु॥ सहस्रेषु। तुवि०मघ॥ ९॥
शिप्रिन्। वाजानां। पते॥ शची०वः। तव। दंसना॥ १ नि। स्वापय। मिथु०दृशा॥
सस्तां। अबुध्यमाने इति॥ २ सस। संतु। त्याः। अरातयः॥ बोधंतु। शूर। रातयः॥
४॥ सं। इंद्र। गर्दभं। मृण॥ नुवंतं। पापया। अमुया॥ पतताति। कुंडृणाच्या।
दूरं। वातः। वनात्। अधि॥ सर्वं। परि०क्रोशं। जहि। जंभय। कृकदाश्वं॥
७॥ ७४ विचातत सुइत्यवो॥ १ विदुः। ते। अस्य। वीर्यस्य। पूरवः॥ पुरः।
यत्। इंद्र। शारदीः। अव०अतिरः॥ सस०हानः। अव०अतिरः॥ शासः।
तं। इंद्र। मर्त्यं। अयज्युं। शवसः। पते॥ २ महीं। अमुष्णाः। पृथिवीं। इ
माः। अपः। मंदसानः। इमाः। अपः॥ ३ आ। ता। इत्। नु। ते। अस्य। वीर्यस्य। चक्रि

रन् । मदेषु । वृषन् । उत् । ऋजसे ॥ यत्र । आविथ ॥ सखि॰यतः । यत्र । आविथ ॥
चकर्थ । कारं । एभ्यः ॥ पृतनासु । प्र॰वंतवे ॥ ते । अन्यां॰अन्यां । नद्यं । सनिष्ण
त ॥ श्रवस्यंतः । सनिष्णत ॥ ३ ॥ ३ ॥ ७ ॥ ५ ॥ वने । न । वा । यः । नि । अधायि । चाकन् ।
शुचिः । वां । स्तोमः । भुरणौ । अजीगरिति ॥ यस्य । इत् । इंद्रः । पुरु॰दिनेषु । होता
नृणां । नर्यः । नृ॰तमः । क्षपा॰वान् ॥ १ ॥ प्र । ते । अस्याः । उषसः । प्र । अपरस्याः ॥ नृ
तौ । स्याम । नृ॰तमस्य । नृणां ॥ अनु । त्रि॰शोकः । शतं । आ । अवहत् । नॄन् ॥
कुत्सेन । रथः । यः । असत् । ससु॰वान् ॥ कः । ते । मदः । इंद्र । रंत्यः । भूत् ॥
दुरः । गिरः । अभि । उग्रः । वि । धाव ॥ कत् । वाहः । अर्वाक् । उप । मा । मनीषा ॥
आ । त्वा । शक्यां । उप॰मं । राधः । अन्नैः ॥ ३ ॥ कत् । ऊं इति । द्युम्नं । इंद्र । त्वा॰वतः ।
नॄन् ॥ कया । धिया । करसे । कत् । नः । आ । अगन् ॥ मित्रः । न । सत्यः । उरु॰गाय ।
भृत्यै । अन्ने । समस्य । यत् । असन् । मनीषाः ॥ ४ ॥ प्र । ईरय । सूरः । अर्थं । न । पारं ।
ये । अस्य । कामं । जनिधाःइव । ग्मन् ॥ गिरः । च । ये । ते । तुवि॰जात । पूर्वीः ॥ न
रः । इंद्र । प्रति॰शिक्षंति । अन्नैः ॥ ५ मात्रे इति । नु । ते । सुमिते इति सु॰मिते । इंद्र ।
पूर्वी इति ॥ द्यौः । मज्मना । पृथिवी । काव्येन ॥ वराय । ते । घृत॰वंतः । सुतासः । स्वा
द्मन् । भवंतु । पीतये । मधूनि ॥ ६ आ । मध्वः । अस्मै । असिचन् । अमत्रं ॥ इंद्रा
य । पूर्णं । सः । हि । सत्य॰राधाः ॥ सः । ववृधे । वरिमन् । आ । पृथिव्याः ॥ अभि । क्रत्वा ।
नर्यः । पौंस्यैः । च ॥ ७ वि । आनट् । इंद्रः । पृतनाः । सु॰ओजाः ॥ आ । अस्मै । यतंते ।
सख्याय । पूर्वीः ॥ आ । स्म । रथं । न । पृतनासु । तिष्ठ ॥ यं । भद्रया । सु॰
मत्या । चोदयासि । ८ ॥ २६ ॥ आ । सत्यः । यातु । मघ॰वान् । ऋजीषी ॥ द्रवं
तु । अस्य । हरयः । उप । नः ॥ तस्मै । इत् । अंधः । सुसुम । सु॰दक्षं ॥

५०

DR. BHAU DAJI MEMORIAL
डा० भाऊ दाजी स्मारक

इंद्र। अभि॰पि॰चो। वरतो। गृणानः॥ अवंस्य। शूर। अप्र॰दाने। न। अंतः॥ अस्मि
न्। नः। अघ। सवने। मंदध्यै॥ शंसाति। उक्थं। उशना। इव। वेधाः॥ चिकितुषे।
असुर्याय। मन्म॥४ कविः। न। निण्यं। विदथानि। साधन्। वृषा। यत्। सेकं। वि॰
पिपानः। अर्चात्॥ दिवः। इत्था। जीजनत्। सप्त। कारून्॥ अह्ना। चित्। चक्रुः। व
युनाः। गृणंतः॥६ स्वः। यत्। वेदि। सु॰दृशीकं। अर्कैः॥ महि। ज्योतिः। रुरुचुः। य
त्। ह। वस्तोः॥ अंधा। तमांसि। दुधिता। वि॰चक्षे॥ नृ॰भ्यः। चकार। नृ॰तमः।
अभिष्टौ॥७ ववक्षे। इंद्रः। अमितं। ऋजीषी॥ उभे इति। आ। पप्रौ। रोदसी इति
महि॰त्वा। अतः। चित्। अस्य। महिमा। वि। रेचि॥ अभि। यः। विश्वा। भुवना।
बभूव॥८ विश्वानि। शक्रः। नर्याणि। विद्वान्॥ अपः। रिरेच। सखि॰भिः। नि॰
कामैः॥ अश्मानं। चित्। ये। बिभिदुः। वचः॰भिः॥ व्रजं। गो॰मंतं। उशिजः। वि
वव्रुः॥९ अपः। वृत्रं। वव्रि॰वांसं। परा। अहन्॥ प्र। आवत्। ते। व ५१

ॐ। पृथिवी। स॰चेताः। प्र। अर्णांसि। समुद्रियाणि। ऐनोः। पतिः। भवन्। शव
सा। शूर। धृष्णो इति॥१ अपः। यत्। अद्रिं। पुरु॰हूत। दर्दः॥ आविः। भुवत्।
सरमा। पूर्व्यं। ते॥ सः। नः। नेता। वाजं। आ। दर्षि। भूरिं॥ गोत्रा। रुजन्। अं
गिरः॰भिः। गृणानः॥८॥३०॥ तत्। वः। गाय। सुते। सचा॥ पुरु॰हू
ताय। सत्वने॥ शं। यत्। गवे। न। शाकिने॥१ न। घ। वसुः। नि। यमते
। दानं। वाजस्य। गो॰मतः॥ यत्। सीं। उप। श्रवत्। गिरः॥२ कुवि
त्॰सस्य। प्र। हि। व्रजं॥ गो॰मंतं। दस्यु॰हा। गमत्॥ शचीभिः।
अप। नः। वरत्॥३॥३१॥ इंद्र। क्रतुं। नः। आ। भर॥ पिता। पुत्रेभ्यः।
यथा॥ शिक्ष। नः। अस्मिन्। पुरु॰हूत। यामनि॥ जीवाः। ज्योतिः।

अशीमहि॥ २॥ मा। नः। अज्ञाताः। वृजनाः। दुः०आध्यः॥ मा। अशिवासः। अव। क्रमुः॥ त्वया। वयं। प्र०वतः। शश्वतीः। अपः। अति। शूर। तरामसि॥ ३॥ ३।७९ इंद्र। ज्येष्ठं। नः। आ। भर। ओजिष्ठं। पपुरि। श्रवः॥ येन। इमे इति। चित्र। वज्र०हस्त। रोदसी इति। आ। उभे इति। सु०शिप्र। प्राः॥ १ त्वां। उग्रं। अवसे। चर्षणि०सहं। राजन्। देवेषु। हूमहे॥ विश्वा। सु। नः। विथुरा। पिब्दना। वसो इति॥ अमित्रान्। सु०सहान्। कृधि॥ २।८०॥ यत्। द्यावः। इंद्र। ते। शतं॥ शतं। भूमीः। उत। स्युः। इति। स्युः॥ न। त्वा। वज्रिन्। सहस्रं। सूर्याः। अनु॥ न। जातं। अष्ट। रोदसी इति॥ १ आ। पप्राथ। महिना। वृष्ण्या। वृषन्॥ विश्वा। शविष्ठ। शवसा॥ अस्मान्। अव। मघ०वन्। गो०मति। व्रजे॥ वज्रिन्। चित्राभिः। ऊति०भिः॥ २।८१। यदिंद्र।

यावतः। च॥ एतावत्। अहं। ईशीय॥ स्तोतारं। इत्। दिधिषेय। रदवसो इति रद०वसो॥ न। पाप०त्वाय। रासीय॥ १ शिक्षेयं। इत्। महयते। दिवे०दिवे॥ रायः। आ। कुहचित्०विदे॥ नहि। त्वत्। अन्यत्। मघ०वन्। नः। आप्यं। वस्यः। अस्ति। पिता। च। न॥ २।८२॥ इंद्र। त्रि०धातु। शरणं॥ त्रि०वरूथं। स्वस्ति०मत्॥ छर्दिः। यच्छ। मघवत्०भ्यः। च। मह्यं। च॥ यवय। दिद्युं। एभ्यः॥ १ ये। गव्यता। मनसा। शत्रुं। आ०दभुः॥ अभि०प्रघ्नंति। धृष्णु०या॥ अध। स्म। नः। मघ०वन्। इंद्र। गिर्वणः॥ तनू०पाः। अंतमः। भव॥ २।८३॥ इंद्र। आ। याहि। चित्रभानो इति चित्र०भानो॥ सुताः। इमे। त्वा०यवः॥ अण्वी

भिः। तना। पूतासः॥ १ धिया। इषितः॥ विप्र०जूतः। सुत०वतः॥
उप। ब्रह्माणि। वाघतः॥ तूतुजानः। उप। ब्रह्माणि। हरि०वः॥ सु
ते। दधिष्व। नः। चनः॥ [illegible] ४ मा। चित्। अन्यत्। वि। शंसत॥
सखायः। मा। रिषण्यत॥ इंद्रं। इत्। स्तोत। वृषणं। सचा। सुते
मुहुः। उक्था। च। शंसत॥ १ अव०क्रक्षिणं। वृषभं। यथा। अजुरं
गां। न। चर्षणि०सहं॥ वि०द्वेषणं। सं०वननो। उभयं०करं॥ मं
हिष्ठं। उभयाविनं॥ त्वा। जनाः। इमे॥ नाना। हवंते। ऊतये॥
अस्माकं। ब्रह्म। इदं। इंद्र। भूतु। ते॥ अहा। विश्वा। च। वर्धनं॥
३ वि। तर्तूर्यंते। मघ०वन्। विपः०चितः॥ अर्यः। विपः। जनानां॥

उप। क्रमस्व। पुरु०रूपं। आ। भर॥ वाजं। नेदिष्ठं। ऊतये॥ ४
[illegible]। ८५ ब्रह्मणा। ते। ब्रह्म०युजा। युनज्मि॥ हरी इति। सखाया। सध
०मादे। आशू इति॥ स्थिरं। रथं। सु०खं। इंद्र। अधि०तिष्ठन्॥
प्र०जानन्। विद्वान्। उप। याहि। सोमं॥ १ [illegible]। ८६ [illegible]
अरुणं। दुग्धां। अंशुं॥ ऊहांतेन। वृषभाय। क्षितीनां॥ गोः। यात
वेदीयान्। अप०वर्ण। नां। इंद्रः॥ विश्वाहा। यातु। सुत०सोमं। इ ३८
च्छन्॥ १ यत्। दधिषे। प्र०दिवि। चारु। अन्नं। दिवे०दिवे। पीति
इत्। अस्य। वक्षि॥ उत। हृदा। उत। मनसा। जुषाणः॥ उशन्
इंद्र। प्र०स्थितान्। पाहि। सोमान्॥ २ जज्ञानः। सोमं। सहसे

प्रऽपाथ॥ प्र। ते। माता। महिमानं। उवाच॥ अत्र। इंद्र। प्रऽपाथ। उरु।
अंतरिक्षं॥ मुधा। देवेभ्यः। वरिवः। चकर्थ॥ इत्। पुरा। पोधपाः।
महतः। मन्यमानान्॥ साहोमाताने। आकु०त्रिः। शश्वदान
॥ पत। वा। न०षि। वृतः। इंद्र। अभि०मुख्याः॥ तो। चपा। अत्र जिंसो
श्रवसः। जयेम॥४ प्र। इंद्रस्य। वोचं। प्रथमा। कृतानि॥ प्र। नूतना।
मघ०वा। या। चकार॥ यदा। इत्। अदेवीः। असहिष्ट। मायाः।
अथ। अभवत्। केवलः। सोमः। अस्य॥५ तव। इदं। विश्वं। अभि।
तः। पशव्यं॥ यत्। पश्यसि। चक्षसा। सूर्यस्य॥ गवां। असि।
गो०पतिः। एकः। इंद्र॥ भक्षीमहि। ते। प्र०यतस्य। वस्वः॥६
बृहस्पतेः। बृहस्पतिः॥ यः। तस्तंभ। सह

सा। वि। ज्मः। अंतान्॥ बृहस्पतिः। त्रि०सधस्थः। रवेण॥ तं। प्रत्नासः। ऋ
षयः। दीध्यानाः॥ पुरः। विप्राः। दधिरे। मंद्र०जिह्वं॥१ धुन०इतयः। सु०प्र
केतं। मदंतः॥ बृहस्पते। अभि। ये। नः। ततस्रे॥ पृषंतं। सृप्रं। अदब्धं।
ऊर्वं॥ बृहस्पते। रक्षतात्। अस्य। योनिं॥२ बृहस्पते। या। परमा। परा०
वत्॥ अतः। आ। ते। ऋत०स्पृशः। नि। सेदुः॥ तुभ्यं। खाताः। अवताः।
अद्रि०दुग्धाः॥ मध्वः। श्चोतंति। अभितः। वि०रप्शं॥३ बृहस्पतिः। प्र
थमं। जायमानः॥ महः। ज्योतिषः। परमे। वि०ओमन्॥ सप्त०आस्यः।
तुवि०जातः। रवेण॥ वि। सप्त०रश्मिः। अधमत्। तमांसि॥४ सः। सु
स्तुभा। सः। ऋक्वता। गणेन॥ वलं। रुरोज। फलि०गं। रवेण॥ बृहस्प
तिः। उस्रियाः। हव्य०सूदः॥ कनिक्रदत्। वावशतीः। उत्। आजत्॥

एव। पित्रे। विश्वऽदेवाय। वृष्णे। यज्ञैः। विधेम। नमसा। हविःऽभिः।
बृहस्पते। सुऽप्रजाः। वीरऽवन्तः। वयं। स्याम। पतयः। रयीणां॥६॥ स इत्
=परस्ताद् इव। सु। अन्तरं। गा यं। =अस्मे। नृषन्। इव। प्रा। तरा। स्तो
मौ। =अस्मै॥ वाचा। विप्राः। तरत। वाचं। =अर्यः। नि। रमय। जरितः। रितो
यामे। इन्द्र। ते हे न। गां। उपा। शिक्ष। सखा। यं। प्र। बोधया। जरित
आरं। इन्द्रे। क्रोशीन। मुएं। वसना। निः। श्रेष्ठं। =आ। वयो। मघऽदेयो
सूरे॥२ कि। =अंगा। या। मघऽवन्। जोजं। =आहुः। शिशीहि। नो। शिशाय
। वा। सूलो पि॥ =अप्रतिष्ठा। ममा। धीः। अस्तु। शक्र। वसुऽविदं
वर्गी। इन्द्र। =आ। नरा। नः॥३ यां। जनाः। मम। सत्येषु। इन्द्र। सं
तस्थानाः। वि। ह्वयन्ते। सं॰इन्द्र॥ =अत्र। युजं। कृणुते। यः। हवि

MEMORIAL

५४

मान्॥ न। =असुन्वता। सख्यं। वष्टि। शूरः॥४ धनं। न। स्पन्द्रं। बहुलं।
यः। =अस्मै। तीव्रान्। सोमान्। =आऽसुनोति। प्रयस्वान्। तस्मै। शत्रू
न्। सुऽतुकान्। प्रातः। =अह्नः। नि। सु॰=अष्ट्रान्। युवति। हन्ति। वृ
त्रं॥ ५। यस्मिन्। वयं। दधिम। शंसं। इन्द्रे। यः। शिश्राय। मघऽवा।
कामं। =अस्मे इति॥ =आरात्। चित्। सन्। भयतां। =अस्य। शत्रुः। नि।
=अस्मै। द्युम्ना। जन्या। नमन्तां॥६ =आरात्। शत्रुं। =अप। बाधस्व। दूरं।
उग्रः। यः। शंबः। पुरु॰हूत। तेन। =अस्मे इति। धेहि। यव॰मत्। गो॰
मत्। इन्द्र॥ कृधि। धियं। जरित्रे। वाज॰रत्नां॥७ प्र। यं। =अन्तः। वृ
ष॰सवासः। =अग्मन्। तीव्राः। सोमाः। बहुलऽअन्ताः। इन्द्रं।

नः। अप्रहा। द्रामा नौ मघ्वं वा। नि। यंसत्॥ नि। स्रुचते। वहति। भूरि। वामं। ः
उत। प्रहां। अतिऽदीव्ना॥१०॥ बृहस्पतिर्नः परि पातु पश्चात्॥११॥ ॥ ८८ ॥ यः। अद्रि
ऽभित्। प्रथमऽजाः। ऋतऽवा। बृहस्पतिः। आङ्गिरसः। हविष्मान्॥ द्विब
र्हऽज्मा। प्राघर्मऽसत्। पिता। नः। आ। रोदसी इति। वृषभः। रोरवीति॥
जनाय। चित्। यः। ईवते। ऊं इति। लोकं॥ बृहस्पतिः। देवऽहूतौ। चकार।
घ्नन्। वृत्राणि। वि। पुरः। दर्दरीति॥ जयन्। शत्रून्। अमित्रान्। पृत्ऽसु।
सहन्॥ बृहस्पतिः। सं। अजयत्। वसूनि॥ महः। व्रजान्। गोऽमतः।
देवः। एषः॥ अपः। सिसासन्। स्वः। अप्रतिऽइतः। बृहस्पतिः। हंति।
अमित्रं। अर्कैः॥३॥२०॥ यत्समोनुवाकः॥ इमां। धियं। सप्तऽशीर्ष्णीं। पिता। ५६

नः॥ ऋतऽप्रजातां। बृहतीं। अविंदत्॥ तुरीयं। स्वित्। जनयत्। विश्व
ऽजन्यः॥ अयास्यः। उक्थं। इंद्राय। शंसन्॥१॥ ऋतं। शंसंतः। ऋजु। दीध्यानाः॥ :२
दिवः। पुत्रासः। असुरस्य। वीराः॥ विप्रं। पदं। अंगिरसः। दधानाः॥ य
ज्ञस्य। धाम। प्रथमं। मनंत॥२॥ हंसैःऽइव। सखिऽभिः। वावदत्ऽभिः॥
अश्मन्ऽमयानि। नहना। विऽअस्यन्॥ बृहस्पतिः। अभिऽकनिक्रदत्।
गाः॥ उत। प्र। अस्तौत्। उत्। च। विद्वान्। अगायत्॥३॥ अवः। द्वाभ्यां। परः। ए
कया। गाः॥ गुहा। तिष्ठंतीः। अनृतस्य। सेतौ॥ बृहस्पतिः। तमसि। ज्योतिः।
इच्छन्॥ उत्। उस्राः। आ। अकः। वि। हि। तिस्रः। आवरित्यावः॥४॥ विऽभिद्य।
पुरं। शयथा। ईं। अपाचीं॥ निः। त्रीणि। साकं। उदऽधेः। अकृंतत्॥ बृह
स्पतिः। उषसं। सूर्यं। गां॥ अर्कं। विवेद। स्तनयन्ऽइव। द्यौः॥ इंद्रः।

वलं। रक्षितारं। दुघानां॥ करेण॰इव। वि। चकर्त। रवेण॥ स्वेदांजि॰
भिः। आ॰शिरं। इच्छमानः॥ अरोदयत्। पणिं। आ। गाः। अमुष्णात्॥६
सः। ईं। सत्येभिः। सखि॰भिः। शुचत्॰भिः। गो॰धायसं। वि। धन॰सैः। अ
दर्दरित्यदर्दः॥ ब्रह्मणः। पतिः। वृष॰भिः। वराहैः॥ घर्म॰स्वेदेभिः। द्रविणं। ना ५
वि। आनट्॥७ ते। सत्येन। मनसा। गो॰पतिं। गाः॥ इयानासः। इषणयन्त।
धीभिः॥ बृहस्पतिः। मिथः॰अवद्यपेभिः॥ उत्। उस्रियाः। असृजत।
स्वयुक्॰भिः॥८ तं। वर्धयंतः। मति॰भिः। शिवाभिः॥ सिंहं॰इव। नानद ५१
तं। सध॰स्थे॥ बृहस्पतिं। वृषणं। शूर॰सातौ॥ भरे॰भरे। अनु। म
देम। जिष्णुं॥९ यदा। वाजं। असनत्। विश्व॰रूपं॥ आ। द्यां। अरु
क्षत्। उत्॰तराणि। सद्म॥ बृहस्पतिं। वृषणं। वर्धयंतः॥ नाना। सं
तः। बिभ्रतः। ज्योतिः। आसा॥१०॥ सत्यां। आ॰शिषं। कृणुत। वयः॰धै॥

कीरिं। चित्। हि। अवथ। स्वेभिः। एवैः॥ पश्चा। मृधः। अप। भवन्तु। विश्वाः।
तत्। रोदसी इति। शृणुतं। विश्वमिन्वे इति विश्वं॰इन्वे॥११ इंद्रः। मह्ना।
महतः। अर्णवस्य॥ वि। मूर्धानं। अभिनत्। अर्बुदस्य॥ अहन्। अहिं। अ गजु॰
रिणात्। सप्त। सिंधून्॥ देवैः। द्यावापृथिवी इति। प्र। अवतं। नः॥१२॥२० तं ४
२१॥ अत्रि प्रगोपतिं गिरेति तिस्रः॥ ३ह्रौ॥ रपा। उत्। यत्। ब्रध्नस्य। वि
ष्टपं। गृहं। इंद्रः। च। गन्वहि॥ मध्वः। पीत्वा। सचेवहि॥ त्रिः। सप्त। सख्युः। प
दे॥७ अर्चत। प्र। अर्चत॥ प्रिय॰मेधासः। अर्चत॥ अर्चंतु। पुत्रकाः। उ
त॥ पुरं। न। धृष्णु। अर्चत॥८ अव। स्वराति। गर्गरः॥ गोधा। परि। सनि
ष्वणत्॥ पिंगा। परि। चनिस्कदत्॥ इंद्राय। ब्रह्म। उत्॰यतं॥९ आ। य
त्। पतंति। एन्यः॥ सु॰दुघाः। अनप॰स्फुरः॥ अप॰स्फुरं। गृभायत॥

सोमं। इंद्राय। पातवे॥४ अपात्। इंद्रः। अपात्। अग्निः॥ विश्वे। देवाः। अमत्स
त॥ वरुणः। इत्। इह। क्षयत्॥ तं। आपः। अभि। अनूषत॥ वत्सं। संऽशि
श्वरीःऽइव॥५ सुऽदेवः। असि। वरुण॥ यस्य। ते। सप्त। सिंधवः॥ अनुऽ
क्षरंति। ककुदं॥ सूर्म्यं। सुषिरांऽइव॥६ यः। विऽअतीन्। अफाणयत्॥ सुऽ
युक्तान्। उप। दाशुषे॥ तक्वः। नेता। तत्। इत्। वपुः॥ उपऽमा। यः। अमुच्यत॥
अति। इत्। ऊं इति। शक्रः। ओहते॥ इंद्रः। विश्वाः। अति। द्विषः॥ भिनत्। कनी ५८
नः। ओदनं॥ पच्यमानं। परः। गिरा॥८ अर्भकः। न। कुमारकः। अधि।
तिष्ठन्। नवं। रथं॥ सः। पक्षत्। महिषं। मृगं॥ पित्रे। मात्रे। विभुऽक्रतुं॥९
आ। तु। सुऽशिप्र। दंऽपते॥ रथं। तिष्ठ। हिरण्ययं॥ अध। द्युक्षं। सचेवहि॥
सहस्रऽपादं। अरुषं॥ स्वस्तिऽगां। अनेहसं॥१० तं। घ। ईं। इत्था। नमस्विनः॥
उप। स्वऽराजं। आसते॥ अर्थं। चित्। अस्य। सुऽधितं॥ यत्। एतवे॥ आऽ

ई।उ।जर

ग। ज। ज०

वर्तयंति। दावने॥११ अनु। प्रत्नस्य। ओकसः॥ प्रियऽमेधासः। एषां॥ पूर्वां। अनु।
प्रऽयतिं। वृक्तऽबर्हिषः॥ हितऽप्रयसः। आशत॥१२ यः। राजा। चर्षणीनां॥ या
ता। रथेभिः। अध्रिऽगुः॥ विश्वासां। तरुता। पृतनानां॥ ज्येष्ठः। यः। वृत्रऽह
गृणे॥१३ इंद्रं। तं। शुंभ। पुरुऽहन्मन्। अवसे॥ यस्य। द्विता। विऽधर्तरि॥
हस्ताय। वज्रः। प्रति। धायि। दर्शतः॥ महः। दिवे। न। सूर्यः॥१४ नकिः। तत्
कर्मणा। नशत्॥ यः। चकार। सदाऽवृधं॥ इंद्रं। न। यज्ञैः। विश्वऽगूर्तं। ऋ
नूं।४ भ्वसं॥ अधृष्टं। धृष्णुऽओजसं॥१५ अषाळ्हं। उग्रं। पृतनासु। सा
सहिं॥ यस्मिन्। महीः। उरुऽज्रयः॥ सं। धेनवः। जायमाने। अनोन
वुः॥ द्यावः। क्षामः। अनोनवुः॥१६ यद्याव इंद्र ते शतमिति द्वौ॥१८॥ आरु
उत। त्वा। मंदंतु। सोमाः॥ तत्। ... राधः। अद्रिऽवः॥ अर्वाक्। ... ऽहूतः।

जहि॥१॥ पदा। पणीन्। ऽअराधसः॥ नि। बाधस्व। महान्। ऽअसि॥ नहि। त्वा।
कः। चन। प्रति॥ त्वं। ईशिषे। सुतानां॥ इंद्र। त्वं। ऽअसुतानां॥ त्वं। राजा। जना-
नां॥३॥ ईंखयंतीः। ऽअपस्युवः। इंद्रं। जातं। उप। ऽआसते॥ भेजानासः। सुवीर्यं
॥४॥ त्वं। इंद्र। बलात्। ऽअधि॥ सहसः। जातः। ओजसः॥ त्वं। वृषन्। वृषा। इत्।
ऽअसि॥५॥ त्वं। इंद्र। ऽअसि। वृत्र०हा॥ वि। ऽअंतरिक्षं। ऽअतिरः॥ उत्। द्यां। ऽअ-
स्तभ्नाः। ओजसा॥६॥ त्वं। इंद्र। स०जोषसं॥ ऽअर्कं। बिभर्षि। बाह्वोः॥ वज्रं। ५८
शिशानः। ओजसा॥७॥ त्वं। इंद्र। ऽअभि०भूः। ऽअसि॥ विश्वा। जातानि। ओजसा॥
सः। विश्वाः। भुवः। ऽआ। ऽअभवः॥८॥२४॥ ऽआ। यातु। इंद्रः। स्व०पतिः। मदाय॥
यः। धर्मणा। तूतुजानः। तुविष्मान्॥ प्र०त्वक्षाणः। ऽअति। विश्वा। सहांसि।
ऽअपारेण। महता। वृष्ण्येन॥१॥ सु०स्थामा। रथः। सु०यमा। हरी इति। ते॥

मिम्यक्ष। वज्रः। नृ०पते। गभस्तौ॥ शीभं। राजन्। सु०पथा। ऽआ। या-
हि। ऽअर्वाङ्॥ वर्धाम। ते। पपुषः। वृष्ण्यानि॥२॥ ऽआ। इंद्रं। वाहः। नृ०प-
तिं। वज्र०बाहुं॥ उग्रं। उग्रासः। तविषासः। एनं॥ प्र०त्वक्षसं। वृष-
भं। सत्य०शुष्मं॥ ऽआ। ईं। ऽअस्म०त्रा। सध०मादः। वहंतु॥३॥ एव। पतिं।
द्रोण०साचं। स०चेतसं॥ ऊर्जः। स्कंभं। धरुणे। ऽआ। वृष०यसे॥ ओजः। कृ-
ष्व। सं। गृभाय। त्वे इति। ऽअपि। ऽअसः॥ यथा। के०निपानां। इनः। वृधे॥४॥
गमन्। ऽअस्मे इति। वसूनि। ऽआ। हि। शंसिषं॥ सु०ऽआशिषं। भरं।
ऽआ। याहि। सोमिनः॥ त्वं। ईशिषे। सः। ऽअस्मिन्। ऽआ। सत्सि। बर्हि-
षि॥ ऽअनाधृष्या। तव। पात्राणि। धर्मणा॥५॥ पृथक्। प्र। ऽआयन्। प्र-
थमाः। देव०हूतयः॥ ऽअकृण्वत। श्रवस्यानि। दुस्तरा॥ न। ये।

शेकुः। यज्ञियां। नावं। आऽरुहं॥ ईर्मा। एव। ते। नि। अविशंत
। केपयः॥ ६॥ एव। एव। अपाक्। अपरे। संतु। दुःऽध्यः॥ अश्वाः। येषां।
दुःऽयुजः। आऽयुयुज्रे॥ इत्था। ये। प्राक्। उपरे। संति। दावने
। पुरूणि। यत्र। वयुनानि। भोजना॥ ७॥ गिरीन्। अज्रान्। रेजमा
नान्। अधारयत्॥ द्यौः। क्रंदत्। अंतरिक्षाणि। कोपयत्॥ समी
ची॰ने इति संऽईचीने। धिषणे इति। वि। स्कभायति॥ वृष्णः। पी
त्वा। मदे। उक्थानि। शंसति॥ ८॥ इमं। बिभर्मि। सुऽकृतं। ते। अं
कुशं॥ येन। आऽरुजासि। मघऽवन्। शफऽआरुजः॥ अस्मि
न्। सु। ते। सवने। अस्तु। ओक्यं॥ सुते। इष्टौ। मघऽवन्। बो

हरि हर

धि। आऽभगः॥ ९॥ छ॥ २५ त्रिऽकद्रुकेषु। महिषः। यवऽआशि
रं। तुविऽशुष्मः॥ तृपत्। सोमं। अपिबत्। विष्णुना। सुतं
। यथा। अवशत्॥ सः। ईं। ममाद। महि। कर्म। कर्तवे। महां
उरुं॥ सः। एनं। सश्चत्। देवः। देवं। सत्यं। इंद्रं। सत्यः। इंदुः॥
प्रो इति। सु। अस्मै। पुरःऽरथं॥ इंद्राय। शूषं। अर्चत॥ अ
भीके। चित्। ऊं इति। लोकऽकृत्॥ संऽगे। समत्ऽसु। वृत्रऽ
हा॥ अस्माकं। बोधि। चोदिता। नभंतां। अन्यकेषां॥ ज्या
काः। अधि। धन्वऽसु॥ त्वं। सिंधून्। अव। असृजः॥ अधराचः।

ऽप्रह॑न । ऽप्रहिं॑ ॥ ऽसुराधुः । इंद्र । जज्ञिषे ॥ विश्वं॑ । पुष्यसि । वार्यम् ।
तं । त्वा । परि । स्वजामहे ॥ ३ विसु । विश्वाः । ऽप्रतीतयः ॥ ऽपूर्याः । नुइं ।
ता । नः । धियः ॥ ऽअस्तां । ऽअसि । रात्रे । वोवृधः ॥ यः । नः । इंद्र । जिघांसति
॥ या । ते । रातिः । ददिः । वसु ॥ ४ । छ । २६ ॥ तीव्रस्य । ऽअभि०वयसः ॥ ६२
ऽअस्य । पाहि ॥ सर्व०रथा ॥ वि । हरी इति॑ । इह । मुंच ॥ इंद्र । मा । त्वा ।
यजमानासः । ऽअन्ये ॥ नि । रीरमन् ॥ तुभ्यं । इमे । सुतासः ॥ १ ॥ तुभ्यं ।
। सुताः । तुभ्यं । ऊं इति । सोत्वासः । त्वां । गिरः । श्वात्र्याः । ऽआ । ह्वयंति ।
इंद्र । इदं । ऽअद्य । सवनं । जुषाणः ॥ विश्वस्य । विद्वान् । इह । पा

हि । सोमं ॥ २ यः । उशता । मनसा । सोमं । ऽअस्मै ॥ सर्व०हृदा । देव०
कामः । सुनोति ॥ न । गाः । इंद्रः । तस्य । परा । ददाति ॥ प्र०शस्तं ।
इत् । चारुं । ऽअस्मै । कृणोति ॥ ३ ऽअनु०स्पष्टः । भवति । एषः । ऽअ
स्य ॥ यः । ऽअस्मै । रेवान् । न । सुनोति । सोमं ॥ निः । ऽअरत्नौ । म
घ०वा । तं । दधाति ॥ ब्रह्म०द्विषः । हंति । ऽअन०नुदिष्टः ॥ ४ ऽअ
श्व०यंतः । गव्यंतः । वाजयंतः ॥ हवामहे । त्वा । उप०गंतवै । ऊं
इति ॥ ऽआ०भूषंतः । ते । सु०मतौ । नवायां ॥ वयं । इंद्र । त्वा । शुनं
। हुवेम ॥ ५ मुंचामि त्वेति चतस्रः ॥ ९ ऽप्राहीषमविदेच्छे स्यका०

ब्रह्मणा। अग्निः। सं॰विदानः। रक्षः॰हा। बाधतां। इतः॥
अमीवा। यः। ते। गर्भं। दुः॰नामा। योनिं। आ॰शये॥१॥
अमीवाः। अग्निः। तां। ब्रह्मणा। सह॥ निः। तं। क्रव्य॰अदं।
अनीनशत्॥२॥ यः। ते। हंति। पतयंतं। नि॰सत्स्नुं। यः। सरी ६२
सृपं॥ जातं। यः। ते। जिघांसति। तं। इतः। नाशयामसि॥
३॥ यः। ते। ऊरू इति। वि॰हरति। अंतरा। दंपती इति दं॰प
ती। शये॥ योनिं। यः। अंतः। आ॰रेळ्हि॥४॥ यः। त्वा। भ्राता।
पतिः। भूत्वा। जारः। भूत्वा। नि॰पद्यते। प्र॰जां॥५॥ यः।
ब्हि।२

त्वा। स्वप्नेन। तमसा॥ मोहयित्वा॥ नि॰पद्यते॥ प्र॰जां॥६॥ अ
क्षीभ्यां ते इत्यस्य ऋचः॥२२॥ अप। इहि। मनसः। पते॥ अप। क्राम। प
रः। चर॥ परः। निः॰ऋत्यै॥ आ। चक्ष्व॥ बहुधा। जीवतः। मनः॥ ९६
२४॥ [illegible]॥ अष्टमो नुवाकः॥ समाप्तः॥ वयं। एनं। इदा। ह्यः। अपीपे
म। इह। वज्रिणं॥ तस्मै। ऊं इति। अद्य। समना। सुतं। भर॥ आ। नूनं। म५
भूषत। श्रुते॥ वृकः। चित्। अस्य। वारणः। उरा॰मथिः॥ आ। वयु
नेषु। भूषति॥ सः। इमं। नः। स्तोमं। जुजुषाणः। आ। गहि। इंद्र
प्र। चित्रया। धिया॥ ८॥ कत्। ऊं इति। नु। अस्य। अकृतं॥ इंद्रस्य
अस्ति। पौंस्यं॥ केनो इति। नु। कं। श्रोमतेन। न। शुश्रुवे॥ ज

ऋष्वः । पाता । वृत्रऽहा ॥ २० ॥ १ त्वाम् । इत् । हि । हवामहे । साता । वा-
जस्य । कारवः ॥ त्वाम् । वृत्रेषु । इन्द्र । सत्ऽपतिम् । नरः ॥ त्वाम् । काष्ठासु ।
अर्वतः ॥ १ सः । त्वम् । नः । चित्र । वज्रऽहस्त । धृष्णुऽया ॥ महः । स्तवानः ।
अद्रिऽवः ॥ गाम् । अश्वम् । रथ्यम् । इन्द्र । सम् । किर । सत्रा । वाजम् । न । जिग्यु-
षे ॥ २१ ॥ (७) ॥ अभि । त्वा । पूर्वऽपीतये ॥ इन्द्र । स्तोमेभिः । आयवः ॥
सम्ऽईचीनासः । ऋभवः । सम् । अस्वरन् ॥ रुद्राः । गृणन्त । पूर्व्यम् ॥ १ अ-
स्य । इत् । इन्द्रः । ववृधे । वृष्ण्यम् । शवः ॥ मदे । सुतस्य । विष्ण-
वि ॥ अद्य । तम् । अस्य । महिमानम् । आयवः ॥ अनु । स्तुवन्ति । पूर्वऽथा ॥
राधा ॥ १८ ॥ आ । घ । हि । इन्द्र । गिर्वणः ॥ उप । त्वा । कामान् ।

महः । ससृज्महे ॥ उदाऽइव ॥ यन्तः । उदऽभिः ॥ १ वाः । न । त्वा ।
यव्याभिः ॥ वर्धन्ति । शूर । ब्रह्माणि ॥ ववृध्वांसम् । चित् । अद्रि-
वः । दिवेऽदिवे ॥ युञ्जन्ति । हरी इति । इषितस्य । गाथया ॥
उरौ । रथे । उरुऽयुगे ॥ इन्द्रऽवाहा । वचःऽयुजा ॥ २३ ॥ २० ॥
अग्निम् । दूतम् । वृणीमहे ॥ होतारम् । विश्वऽवेदसम् ॥ अस्य । य-
ज्ञस्य । सुऽक्रतुम् ॥ १ अग्निम्ऽअग्निम् । हवीमऽभिः ॥ सदा । हव-
न्त । विश्पतिम् ॥ हव्यऽवाहम् ॥ पुरुऽप्रियम् ॥ २ अग्ने । देवान् । इ-
ह । आ । वह ॥ जज्ञानः । वृक्तऽबर्हिषे ॥ असि । होता । नः ।

ईळे ॥२॥ छ ॥ ८१ ॥ ईळेन्यः । नमस्यः ॥ तिरः । तमांसि । दर्शतः ॥ सं । अग्निः । इध्यते ॥ वृषा ॥१॥ वृषो इति । अग्निः । सं । इध्यते ॥ अश्वः । न । देववाहनः ॥ तं । हविष्मंतः । ईळते ॥२॥ वृषणं । त्वा । वयं । वृषन् ॥ वृषणः । सं । इधीमहि । अग्ने । दीद्यतं । बृहत् ॥३॥ छ ॥ ८२ ॥ अग्निं । ईळिष्व । अवसे ॥ गाथाभिः । शीरशोचिषं ॥ अग्निं । राये । पुरुमीळ्ह । श्रुतं । नरः ॥ अग्निं । सुदीतये । छर्दिः ॥१॥ अग्ने । आ । याहि । अग्निभिः । होतारं । त्वा । वृणीमहे ॥ आ । त्वां । अनक्तु ॥ ६४

प्रयता । हविष्मती ॥ यजिष्ठं । बर्हिः । आसदे ॥२॥ अच्छ । हि । त्वा । सहसः । सूनो इति । अंगिरः ॥ स्रुचः । चरंति । अध्वरे ॥ ऊर्जः । नपातं । घृतकेशं । ईमहे ॥ अग्निं । यज्ञेषु । पूर्व्यं ॥३॥ छ ॥ १०२ ॥ उ ॥ इमाः । ऊं इति । त्वा । पुरुवसो इति पुरुवसो ॥ गिरः । वर्धंतु । याः । मम ॥ पावकवर्णाः । शुचयः । विपश्चितः ॥ अभि । स्तोमैः । अनूषत ॥१॥ अयं । सहस्रं । ऋषिभिः । सहस्कृतः ॥ समुद्रः । इव । पप्रथे ॥ सत्यः । सः । अस्य । महिमा । गृणे । शवः । यज्ञेषु । विप्रराज्ये ॥२॥ आ । नः । विश्वासु

हव्यः॥ इंद्रः। समत्ऽसु। भूषतु॥ उप। ब्रह्माणि। सवनानि
। वृत्रऽहा॥ परमऽज्याः। ऋचीषमः॥२॥ त्वं। दाता। प्रथमः। रा
धसां। असि। असि। सत्यः। ईशानऽकृत्॥ तुविऽद्युम्नस्य
युज्या। आ। वृणीमहे॥ पुत्रस्य। शवसः। महः॥४॥ व॥
१०४॥ त्वं। इंद्र। प्रऽभूर्तिषु॥ अभि। विश्वाः। असि। स्पृधः॥
अशस्तिऽहा। जनिता। विश्वऽतूः। असि॥ त्वं। तूर्य। तरुष्य
तः॥१॥ अनु। ते। शुष्मं। तुरयंतं। ईयतुः॥ क्षोणी इति। शि
शुं। न। मातरा॥ विश्वाः। ते। स्पृधः। श्नथयंत। मन्यवे॥

MEMORIAL

८५

वृत्रं। यत्। इंद्र। तूर्वसि॥ इतः। ऊतीः। वः। अजरं। प्रऽहेता
रं। अप्रऽहितं॥ आशुं। जेतारं। हेतारं। रथिऽतमं॥ अतू
र्तं। तुग्र्यऽवृधं॥३॥ यो राजा चर्षणीनां मित्तिहृ॥५॥ व
॥१०५॥ तव। त्यत्। इंद्रियं। बृहत्। तव। शुष्मं। उत। क्र
तुं॥ वज्रं। शिशाति। धिषणा। वरेण्यं॥१॥ तव। द्यौः। इंद्र
। पौंस्यं। पृथिवी। वर्धति। श्रवः॥ त्वां। आपः। पर्वतासः।
च। हिन्विरे॥२॥ त्वां। विष्णुः। बृहन्। क्षयः॥ मित्रः। गृणा
ति। वरुणः॥ त्वां। शर्धः। मदति। अनु। मारुतं। ॥

॥१०६॥ सं। अस्य। मन्यवे। विशः॥ विश्वाः। नमंत। कृष्टयः॥
समुद्रायऽइव। सिंधवः॥१०७ ओजः। तत्। अस्य। तित्विषे। उ-
भे इति। यत्। संऽअवर्तयत्॥ इंद्रः। चर्मऽइव। रोदसी इति
॥२ वि। चित्। वृत्रस्य। दोधतः॥ वज्रेण। शतऽपर्वणा॥ शि-
रः। बिभेद। वृष्णिना॥ २ तदिदास भुवनेषु ज्येष्ठमित्यष्ट॥
१२॥ चित्रं देवानामुदगादनीकमिति द्वे॥१०९ सूर्यः। देवीं।
उषसं। रोचमानां॥ मर्यः। न। योषां। अभि। एति। प-
श्चात्॥ यत्र। नरः। देवऽयंतः। युगानि॥ विऽतन्वते।

प्रति। भद्राय। भद्रं॥१५॥ छ॥१०७॥ त्वं। नः। इंद्र। आ। भर। ओ-
जः। नृम्णं। शतक्रतो इति शतऽक्रतो॥ विऽचर्षणे॥ आ। वीरं।
पृतनाऽसहं॥१॥ त्वं। हि। नः। पिता। वसो इति। त्वं। माता। श-
तक्रतो इति शतऽक्रतो। बभूथ॥ अध। ते। सुम्नं। ईम-
हे॥२॥ त्वां। शुष्मिन्। पुरुऽहूत। वाजऽयंतं। उप। ब्रुवे। शत-
क्रतो इति शतऽक्रतो॥ सः। नः। रास्व। सुऽवीर्यं॥३॥ छ॥१०८
स्वादोः। इत्था। विषुऽवतः॥ मध्वः। पिबंति। गौर्यः॥ याः। इंद्रेण
सऽयावरीः॥ वृष्णा। मदंति। शोभसे॥ वस्वीः। अनु। स्व-

स्व॰ राद्सं॥१ ताः । अस्य । पृशन॰युवः॥ सोमं । श्रीणंति । पृश्न
यः॥ प्रियाः । इंद्रस्य । धेनवः॥ वज्रं । हिन्वंति । सायकं॥ वस्वीः
॥२॥ ताः । अस्य । नमसा । सहः॥ सपर्यंति । प्र॰चेतसः॥ व्रता
नि । अस्य । सश्चिरे । पुरूणि । पूर्व॰चित्तये॥३॥ ७॥१०२ इं
द्राय । मद्वने । सुतं॥ परि । स्तोभंतु । नः । गिरः॥ अर्कं । अर्चं
तु । कारवः॥१॥ यस्मिन् । विश्वाः । अधि । श्रियः॥ रणंति॥
सप्त । सं॰सदः॥ इंद्रं । सुते । हवामहे॥२ त्रि॰कद्रुकेषु । चे
तनं॥ देवासः । यज्ञं । अत्नत॥ तं । इत् । वर्द्धंतु । नः । गिरः॥३
८॥१०॥ यत् । सोमं । इंद्र । विष्णवि॥ यत् । वा । घ । त्रिते । आ ६७

प्त्ये॥ यत् । वा । मरुत्॰सु । मंदसे॥ सं । इंदु॰भिः॥१॥ यत् । वा । श
क्र । परा॰वति॥ समुद्रे । अधि । मंदसे॥ अस्माकं । इत् । सुते । र
ण । सं । इंदु॰भिः॥२ यत् । वा । असि । सुन्वतः॥ वृधः । यजमानस्य॥
सत्॰पते॥ उक्थे । वा । यस्य । रण्यसि॥ सं । इंदु॰भिः॥३॥ ७॥११॥
यत् । अद्य । कत् । च । वृत्र॰हन्॥ उत्॰अगाः । अभि । सूर्य॥ सर्वं अ
तत् । इंद्र । ते । वशे॥१॥ यत् । वा । प्र॰वृद्ध । सत्॰पते॥ न । मरै
इति । मन्यसे॥ उतो इति । तत् । सत्यं । इत् । तव॥२ ये । सोमा
सः । परा॰वति॥ ये । अर्वा॰वति । सुन्विरे॥ सर्वान् । तान्

इंद्र। गच्छसि॥२॥व॥१२२॥ उभयं। शृणवत्। च। नः॥ इंद्रः। अर्वा
क्। इदं। वचः॥ सत्राच्या॥ मघ०वा। सोम०पीतये॥ धिया। शविष्ठः।
आ। गमत्॥१॥ तं। हि। स्व०राजं। वृषभं। तं। ओजसे॥ धिषणे इति। निः०
ततक्षतुः॥ उत। उप०मानां। प्रथमः। नि। सीदसि॥ सोम०कामं।
हि। ते। मनः॥२॥व॥१२३॥ अभ्रातृव्यः। अना। त्वं॥ अनापिः। इंद्र।
जनुषा। सनात्। असि॥ युधा। इत्। आपि०त्वं। इच्छसे॥१॥ नकिः। ६८
रेवंतं। सख्याय। विंदसे। पीयंति। ते। सुराश्वः॥ यदा। कृणोषि।
नदनुं। सं। ऊहसि॥ आत्। इत्। पिता०इव। हूयसे॥२॥व॥१२४॥

अहं। इत्। हि। पितुः। परि॥ मेधां। ऋतस्य। जग्रभ॥ अहं। सूर्यः०
इव। अजनि॥१॥ अहं। प्रत्नेन। मन्मना॥ गिरः। शुंभामि। कण्व०वत्॥
येन। इंद्रः। शुष्मं। इत्। दधे॥२॥ ये। त्वां। इंद्र। न। तुस्तुवुः॥ ऋषयः।
ये। च। तुष्टुवुः॥ मम। इत्। वर्धस्व। सु०स्तुतः॥३॥व॥१२५॥ मा। भूम।
निष्ट्याः०इव॥ इंद्र। त्वत्। अरणाः०इव॥ वनानि। न। प्र०जहिता
नि। अद्रि०वः॥ दुरोषासः। अमन्महि॥१॥ अमन्महि। इत्। अनाशवः॥
अनुग्रासः। च। वृत्र०हन्॥ सकृत्। सु। ते। महता। शूर। राधसा॥
अनु। स्तोमं। मुदीमहि॥२॥व॥१२६॥ पिब। सोमं। इंद्र। मंदतु। त्वा॥

यं। ते। सुसोमा। हरि॰ऽस्था। अद्रिः॥ स्तोतुः। आकु॰ऽस्यां। सुत॰पते। नः। प्रवीर
॥ यः। ते। मदः। युज्यः। चारुः। अस्ति॥ येन। वृत्राणि। हरि॰ऽस्था। हंसि॥ सः
याः। इंद्र। प्रभुवसो इति प्रभु॰वसो। ममत्तु॥ ३॥ बोध। सु। मे। मघ॰
वन्। वाचं। आ। इमां॥ यां। ते। वसिष्ठः। अर्चति। प्र॰शस्तिं॥ इमा
ब्रह्म। सध॰मादे। जुषस्व॥ ४॥ (?)॥ श्रुधि। ऊं इति। सु। शाखा। ०
पतेः॥ इंद्र। विश्वाभिः। ऊति॰भिः॥ यज्ञं। न। हि। च्यौ। मशस्तां। वसु॰
विदः॥ अनुं। शूर। ब्रराम[illegible]॥ १॥ पोरः। अस्वेस्य। पुरु॰ऽ सतः। ग
वां। असि॥ उत्सः। देवा। हिरण्ययः॥ नकिः। हि। दानं। परि॰म
र्धिषत्। त्वे इति॥ यत॰ऽयामि। तत्। आ। भर॥ २॥ इंद्रः। इत

देव॰तातये॥ इंद्रं। प्र॰यति। अध्वरे॥ इंद्रं। सं॰ईके। वनिनः। ह
वामहे॥ इंद्रं। धनस्य। सातये॥ २॥ इंद्रः। मह्ना। रोदसी इति। प
प्रथत्। शवः॥ इंद्रः। सूर्यं। अरोचयत्॥ इंद्रे। ह। विश्वा। भुवना
नि। येमिरे॥ इंद्रे। सुवानासः। इंदवः॥ ४॥ ७॥ ॥ आ। अस्तावि। मन्म
पूर्व्यं॥ ब्रह्म। इंद्राय। वोचत॥ पूर्वीः। ऋतस्य। बृहतीः। अनूषत।
स्तोतुः। मेधाः। असृक्षत॥ १॥ तुरण्यवः। मधु॰मंतं। घृत॰श्चुतं। वि
प्रासः। अर्कं। आनृचुः॥ अस्मे इति। रयिः। पप्रथे। वृष्ण्यं।
शवः॥ अस्मे इति। सुवानासः। इंदवः॥ ४॥ ८॥ ॥ आ। अस्ता

विा मन्मः सूर्ममं ॥ ब्रह्म । इंद्राय । वोचत ॥ सवीः । ततस्य । बृहतीः । अनूषत ॥ सोतुः । मेधाः । अस्रक्षत ॥ १ ॥ त्र एएपवः । मधु० मंतं । बृहन् । वृत्र० युजं विप्रासः । पर्कं । आनृचुः ॥ अस्मेइति । रयिः । पप्रथे । वृष्ण्यं । शवः ॥ अस्मेइति । सुवानासः । इंदवः ॥ २ ॥ ८ ॥ यतः । इंद्र । प्राकूः । अदो वृशुद्दं कू ॥ न्यंकू । वा । हूयसे । नृ० भिः ॥ सिमा । पुरु । नृ० सूतः । असि । आनवे ॥ असि । प्र० शर्द्धा । तुर्वशे ॥ ३ ॥ यत् । वा । अदमे । रुशमे । श्यावके । कृपे ॥ इंद्र । मादयसे । सचा ॥ कण्वासः । त्वा । ब्रह्म० भिः । स्तोम० वाहसः ॥ इंद्र । आ । यच्छंति । आ । गहि ॥ ४ ॥ २० ॥ यथा । गौरः । अपा । कृतं । तृष्यन् । एति । अव । इरिणं ॥ आपित्वे । नः । प्र० पित्वे । तूयं । आ । गहि ॥ कण्वेषु । सु । सचा । पिब ॥ ५ ॥ मंदंतु । त्वा । मघ० वन् । इंद्र । इंदवः । राध० दाः ॥ इति ॥ सुम ॥ अपुद्धा ॥ इवः । धेनवः ॥ ईशानं । अस्य । जगतः । स्वः० दृशं ॥

डाक्टर भाऊदाजी स्मारकम्
BHAU DAJI MEMORIAL

७०॥

ईशानं । इंद्र । तस्थुषः ॥ १ ॥ न । त्वा० वान् । अन्यः । दिव्यः । न । पार्थिवः । न । जातः । न । जनिष्यते ॥ अश्व० यंतः । मघ० वन् । इंद्र । वाजिनः । गव्यंतः । त्वा । हवामहे ॥ २ ॥ २३ ॥ अभि । त्वा । पूर्व० पीतये । इंद्र । स्तोमेभिः । आयवः ॥ समी० चीनासः । ऋभवः । सं । अस्वरन् ॥ रुद्राः । गृणंत । पूर्व्यं ॥ १ ॥ अस्य । इत् । इंद्रः । वावृधे । वृष्ण्यं । शवः । मदे । सुतस्य । विष्णवि ॥ अद्य । तं । अस्य । महिमानं । आयवः ॥ अनु । स्तुवंति । पूर्व० था ॥ २ ॥ तत् । त्वा । यामि । सु० वीर्यं । तत् । ब्रह्म । पूर्व० चित्तये ॥ येन । यति० भ्यः । भृगवे । धने । हिते । येन । प्रस्कण्वं । आविथ ॥ ३ ॥ येन । समुद्रं । असृजः । महीः । अपः । तत् । इंद्र । वृष्णि । ते । शवः ॥

अ॒ना॒धृ॒ता॑। स्थि॒ता॒सु॒। नः॒। स॒ख्या॒नां अ॒ना॒धृ॒तः॥ स्थि॒ता॒ सु॒। नः॒ स॒ख्या॒नां

त॒नु॒ते॒। स्थि॒मस्मै॥१॥ त॒त्। मि॒त्रस्य॑। वरु॑णस्य। अ॒भि॒ऽच॒क्षे॥ स्व॒र्पं॥ प॑। त॒नु॒ते॒। घो॑। उ॒प॒ऽस्थे॥ अ॒नं॒तं। रु॒श॒त्। अ॒स्य॒। पाजः॥ हं। अ॒न्यत्। हरि॑तः। सं। भ॒र॒न्ति॥२॥ ४॥ २७॥ कृ॒पा। नः॒। वि॒श्वाः। आ॒भु॒व॒त्॥ ऊ॒ती। स॒दा॒ऽवृ॑धः। स॒खा॥ कृ॒या। श॒वि॑ष्ठया। वृ॒ता॥१॥ कः। त्वा॒। स॒त्यः। म॒दा॑नां। मंहि॑ष्ठः। म॒त्स॒त्। अंध॑सः॥ दृ॒ढा। चि॒त्। आ॒ऽरु॒जे। व॒सु॥२॥ अ॒भि। सु। नः॒। स॒खी॑नां। अ॒वि॒ता। ज॒रि॒तॄ॒णां॥ श॒तं। भ॒वा॒सि॒। ऊ॒तिऽभिः॥३॥ इ॒मा। नु। कं॑। भुव॑ना। सी॒षधाम। इंद्रः॑। च॒। विश्वे॑। च॒। दे॒वाः॥ य॒ज्ञं। च॒। नः॒। त॒न्वं॑। च॒। प्र॒ऽजां। च॒। आ॒दि॒त्यैः। इंद्रः॑। स॒ह। सी॒ष॒धा॒ति॒॥ पा॒ठी॒ न॒पदा॒पंनि तिद्विपदास्सू॒क्तो॥ तो॒त्रु॒षा॒त्रु॒ रा॒णे॥५॥ २८॥ १२४॥

अ॒पो। इं॒द्र॒। आ॒। वै॒। म॒द॒ऽयु॒। वन्ना। अ॒भि॒ज्ञानु॥ अ॒प॒। अ॒प॒ाचो॒। य॒था॒। अ॒

अ॒भि॒ऽनू॒तो॥ उ॒दस्व॥ अप॑। उदी॑च॒। अ॑प॒। शू॒र॒। अ॒ध॒रा॒चः॥ उ॒रौ। यथा॑। तव॑। शर्म॑न्। मदे॑म॥१॥ द॒वि॒त्। अ॒ङ्ग। यव॑ऽमतः। यवं॑। चि॒त्। यथा॑। दा॒न्ति॒। अ॒नु॒ऽपूर्वं॑। वि॒ऽयूय॑। इ॒ह॒ऽइ॑ह। ए॒षां॒। कृ॒णु॒हि॒। भोज॑नानि॥ ये। ब॒र्हिषः॑। नमः॑ऽवृक्तिं। न। ज॒ग्मुः॥२॥ न॒हि। स्थूरि॑। ऋ॒तु॒ऽथा। या॒तं। अस्ति॑॥ न। उ॒त। श्रवः॑। वि॒वि॒दे॒। सं॒ऽग॒मेषु॑॥ ग॒व्यन्तः॑। इंद्रं॑। स॒ख्या॒य॑। विप्राः॑॥ अ॒श्व॒ऽयंतः॑। वृष॑णं। वा॒जयं॑तः॥३॥ भुवं॑। सु॒रामं॑। अ॒श्वि॒ना॥ न॒मु॑चौ। आ॒सु॒रे। सचा॑॥ वि॒ऽपि॒पा॒ना। शु॒भः॒। प॒ती॒

इति॥ इंद्रः । कर्मं॰सु । आवृत॥४ पुत्रं॰इव । पितरौ । अश्विना । उ
भा॥ इंद्र । आ । चष्टुः । काव्यैः । दंसनाभिः॥ यत् । सुरामं । वि वि उर
अपिबः । शचीभिः॥ सरस्वती । त्वा । मघ॰वन् । अभिष्णक्॥५ इंद्र
सुत्रामेति सु॰त्रामा॥७॥६॥२५॥ वि । हि । सोतोः । असृक्षत । न । इंद्रं ।
देवं । अमंसत॥ यत्र । अमदत् । वृषाकपिः॥ अर्यः । पुष्टेषु । म
त्॰सखा । विश्वस्मात् । इंद्रः । उत्॰तरः॥१ परा । हि । इंद्र ।
धावसि । वृषाकपेः । अति । व्यथिः॥ नो इति । अह । प्र । विंद
सि॥ अन्यत्र । सोम॰पीतये॥२ किं । अयं । त्वां । वृषाकपिः॥
३२

चकार । हरितः । मृगः॥ यस्मै । इरस्यसि । इत् । ऊं इति । नु । अ
र्यः । वा । पुष्टि॰मत् । वसु॥३ यं । इमं । त्वं । वृषाकपिं । प्रियं ।
इंद्र । अभि॰रक्षसि॥ श्वा । नु । अस्य । जंभिषत् । अपि । क
र्णे । वराह॰युः॥४ प्रिया । तष्टानि । मे । कपिः॥ वि॰अक्ता
। वि । अदूदुषत्॥ शिरः । नु । अस्य । राविषं॥ न । सु॰गं । दुः॰
कृते । भुवं॥५ न । मत् । स्त्री । सुभसत्॰तरा॥ न । सुयाशु॰
तरा । भुवत्॥ न । मत् । प्रति॰च्यवीयसी॥ न । सक्थि । उत्॰
यमीयसी॥६ उवे । अंब । सुलाभिके॥ यथा॰इव । अंग । भ
विष्यति॥ भसत् । मे । अंब । सक्थि । मे॥ शिरः । मे । वि॰इव । हृष्यति॥
रि२

ष्यति॥७ किं।सुबाहो इति सुऽबाहो॥स्वं॰=गुरे।पृथुस्तो इति पृथु॰
स्तो।पृथु॰जघने॥किं।शूर॰पत्नि।नः।त्वं॥=भि।=मीषि।वृषा
कपिं॥८ =वीरां॰इव।मां।=यं॥शरारुः।=भि।मन्यते॥
उत।=हं।=स्मि।वीरिणी॥इंद्र॰पत्नी।मरुत्॰सखा॥९ सं॰
होत्रं।स्म।पुरा।नारी॥समनं।वा।=व।गच्छति॥वेधाः।ऋत
स्य।वीरिणी॥इंद्र॰पत्नी।महीयते॥१० इंद्राणीं।=सु।नारिषु
॥सु॰भगां।=हं।=श्रवं॥नहि।=स्याः।=परं।चन।जर
सा।मरते।पतिः।११ न।=हं।इंद्राणि।ररण॥सख्युः।वृषा
कपेः।ऋते।॥यस्य।इदं।=प्यं।हविः॥प्रियं।देवेषु।गच्छति॥ ७३

१२॥वृषाकपायि।रेवति॥सु॰पुत्रे।=आत्।ऊं इति।सु॰स्नु
षे॥घसत्।ते।इंद्रः।उक्षणः॥प्रियं।काचित्॰करं।हविः॥१३
उक्ष्णः।हि।मे।पंच॰दश॥साकं।पचंति।विंशतिं॥उत।=हं
=द्मि।पीवः।इत्।उभा।कुक्षी इति।पृणंति।मे॥१४॥वृषभ
ः।न।तिग्म॰शृंगः॥=न्तः।यूथेषु।रोरुवत्॥मंथः।ते।इंद्र
शं।हृदे।यं।ते।सुनोति।भाव॰युः॥१५ न।सः।ईशे।यस्य
रंबते।=न्तरा।सक्थ्या।कपृत्॥सः।इत्।ईशे।यस्य।
रोमशं॥नि॰सेदुषः।वि॰जृंभते॥१६ न।सः।ईशे।यस्य।

रोमशं॥ निऽसेदुषः। विऽजृंभते॥ सः। इत्। ईशे। यस्याः। रंबते। अंत
रा। सक्थ्या। कपृत्॥१७॥ अयं। इंद्र। वृषाकपिः॥ परस्वंतं। हतं। वि
दत्॥ असिं। सूनां। नवं। चरुं॥ आत्। एधस्य। अनः। आऽचितं॥
अयं। एमि। विऽचाकशत्॥ विऽचिन्वन्। दासं। आर्यं॥ पिबामि। पा
कऽसुत्वनः। अभि। धीरं। अचाकशं॥१९॥ धन्व। च। यत्। कृंतत्रं। च।
कति। स्वित्। ता। वि। योजना॥ नेदीयसः। वृषाकपे॥ अस्तं। आ।
इहि। गृहान्। उप॥२०॥ पुनः। आ। इहि। वृषाकपे॥ सुविता। कल्प
यावहै॥ यः। एषः। स्वप्नऽनंशनः॥ अस्तं। एषि। पथा। पुनः॥२१॥
यत्। उदंचः। वृषाकपे॥ गृहं। इंद्र। अजगंतन॥ क्व। स्यः। पुल्व
घः। मृगः॥ कं। अगन्। जनऽयोपनः॥२२॥ पर्शुः। ह। नाम। मानवी॥

७४

न ३

साकं। ससूव। विंशतिं॥ भद्रं। भल। त्यस्यै। अभूत्। यस्याः। उदरं॥
आमयत्॥२३॥७॥२६॥ इदं जना मिति दरोयस्त नि॥१६॥ ३द्
पता। इ। प्रावीः। अजगंत॥ उदे। मंडूरऽधाणिकाः॥ हताः। इंद्रस्य।
शत्रवः॥ सर्वे। बुद्बुदऽयाशवः॥१॥ कर्पं। ता। नरः। कृपेथ। उत। य
धमतन। चोदयत। खुदत। वाजऽसातये॥ निःऽष्टिग्र्यः। पुत्रं। आ
। च्यावय। ऊतये॥ इंद्रस्य। सऽबाधः। इह। सोमऽपीतये॥२॥ दधिऽ
क्राव्णः। अकारिषं॥ जिष्णोः। अश्वस्य। वाजिनः॥ सुरभि। नः। मुखा।
करत्॥ प्र। नः। आयूंषि। तारिषत्॥३॥ सुतासः। मधुमत्ऽतमाः।
सोमाः। इंद्राय। मंदिनः॥ पवित्रऽवंतः। अक्षरन्। देवान्। गच्छंतु।

वः। मर्त्यं॥ इन्दुः। इन्द्राय। पवते। इति। देवासः। अब्रुवन्। वाचः। पतिः। मखस्यते। विश्वस्य। ईशानः। ओजसा॥ सहस्रधारः। पवते। समुद्रः। वाचम्ऽईङ्खयः॥ सोमः। पतिः। रयीणां। सखा। इन्द्रस्य। दिवेऽदिवे॥ ६॥ अयं। पूषा। रयिः। भगः। सोमः। पुनानः। अर्षति। पतिः। विश्वस्य। भूमनः। वि। अख्यत्। रोदसी। उभे इति॥ ७॥ समुं। प्रियाः। अनूषत। गावः। मदाय। घृष्वयः। सोमासः। कृण्वते। पथः। पवमानासः। इन्दवः॥ ८॥ य। ओजिष्ठः। तं। आ। भर। पवमान। श्रवाय्यं। यः। पञ्च। चर्षणीः। अभि। रयिं। येन। वनामहै॥ ९॥ सोमाः। पवन्ते। इन्दवः। अस्मभ्यं। गातुवित्ऽतमाः। मित्राः। सुवानाः। अरेपसः। स्वाध्यः। स्वःऽविदः॥ १०॥ सुष्वाणासः। व्यद्रिऽभिः। चिताना। गोः। अधि। त्वचि। इषं। अस्मभ्यं। अभितः। सम्। अस्वरन्। वसुऽविदः॥ ११॥ एते। पूताः। विपःऽचितः। सोमासः। दधिऽआशिरः। सूर्यासः। न। दर्शतासः। जिगत्नवः। ध्रुवाः। घृते॥ १२॥ प्र। सुन्वानस्य। अन्धसः। मर्तः। न। वृत्। तत्। वचः। अप। श्वानं। अराधसं। हत। मखं। न। भृगवः॥ १३॥ आ। जामिः। अत्के। अव्यत। भुजे। न। पुत्रः। ओण्योः। सरत्। जारः। न। योषणां। वरः। न। योनिं। आसदं॥ १४॥ सः। वीरः। दक्षऽसाधनः। वि। यः। तस्तम्भ। रोदसी इति। हरिः। पवित्रे। अव्यत। वेधाः। न। योनिं। आसदं॥ १५॥ अव्यः। वारेभिः। पवते। सोमः। गव्ये। अधि। त्वचि। कनिक्रदत्। वृषा। हरिः। इन्द्रस्य। अभि। एति। निःऽकृतं॥ १६॥

वाणः। विराः। अदेवीः। अभि। आऽअवर्तिः॥ बृहस्पतिना। युजा। इन्द्रः। ससहे॥ १३॥ अहे। अर्त्य। अजन्यः। सः। अध्वरः। ऽश्नःऽत्रुःऽ। स। अ। नव। अतः। इन्द्र॥ १८॥ इति। द्यावापृथिवी इति। अनु। प्रविदः॥ विश्वं। अतोऽन्यः। भुवनेभ्यः। रणं। धाः॥ १०॥ वृद्धं। अहिं। वीर्येण। वज्रेण। वृजिनं। अभिषितः। जग्धुषाः। चेतुषस्य। अवा। दतिरः। वधत्रैः॥ वं। गाः। इन्द्र। शच्या। इत्। अविदः॥ ११॥ तं। इत्। इन्द्राः। वाजऽयामसि। महे। वृत्राय। हन्तवे। सः। वृषा। वृषभः। भुवत्॥ १२॥ इन्द्रः। सः। दामने। कृतः। ओजिष्ठः। सः। मदे। हितः। द्युम्नी। श्लोकी। सः। सोम्यः॥ १३॥ गिरा। वज्रः। न। संऽभृतः। सऽबलः। अनपऽच्युतः। ववक्षे। ऋष्वः। अस्तृतः॥ १४॥

DR. BHAU DAJI MEMORIAL
65
DR. BHAU DAJI MEMORIAL

ता। वर्तयः॥ विप्राः। सतस्य। वाहसा॥२॥ कु। एवाः। इंद्रा। यत्। अंभूत॥
स्तोमैः। पुत्रस्य। साधनं॥ जामि। ब्रुवते। आ। पुथं॥ ३॥ छ॥ १७२॥ आ। नूनं। अश्विना। युवं॥ वत्सस्य। गंतं। अवसे॥ प्र। अस्मै। यछतं। अवृकं। पृथु। छर्दिः॥ युयुतं। याः। अरातयः॥ १॥ यत्। अंतरिक्षे। यत्। दिवि।
यत्। पंच। मानुषान्। अनु॥ नृम्णं। तत्। धत्तं। अश्विना॥ ये। वां। दंसांसि। अश्विना॥ विप्रासः। परि॰ममृशुः॥ एव। इत्। काण्वस्य। बोधतं॥
अभि। स्यां। वां। घर्मः। अश्विना। स्तोमेन। परि। सिच्यते॥ अयं। सोमः। मधुमान्। वाजिनी॰वसू इति वाजिनी॰वसू॥ येन। वृत्रं। चिकेतथः॥ ४॥ यत्। अप्सु। यत्। वनस्पतौ॥ यत्। ओषधीषु। पुरुदंससा॰ पुरुदंससा। तेन। मा। अविष्टं॥ अश्विना॥ ५॥ छ॥ १७२॥ यत्। नासत्या। भुरण्यथः॥ ७६ ७५
यत्। वा। देवा। भिषज्यथः॥ अयं। वां। वत्सः। मतिभिः। न। विंधते॥ हविष्मंतं। हि। गछथः॥ १॥ आ। नूनं। अश्विनोः। ऋषिः॥ स्तोमं। चिकेत। वामया॥ आ। सोमं। मधुमत्॰तमं॥ घर्मं। सिंचात्। अथर्वणि॥ २॥ आ। नूनं। रघु॰वर्तनिं॥ रथं। तिष्ठाथः। अश्विना॥ आ। वां। स्तोमाः। इमे। मम॥ नभः। न। चुच्यवीरत॥ ३॥ यत्। अद्य। वां। नासत्या॥ उक्थैः। आ॰चुच्युवीमहि॥ यत्। वा। वाणीभिः। अश्विना॥ एव। इत्। काण्वस्य। बोधतं॥ ४॥ यत्। वां। कक्षीवान्। उत। यत्। वि॰अश्वः। ऋषिः। यत्। वां। दीर्घ॰तमाः। जुहाव॥ पृथी। यत्। वां। वैन्यः। सदनेषु॥ एव। इत्। अतः। अश्विना। चेतयेथां॥ ५॥ छ॥ १७४॥ यातं। छर्दिः॰पा। उत। नः। परः॰पा। भूतं। जगत्॰पा। उत। नः। तनू॰पा॥ वर्तिः। तोकाय॥

त नयाय॥ याऽतं॥१॥ यत्। इंद्रेण। सऽरथं। याथः। अश्विना॥ य
त्। वा। वायुना। भवथः। संऽओकसा॥ यत्। आदित्येभिः। ऋभु
भिः। सऽजोषसा॥ यत्। वा। विष्णोः। विऽक्रमणेषु। तिष्ठथः॥२
॥ यत्। अद्य। अश्विनौ। अहं। हुवेय। वाजऽसातये॥ यत्। पृत्ऽ ७
सु। तुर्वणे। सहः। तत्। श्रेष्ठं। अश्विनोः। अवः॥३॥ आ। नूनं। न ७७
यातं॥ अश्विना॥ इमा। हव्यानि। वाम्। हिता॥ इमे। सोमासः। अ
धि। तुर्वशे। यदौ। इमे। कण्वेषु। वां। अथ॥४॥ यत्। नासत्या॥
पराके। अर्वाके। अस्ति। भेषजं॥ तेन। नूनं। विऽमदाय॥ ७८

प्रऽचेतसा॥ छर्दिः। वत्साय। यच्छतं॥५॥ ॥ अभुत्सि
उं इति। प्र। देव्या। साकं। वाचा। अहं। अश्विनोः॥ वि। आ
वः। देवि। आ। मतिं॥ वि। रातिं। मर्त्येभ्यः॥१॥ प्र। बोधय। उष
। अश्विना। प्र। देवि। सूनृते। महि॥ प्र। यज्ञऽहोतः। आनु
षक्॥ प्र। मदाय। श्रवः। बृहत्॥२॥ यत्। उषः। यासि। भा
नुना॥ सं। सूर्येण। रोचसे॥ आ। ह। अयं। अश्विनोः। रथ
ः॥ वर्तिः। याति। नृऽपाय्यं॥३॥ यत्। आऽपीतासः। अं
शवः॥ गावः। न। दुह्रे। ऊधऽभिः॥ यत्। वा। वाणीः। अनूष

त॥ आ। देव॰यंतः। अश्विना॥४॥ आ। घ्नन्ताय। आ। शा वस्ते॥ आ
नृ॰सद्याय। शर्मणे॥ आ। दद्राय। प्र॰चेतसा॥५॥ यत्। नूनं
धीतिः। अश्विना॥ पितुः। योना। नि॰सीदथः॥ यत्। वा। सुम्नेभि
ः॥ उक्थ्या॥६॥१२॥ तं। वां। रथं। वयं॥ अद्य। हुवेम॥ पृथु॰
ज्रयं। अश्विना॥ सं॰गतिं। गोः॥ यः। सूर्यां। वहति। वंधुर॰युः॥ ७८
गि र्वाहसं। पुरु॰तमं। वसु॰युं॥१ युवं। श्रियं। अश्विना। देवता
तौ॥ दिवः। नपाता। वनथः। शचीभिः॥ युवोः। वपुः। अभि। पृक्षः।
सचंते॥ वहंति। यत्। ककुहासः। रथे। वां॥२॥ कः। वां। अद्य
। करत। रात॰हव्यः॥ ऊतये। वा। सुत॰पेयाय। वा। अर्कैः॥ स ७९

तस्य। वा। वनुषे। पूर्व्याय॥ नमः। येमानः। अश्विना। आ। ववर्त्तत्॥३॥
हिरण्ययेन। पुरुभूइति पुरु॰भू। रथेन॥ इमं। यज्ञं। नासत्या।
उप। यातं। पिबाथः। इत्। मधुनः। सोम्यस्य। दधथः। रत्नं। विधते।
जनाय॥४॥ आ। नः। यातं। दिवः। अच्छ। पृथिव्याः॥ हिरण्ययेन
। सु॰वृता। रथेन॥ मा। वां। अन्ये। नि। यमन्। देव॰यंतः॥ सं।
यत्। ददे। नाभिः। पूर्व्या। वां॥५॥ नु। नः। रयिं। पुरु॰वीरं। बृहंतम्
दस्रा। मिमाथां। उभयेषु। अस्मेइति॥ नरः। यत्। वां। अश्विना।
स्तोमं। आवन्न॥ सध॰स्तुतिं। आजमीढासः। अग्मन्॥६॥
इह॰इह। यत्। वां। सम॰ना। पपृक्षे। सा। इयं। अस्मेइति। सु

५१८ पतिः। वाजं। रत्ना॥ ३ ऋष्यतौ। जरितारं। पुर्व। हा। अप्रितः। कामः। ना
सत्या। पुरु। वद्रिक्॥ ४ मधु॰मतीः। ओषधीः। द्यावः। आपः। मधु॰मत्
नः। भवन्तु। अन्तरिक्षं॥ क्षेत्रस्य। पतिः। मधु॰मान्। नः। अस्तु॥ ७
अरिष्यन्तः। अनु। एनं। चरेम॥ ५। पनाप्यं। तत। अश्विना। स तम
वा। वृषणः। दिवः। रजसः। पृथिव्याः॥ सहस्रे। शंस्याः। उत। ये। गो
इष्टौ॥ सर्वान्। इत्। तान्। उप। यात। पिबध्यै॥ ६॥ ३॥ १७॥ इति
विंशतिमं द्वीपं॥ संवत् १५ वर्षे माघवदि ६ बुधे संपूर्णतां अर्थवा
स्तव्यं। आ अंतरनागरस्य ज्ञातीय पंचोली। नाराछाजसुत सदा शिवपठनार्थं ७८
हरिवसेन लिखितमिदं॥ शुभं॥ ॥ शुभं। शुभं। श्रीभवानीजयतु॥